॥ श्रीमद्वल्लभशरणम् ॥

# मधुराष्टकनी प्रस्तावना

( लेखक प्रो० श्रीयुत जेठालाल गोवर्धनदास शाह M. A. )

भगवानना वदनावतार श्रीवल्लभाचार्यजीना त्रण स्वरूपो मार्गीय ग्रन्थोमां वर्णववामां आव्या छे. आचार्य तरीके भक्तिमार्गनो उपदेश आपीने आधिभौतिक स्वरूपनुं कार्य पोते प्रकट कर्युं छे. अने अणुभाष्य, तत्त्वदीपनिबन्ध, भागवत उपरना श्रीसुबोधिनी तथा षोडश-ग्रन्थोनी रचना आध्यात्मिक स्वरूपे—वाणीद्वारा दैवीजीवोना उद्धारनुं कार्य कर्युं छे. आधिदैविक स्वरूपे स्वामिनी भावथी प्रभुना विप्रयोगनो अनुभव कर्यो छे.

श्रीमहाप्रभुजीना स्वरूप, तथा गुण तेम कार्यनुं निरूपण श्री-विट्ठलेशजीए सर्वोत्तम स्तोत्र, श्रीवल्लभाष्टक तथा स्फुरत्कृष्ण प्रेमामृतमां करेल छे. सौन्दर्य पद्यमां तेमनुं आधिदैविक स्वरूप वर्णवेलुं छे. जे प्रभुनी स्वामिनी साथेनी लीलानुं साक्षीभूत छे. श्रीवल्लभाष्टकमां जणाव्या प्रमाणे श्रीमहाप्रभुजीना श्रीअंगमां श्रीवृन्दावनचन्द्र कृष्ण भग-वाने जे गोपीजनोने निरवधि आनंदनुं दान रासादि लीला थी करेलुं—ते लीलारूपी अमृतना जलधि ओज उछली रहेला छे श्रीमहाप्रभुजीना प्रत्येक अंगमां प्रभुए करेली रासादिलीलानो आनंद भाव उछाली रहेलो छे एक पण श्रीअंग एवुं न थी के जेमां ते भाव निरन्तर आनन्द थी भरेलुं छे. पोताने विप्रयोगमां जे आनंद अने अनुभव थयो तेवो अनुभव अन्य भक्तोने थाय ते माटे तेमनुं प्राकट्य होवाथी ते भावने सुबोधिनी टीकामां पोते प्रकट कर्यो सुबोधिनीनी दशमस्कन्धनी निरोधलीलामां थी एकज तत्त्व साररूपे पोते प्रकट कर्युं अने ते स्त्री भाव. स्त्रीभावनुंज बीजुं नाम पुष्टिमार्ग. पुष्टिमार्गीय तेज के जेनामां प्रभु माटे स्त्रीनो प्रेम होय. पछी ते पुरुष देहधारी होय के स्त्री देहधारी. पण तेनुं हृदय स्त्री प्रेम थी भरेल होय. जेम सत्पत्नीने पोताना पति माटे प्रेम होय, तेवो

प्रेम प्रभुने अर्पण करवामां आवे ते प्रेम आत्मनिवेदन पूर्वक प्रभुनी सम्पूर्ण शरणागति वालो. देह इन्द्रिय, अन्तःकरण साथे आत्माना प्रभुना सम्पूर्ण विनियोग पूर्वकनो होय, एटलुंज नहि पण तेमां 'संत्यज्य सर्वविषयानु' नो संन्यास होय, अने सांसारिक पदार्थों तरफनी विमुखता अने प्रभु साथे सन्मुखतानी भावना प्रपंचविस्मृति पूर्वकनी प्रभुमांज आसक्ति आ प्रकारनो निरोध–ते स्त्री भाव. अने तेज पुष्टिमार्ग नो मर्म. श्रीमदाचार्यचरणनुं हृदय गूढ स्त्रीभावथी पूर्ण हतुं. ते थी श्रीप्रभुनी रसात्मक लीलानो अनुभव पोते करता अने ते लीलानो अनुभव दैवी-जीवो पण करे ते माटे सुबोधिनी मां ते लीलाना भावो समजाव्या, के जेथी ते लीलानी भावना करवाथी रसात्मक स्वरूपनो अनुभव दैवी-जीवो करे.

'मधुराष्टक' ग्रन्थ जोके नानकडो पद्यात्मक ग्रन्थ छे छतां तेमा प्रभुना स्वरूप अने लीलानो अनुभव श्रीमहाप्रभुजी ए पोताना भक्तो माटे जणाव्यो छे. पोते आचार्य छतां प्रिया गोपी भर्तुं गोपीजनना भर्ता श्रीकृष्णनां प्रियास्वामिनी स्वरूप हता. श्रीकृष्ण भगवानना निरन्तर स्फुरायमान प्रेमरूपी अमृतरसथी पूर्ण श्री अंगवाला पोते व्रजपतिना विहाररूपी रससमुद्रमां विहार करता हता. चोराशी तथा बसोबावन जेवा भाग्यवान वैष्णवोने आवा स्वरूपनां दर्शनथयेलां श्रीपद्मनाभदास जी एक पदमां जणावे छे—

वृन्दावन रम्यक् अवनी रस उर संपुट तें कोउ न पावे,
पद्मनाभ गिरिधर रसलीला वेणुनादकी बतियां भावे.

श्रीमहाप्रभुजीना हृदयरूपी संपुटमां वृन्दावननी भूमिना रस एटले श्रीठाकोरजी बिराजे छे. तेने कोई पण मेलवी तेम नथी श्री-ठाकुरजीनी रसलीला तथा वेणुनादनी लीला आपने घणांज प्रिय छे.— अर्थात् ते लीलानी भावना तेमना हृदयमां खूब भरेली छे. प्रत्येक क्षणे तेनुं ध्यान करीने प्रभुना रसात्म स्वरूपनो अनुभव पोते करे छे. षोडशग्रन्थो मोटे भागे सिद्धान्तात्मक ग्रन्थो छे. तेमां कृष्णाश्रयमां

निःसाधन जीवोनो आश्रय भगवान श्रीकृष्णज छे. माटे अनन्य भावे तेनो आश्रय करवो एम तेमां जणावेल छे. पण 'मधुराष्टक' तो रसथी-जतर बोल छे. प्रभुना श्री अंगना प्रत्येक अवयव तेनी कृतिनुं माधुर्य-सौन्दर्य आमां दर्शाव्युं छे.

उपनिषदोमां ब्रह्मने सत्य, ज्ञान अने आनंद रूपे—सच्चिदानन्द रूपे वर्णवेल छे. जगत् ए भगवाननुं सद्रूप छे. जीव ए सच्चित् रूप, अक्षर सच्चित् साथे गणितानंद रूप भगवान श्रीकृष्णना शुद्ध आनन्द रूपज छे. तेने रस पण कहेल छे. आ रसात्मक प्रभु तेज कृष्ण, अने तेज पुष्टिमार्गीयना सेव्य के प्राप्य प्रभु. व्रजसीमन्तिनी जेवां प्रेम लक्षणा भक्ति नी स्नेह आसक्ति अने व्यसनावस्थामां थी पसार थयेल 'तन्मयता' नी दशावालाज तेना अधिकारी छे—मुक्तिमार्ग वाला पण तेना अधिकारी न थी आ वस्तु समझनारज आ 'मधुराष्टक' नुं रहस्य समजी शके. उपर जणावेला उच्च भाववालानेज प्रभु पोतानी लीलाना अनुभवनुं दान करे छे.

आ लघुग्रन्थ 'षोडशग्रन्थ' ना पांठ ना पुस्तकमां मुद्रित थयेलो छे. पण तेनुं रहस्य प्रकट करनार प्राचीन टीकायुक्त ग्रन्थ हालमां अप्राप्य होवाथी मुंबईनी श्रीपुष्टिमार्गीय युवक परिषदे टीकाओ सहित पुनर्मुद्रण करीने सम्प्रदायिनी माटी सेवा करी छे. श्रीमहाप्रभुजीना ग्रन्थो उपर तेमना वंशजोए अणमोल टीकाओ लखीने सम्प्रदायना साहित्यनुं गौरव वधार्युं छे. श्रीमहाप्रभुजीना ग्रन्थो तथा तेना उपरनी टीकाओ ए सम्प्रदायनुं खरुं धन छे. तेनुं रक्षण निधि स्वरूपनी माफक काल जी थी करवुं जोइए, तेज श्रीमहाप्रभुजी प्रत्येनी शुद्ध-भक्ति छे. नाम सेवा वगर आधुनिक समयमां रूपसेवाना भाव समाजवानुं तथा हृदयमां उतारवानुं अशक्य छे. सम्प्रदाये आ बाबत तरफ उपेक्षा करवी जोईं ए नहि. दरेक धर्मनुं साहित्य तेज तेना अस्तित्वने टकावी राखे छे. पुष्टिमार्गनुं साहित्य एज पुष्टिमार्गने चिरन्तन टकावी राखनारु अमोघ बल छे. ते बल जो आपणे गुमावशुं तो ते साथे पुष्टिमार्ग पण

हंमेशा माटे गुमावीशुं ए दृष्टि ए श्रीपुष्टिमार्गीय युवक परिषदनी ग्रन्थ प्रकाशन प्रवृत्ति आवकारदायक छे. अने तेने साधन सम्पन्न वैष्णव गृहस्थो ए पोषवी जोईए.

आ ग्रन्थ छ संस्कृत भाषानी टीकाओ अने एक व्रजभाषानी टीका साथे प्रकट थाय छे. व्रजभाषामां तेनुं रहस्य आपवामां आवेलुं होवाथी संस्कृत टीकाओनो गुजराती भावार्थ आपवामां आव्यो न थी संस्कृत भाषामां नीचेनी टीकाओ प्रसिद्ध थइछे.

(१) श्री विठ्ठलेशप्रभुचरण (श्रीगुसांईजी) नी विवृत्ति.
(२) तनो उपर श्रीघनश्यामजीनी टिप्पणी.
(३) श्रीबालकृष्णजीनुं विवरण.
(४) श्री वल्लभकृत विवरण.
(५) श्रीरघुनाथजी कृत विवरण.
(६) श्रीहरिरायजी विरचित मधुराष्टक तात्पर्य. अने
श्रीव्रजभाषानी टीका.

श्रीविठ्ठलेशप्रभुचरण प्रारंभमां श्रीआचार्यचरणने नमस्कार करीने विवृत्ति नो प्रारम्भ करे छे अने जणावे छे के दैवीजीवोना उद्धार माटे श्रीमहाप्रभुजी प्रकट थयेला होवाथी अने व्रजमां स्थिति करतां पोताना हृदयमां निगूढ पोतानुं सर्वस्व धन रूप अलौकिक अनुभावोना अनुभवने पोताना दैवीजीवोना उद्धार ने माटे आग्रन्थमां प्रकट करे छे. एम करीने मधुराष्टक ना प्रत्येक 'मधुर' स्वरूप अगर लीलानुं रहस्य जणावे छे. आ टीकामां श्रीविठ्ठलेशजीनुं काव्यत्व अनुपम रीते झलके छे. श्रीघनश्यामजीनी टिप्पणी ते श्रीविठ्ठलेशजी नी विवृत्तिने विशद करवामां उपयोगी थाय छे. जो के ते सम्पूर्ण मधुराष्टक ऊपर न थी मात्र चोथा श्लोक पर्यन्त छे. श्रीघनश्यामजी ए श्रीगुसांईजी ना पुत्र हता. श्रीगुसांईजीनी विवृत्तिनुं गद्य कादम्बरी जेवा गद्य जेवुं. शब्दलालित्य थी पूर्ण होवाथी विद्वानोना मनने पण हरे तेवुं छे. एमां शब्दलालित्य, भावलालित्य तथा शैलिनी चमत्कृति तथा मनोहारिता

खरेखर अवर्णनिय छे. श्रीमहाप्रभुजी ए जे भाव 'मधुर' एटला शब्दथी गूढ रीते जणाव्यो छे तेने श्रीगुसांईजी ए शब्दद्वारा व्यक्त कर्यो छे. एटलुंज नहि पण अलंकार थी सुशोभित करेल छे मधुराधिपते रखिलं मधुरम् । ए प्रत्येक श्लोक ना अन्ते मूकेला चरणनो भाव पण नावीन्यथी आप श्री रजू करे छे. 'मधुर रसना अधिपति' ए शब्दने मधुरान । अधिपति एटले श्रीमद्राधा तथा अधर सुधा—एवो रंमणीय अर्थ ज्यारे तेओ श्री करे छे त्यारे खरेखर भक्तोनां हृदय पण शब्द अने तेना भावना माधुर्यमां नर्तन करवा लागे छे. छेल्ला श्लोकमां कहे छे के नंदना गृहना क्यारामां उगेला अने श्रीमद् गोपीजनोना प्रेमसिंचान थी वृद्धि पामेल कल्पवृक्षनुं पर्ण—तेम कल वगेरे सर्व मधुर छे. त्यांज मधुरिमानी सीमा आवे छे. आमां भगवानने कल्पवृक्ष कह्या अने तेमना अंगो तथा लीलाओने ते वृक्षना जुदा जुदा भागोनी साथे सरखावे छे रसरूप—प्रेमस्वरूप भगवाननुं प्रत्येक अंग तेमज लीला निर्दोष छे.मधुर छे.

श्रीबालकृष्णजी श्रीविठ्ठलेशजीना आत्मनुं विवरण ए स्वतंत्र रीते योजायेलुं छे ते 'मधुराष्टक' ना भावोनुं विवरण करे छे. प्रारंभमां तेओ श्रीआचार्यचरणने नमस्कार करीने, पोतानी टीका करतां आ ग्रन्थनो प्रादुर्भाव केवी रीते थयो ते जणावे छे. श्रावण महिनाना शुक्ल पक्षनी एकादशी ने दिवसे प्रभुए प्रकट थईने श्रीआचार्य-चरणने ब्रह्मसंबन्ध द्वारा दैवीजीवोना उद्धारनो आदेश आपेलो ते प्रसंगे तेमने जे दर्शननो अनुभव श्री अंग थी थयो तेनुं प्रत्येक अंग तथा तेना कार्यद्वारा मधुर शब्दथी जणावेछे. ते समय भगवाननुं उद्दीपन, आलंबन तथा विभावादि रसान्तः पाति तमाय सामग्री वाला तथा लीला तथा गुण थी विशिष्ट उद्बुद्ध रसात्मक स्वरूपनो जे प्रमाणे अनुभव थयो तेनुं वर्णन अहिं आ करवामां आवे छे. भगवानना रूपनुं शुं वर्णन करवुं तेमनुं सर्व मधुर छे. पोते शृंगार रूप होवा छतां, वीररस, भयानक वगेरे रसोनी पण लीला करी छे; पण ते बधी शृंगाररसनी पोषक तेमां अन्तर्भूत थती होवाथी ते पण मधुर छे.

जेम राजाने परिधान करवाना अलंकारो सुवर्णना होय छे. तेम प्रभुनी लीलाना सर्व उपकरणो पण मधुर छे. छेवटे लखे छे के शृंगार रस भगवाननी संयोग तेमज विप्रयोग उभय अवस्थानी लीला मधुर छे. एक पण लीला एवी न थी के जे मधुर ना होय. अद्भुतरसनी तेम बिभत्स रसनी पण मधुर छे. आ टीका पण सरल भाषने विशद करनारी हृदयंगम छे.

श्रीवल्लभजीनी टीका पण स्वतंत्र छे अने ते विस्तृत पण छे. दरेक भावने एक रीते समजावता तेओ श्री ने संतोष नहि थतां अथवा करीने बीजी रीते पण समजावे छे. अने आ टीकामां दशमस्कन्धनी भगवाननी रसलीलाना भावो सुंदर रीते प्रकट कर्या छे. आनुं रसपान जेम जेम करवामां आवे, तेम तेम हृदयनी तृषा वधती जाय छे. भगवानना दर्शननी आर्तिवालां हैया ने ते सुधा समान शीतलता आपे छे. आ ग्रन्थनुं प्रयोजन समजावता आप श्री कहे छे व्रजसीमन्तिनी साथे भगवाने लघु रास कर्यो अने संयोग सुख आप्युं पण तेमने मान भाव थतां भगवान तिरोभूत थया. त्यारे तेओ श्री ए भगवाननी लीलानुं अनुकरण कर्युं तथा गुणगान कर्यां त्यारे प्रभु प्रकट थया अने रासनुं सुख आप्युं ए उभय प्रकारनी लीलानो अनुभव श्रीमहाप्रभुजीने थयो अने तेनुं वर्णन 'मधुर' शब्दथी करे छे.

प्रभुथी विप्रयोगनी अवस्थामां प्रभुना स्वरूप तथा गुणगानज स्वास्थ्यनो हेतु छे. विप्रयोग दशामां एक क्षण पण करोडो युगो जेवी ताप क्लेश थी असह्य बने छे. मात्र प्रभुनी लीलानुं स्मरण-ध्यान गुणगानज स्वास्थ्य आपे छे. ते विप्रयोगनी दशामां श्रीमहाप्रभुजी ए 'मधुराष्टक' नी रचना करी छे.

त्यारपछी श्रीविठ्ठलेश प्रभुचरणना पांचमा आत्मज श्रीरघुनाथजी कृत विवरण अने छेल्ले श्रीहरिरायजी कृत मधुराष्टक तात्पर्य चिंतना निरोध माटे श्रीवल्लभाचार्यजी ए सेवानी प्रणालिका योजी छे सेवा द्वारा प्रभुना संयोग सुखने मेलववानुं छे. पण सेवा पछीना

समयमां चिन्तना निरोधने माटे मानसी सेवा कही छे. सेवा ए देह अने बितथी करवानी छे. मानसी सेवामां भाव मुख्य छे. ए भावना स्थैर्य, पोषण अने वृद्धि माटे श्रीहरिरायजी ए स्वरूप भावना, लीला भावना तथा भावभावनानो प्रकार जणाव्यो छे. स्वरूप भावना 'योग' नी माफक प्रभुनुं चिन्तन करवुं जोईए. पण आ चिन्तनमां प्रभुना दर्शन न थवाथी जे आर्ति थाय ते आर्ति तेमां मुख्य होय छे. त्यारपछी प्रभुनी लीलानुं चिन्तन करवुं आ लीला भावना थी हृदयमां स्वस्थता आवे छे. आ भावनामां लीला रूप भक्त बनी जाय छे पछीनी अवस्था ते भावभावना आनाथी प्रभुनां स्वरूप अने लीलामां आसक्ति थाय छे. अने लीला सम्बन्धी सुखनो अनुभव थाय छे जेम क्षुधामां अन्नरसनो अनुभव थाय तेम, भावभावना थी लीला अने स्वरूपना सुखनो अनुभव थाय छे. श्रीमहाप्रभुजीनुं भावभावन आ 'मधुराष्टक' ग्रन्थमां जणावेल छे. प्रभुथी बिप्रयोग दशामां प्रभुना स्वरूप तथा तेमना प्रत्येक अंगथी करायेली लीलानी भावना ए आ ग्रन्थनुं तात्पर्य छे. विरत दरम्यान ताप भाववाला भक्तोथी रही शकातुं न थी त्यारे स्व समान भाववाला समक्ष पूर्वे अनुभवेला स्वरूपनुं निरूपण करे छे. गोपीजनो ए जे जे रसात्मक स्वरूपनो अनुभव करेलो तेनुं विरहमां फरी थी अनुभव करे छे. जुदा जुदा गोपांगनाओ श्री अंगना जुदा जुदा अवयवोना सौन्दर्यनो अनुभव करे छे. अने पोत पोताना अनुभव जुदो जुदो वर्णवे छे. एक अधरनुं वर्णन करे छे, तो बीजा मुखनुं, तो श्रीजा नेत्रनुं. श्रीमहाप्रभुजी पण गोपीजनना ते ते भावनुं स्मरण करीने प्रभुना स्वरूप तथा लीलानुं मधुर भावे वर्णन करे छे. आमां निरूपेली भावना करवाथी प्रभुना ते ते भावना सिद्ध थाय छे अने रस स्वरूपनी प्राप्ति थाय छे.

ब्रजभाषानी टीका स्पष्ट होवाथी; अहिं आ तेनो खास उल्लेख कर्यो न थी.

श्रीप्रभुजीए करेला प्रभुना मधुरस्वरूप अने लीलाना अनुभवनुं दान निजजनो ने थाव.

भावात्मक पुष्टिमार्गमां प्रभु भावात्मक छे. अने तेमनुं स्वरूप तथा लीला ए पण भावात्मक छे. तेमनुं अहर्निश चिन्तन ध्यान थवुं जरूरी छे.—तेज पुष्टिमार्गीय योग छे. ए ध्यान साधनथी लभ्य नथी पण प्रभु कृपा होय तोज. आ कृपाना पात्र त्यारेज बनायके ज्यारे ब्रह्म-सम्बन्ध प्राप्त करीने प्रभु सेवा परायण बनाय वोज.

आ ग्रन्थनुं मुद्रण करीने श्रीपुष्टिमार्गीय युवक परिषदे सम्प्रदायनी उत्तम सेवा करी छे ते माटे धन्यवाद घटे छे. आवां बीजां पण ग्रन्थो ते संस्था प्रकट करो ए वो मनोरथ व्यक्त करु छुं. परिषदना उत्साही मानद मंत्री श्रीगिरधरलाल जगजीवनदास शाहे आ प्रस्तावना लखवानुं मने सूचन करीने मने जे तक आपी छे ते माटे तेमनो आभार मानुं छुं वली आ ग्रन्थनो संस्कृत विभाग शुद्ध रीते परिश्रम पूर्वक छपाववाना कार्यमां शास्त्रीजी केशवराम भाई ए जे सेवा आपी छे तेमनो पण आभार मानवो आवश्यक छे.

लि० जेठालाल गोवर्धनदास शाह ना

सविनय भगवदस्मरण.

श्रीकृष्णः ।

# "श्रीमधुराष्टकनुं माधुर्य"

[लेखक० नि० ली० पू० पा० गो० श्री ६ श्रीव्रजनाथलालजी महाराज]

श्रीमद्वल्लभाचार्य प्रणीत मधुराष्टक स्वमार्गीय साहित्यशोथी अपरिचित नथी. श्रीमन्महाप्रभुने विप्रयोगदशामां विविध लीला रसात्मक रासेश्वरनी जे कई अलौकिक लीलाओनां निगूढ अनुभवो उपलब्ध थया हता ते सर्वने निजजनो पर अनुग्रहनी वर्षा करवा श्रीमहाप्रभुजी ए 'मधुराष्टक' मां व्यक्त कर्या छे. खाचितज तेनी मोहक गंभीरता चिंतनीय छे. इ० सं० १९२६ मां श्रीना चरण पामेलां वैष्णव मुलचन्द्र-तुलसीदास तेलीवाला ए श्रीमधुराष्टक उपरनी छ टीकाओने शोधी मुद्रित करी हती. तेथी तेनी सहायता थी—श्रीमधुराष्टकनुं माधुर्य विद्वद मधुपो सरस चारवी शके छे. वस्तुतः श्रीमधुराष्टकनुं माधुर्य नाम थीज स्पष्ट छे. श्रीमदप्रभुचरणनी ललित विवृत्तिथी तो एं माधुर्य विशेष मार्दव भयुं थई गयुं छे. आपनी विवृत्तिनी शैली महाकवि बाणनी कादम्बरीना जेवीज मननीय अने रमणीय छे. हुं एज विवृत्तिनो आशय गो० श्रीघनश्यामजीना टिप्पण ने आधारे लखवा पेरायो छुं.

ए निर्विवाद छे के आपणा सम्प्रदायनुं आवुं सर्वांग सुन्दर अने सर्वोत्कृष्ट साहित्य मूर्ख, विषयाक्रान्त लोको ( ! ) माटे न थी आवा साहित्यना अवलोकनमां अधिकार परम लक्ष्य छे. अतः श्रीमत्प्रभुचरण स्पष्ट अधिकारनुं निरूपण करे छे के—

पार्थये रसिकाःस्वरैं पश्यन्तिन्वद महर्निशम् ।
एतद्रसानभिज्ञास्तु माद्राक्षीदपि वैष्णवाः ॥

अर्थात्—हे रसिको ! साम्प्रदायिक साहित्यमां तहमे स्वच्छन्द थी विहरो किन्तु एक प्रार्थना छे.—जे भगवानना अनुग्रह रसथी सिंचाया न होय लौकिक विषयोमांथी जे निवृत थया न होय तेवा माला-

तिलक धारी अहंमन्य वैष्णवो ए तो उक्त प्रकारनुं दिव्य साहित्य जोवुं न जोईए.

हु एज आज्ञानुसार प्रिय वांचकवृन्दने विनवुं छुं के श्रीमत्प्रभु-चरणनी उक्त अनुज्ञानुं ध्येय हृदयारूढ करीनेज आ विशाए संचरशो.

भक्तेच्छा पूरक स्वामी, निगूढ हृदयवली.
श्रीमदाचार्यने वन्दु, गुप्तलीलाति मोहन.

श्रीमहाप्रभुजीने व्रज अत्यन्त प्रिय हतुं. आप दैवोद्धार प्रयत्नात्मा हता. आपना हृदयमां निगूढ रहेला अनुभवो वस्तुतः श्रीमहाप्रभुनां जीवन हता. ए बधां अलौकिक अनुभवोने पोताना जीवोने कृतार्थ करवा श्रीमहाप्रभु श्रीमधुराष्टकमां निरूपे छे. के.

मधुरा एटले श्रीमद्राधा अने अधर:सुधा ए उभयना अधिपति तेज मधुराधिपति. श्रीकृष्णनुं प्राकट्य श्रीमद्राधानी अधर-सुधाना पान करवाज थयुं हतुं लालसाथी सुधा-ग्रहणमां तदेकपरता थाय छे. जेम सुधा देव भावनी उद्बोधिका छे. तेम आ अधर–सुधा ए अधर रस-भावनी उद्बोधिका छे. श्रीमद्राधा सिद्धि रूपा होई तेमां प्रवेशेल सुधा ए सर्व सिद्धिनी संपादिका स्वतः सिद्धज छे. आवुं माधुर्य अन्यत्र कम्हां ए न थी. आवालीला सह वर्तमान श्रीकृष्णज श्रीमहाप्रभुजीना सर्वस्व छे.

मधुव्रतिथी गुंजायमान, सुवर्ण, युथिका विगेरे कुसुमोथी रचायेल केलि–शयनवाला, प्रिय सखी ओ ए विविध तांबुल, अंगराग, यावक, अंजन-पात्र, सिंदूर, कंचुकी आदि मणि मुक्ताहारो जेना मध्य भागमां लावी मूक्या छे एवा, अने ज्यां मधुर सुन्दर वेणुनाद थी पाछल नेपुरना ए मंद स्वरो थई रह्या छे. एवा कोई एक लता कुंजमां ( लतान्तर थी सखीओथी निरवाना ) श्रीमद्राधा कृष्णना रसावेशज नित मर्यादा रहित लावण्य विभवोने श्रीविरह वन्हि वारंवार स्मरी स्मरी वर्णवे छे.

अहीं ततश्चकृष्णो पवने जल स्थले आ प्रतीकमां निरूपित

मर्यादा राहित्य समजवुं. केवा वनमां १ श्रीमत्प्रभुचरणे ते माटे वन वर्णव्युं छे. लीलोद्बोधक मधुपोनां निरन्तर गुंजन थी लीला-कुंजनुं ज्ञान थई शके. अन्यथा नहि. अतः अनेक सुगन्धी मालाओ तथा रति-श्रम-जलार्द्र पुष्प शैया थी सुरभि-प्रमत्त बनेला मोद लपंट भ्रमरो लीलानुं स्मरण करावता त्यां गुंजी रह्या छे. लीलोपवनमां उद्बोधक पदार्थोना आ नयन ना बे कारणो छे. प्रथम स्नान्तमां पुनः शृंगार माटे अने द्वितीय विपरित रतिमां प्रभुने शरणागरवा ने माटे प्रभु कुंज-मध्यमां मुरलीनो मीठो रव करे छे. ते थी पधारेल स्वामीनीओना चरण मंजीरोनो ध्वनि तेमां लीन थई जतो तोइ भक्तोना आगमननुं ज्ञान कोइ नेये नथी थतुं. आवा महारसनी सन्निधिमां कोईनी पण स्थिति असंभवित छे. माटेज अन्य सखीओ रति समयमां पोतानी स्वामिनी ना विजयने पेरवी संतोष प्राप्त करवा बीजी लताओमांथी संताइने दर्शन करे छे.

रसलीलाना समये श्रीमद्राधाकृष्णनां वदनो केवां शोभेछे ?

अतएव श्रीमत्प्रभुचरण प्रथम श्रीमद्राधा वदन माधुर्यने विवेचे छे.

अर्धं लज्जाथी नमेल नेत्र कटाक्षथी निरिक्षण करातुं दंत क्षत दाननी सुषमाथी रमणीय दीसतुं, गाढ चुंबननां अवसरे तांबूलादि थी चित्र-विचित्र थयेले गंड द्वय युक्त विशाल मुक्ताफलनी आवलि थी शोभित कर्णालंकार थी संगत लीला मणि मुक्ता अने अरुणमणिथी शृङ्खलित अलकावलि थी दीपी रहेलुं अगरु सार, कस्तुरी तथा कुंकुंममणिनां बिन्दुओ थी अलंकृत भाल-प्रदेशान्वित, मानो कुपिता एज ज्यां भ्रूभंगनी रचना करी छे. तेवुं. विविध-बंध-लीला थी व्यस्त थइ गयेल श्री अंग रचना युत, अन्योन्य गंड द्वयनां संगनमां रति-श्रम. शीकरो थी आर्द्र श्रीकृष्णनी गंडस्थ तिलक रचनानी प्रति कृति थी कमनीय एवुं मुक्तालंकार-भूषित सुनासापुट संयुक्त श्रीमती वृषभान-नंदिनीनुं वदन माधुर्यमय छे.

विजित बिम्बाधरयुक्त, कनकसुत्रथी सूचित, विशाल, सुभग निर्मल मुक्ताफल थी सुन्दर दिसतुं श्वास थी उंचानीचा थवा नासा-पुटयुत, त्रिभुवनविजय व्यग्न नयनोथी मधुरु कुटिल भ्रुथी मन माह-नारुं कईक हास्य थी विगलित थता विमल सौरभथी द्विरफोने मुग्ध करतुं. मल्लिकादि कुसुमोथी खसित केश पासथी युक्त उज्ज्वल उच्च चिबुक थी युत, हिरकादि मणिमय अलकावलि थी मधुर दिसतुं प्रतिक्षण वृद्धिगत थता प्रेम–सित्कारोवालुं मकर–कुंडल–मणि गंड मंडल थी प्रोद्भाषित् क्यारेक चकित नयनोथी सुशोभित श्रीरासेश्वर नन्दनन्दननुं वदन मधुरप भयुं छे.

गुंजा मणिहारोथी शोभतुं, श्याम-कंचुकीथी आच्छादित, मृगमद पत्रथी अंकित, कुंमकुंम रचनाथी रंगायेलुं, लावण्यना सरोवर समोवडुं उत्तुंग उरोजो थी संश्लिष्ट, रति-श्रमनां बिन्दुओनां प्रोछनथी आर्द्र, विचित्र वसननां अंचलथी ढंकायेलुं कनक यूथिका. कुसुम मालाओ ी दर्शनीय दीसतुं, अति गौर विविध महामणिओथी जड़ायेली कनक मुद्रिकालंकृत श्रीकृष्णनी अंगुलीथी संदर्शित क्रीडनमां दूर थयेल कंचुकी–अवकाशवालुं श्रीमद्रा धानुं हृदय माधुर्यनां मार्दवथी भरेलुं छे.

कंठा भरणथी भूषित, तेनी पाछल मुक्तामालानी परंपराथी सुशोभतुं, पिनोन्नत, श्रीमद्राधानां आलिंगनथी विमर्दित मालावालुं, सुवर्ण मणिथी जटित वेणुथी दीपता दक्षिण करवालुं क्षणे क्षणे वृषभानुने आलिंगतु शिथिल उत्तरीयवालुं कोटि कंदर्प लावण्य श्रीमद्रा-धाकान्तनुं हृदय माधुर्यमय छे.

अवसर विशेषमां अंतरंग सखीओथी विज्ञापित, सुरम्य, विविध रुचिर फूलोनी मीठी सुगंध–लोलुप भ्रमरोथी गुंजित, कोकिलाओनां कुजनोथी कुजित रचित शैयावाला अन्यलतागृहमां रमणेच्छु श्रीमद्रा-धाकृष्ण मार्ग वच्चे आपता पुष्प-पक्षि अने सख्यादि ओमां अपांगोनुं मोचन करतां विविध चुम्बन–आश्लेशादि लीलाओ आचरता पुष्प-

गुच्छोने आकोशे उडावता गजेन्द्र लीलानुं ए अनुसरण करता ए सासक्त बाहुओ करी लीला, कमल वडे क्रीडन करता, ताम्बूलनुं चर्वण करता, कल–गीतोनुं गान करता; मृदुलता ओने प्रेमथी निवारित करता गमन करता. हता. श्रीमद्राधाकृष्णना आवा अवर्णनीय मधुर गमन मां श्री-महाप्रभुजीने जे माधुर्यनो अनुभव थयो तेनुं मधुराष्टकमां आप श्री ए मधुरुं स्मरणगान कर्युं छे. आगल श्रीमद्राधाकृष्णनी निरवधि रसाकर लीलाओमां श्रीमहाप्रभु तन्मय बनी जता होइ वर्णन अशक्ति ने लीधे मधुराष्टकना प्रत्येक पद्यनी अन्ते 'मधुरेश्वरनुं सघणुं मधुर" एवी रहस्य भरी मधुरी आज्ञा करे छे.

आज प्रकारनां समय विशेषमां उद्भवेला स्वप्राणभूत अनुभवो मधुराष्टक ना बीजा पद्यमां श्रीमहाप्रभु ए निरुप्या छे.

श्रीकृष्णचन्द्रनां प्राणप्रिय, व्यर्थ कोपायलां, स्वकूत्रनथी कोकिल कूजनथी कोकिल कूजनने जितनार कुटिल भ्रूवल्लीवाला, सुशोषाणतर अधरवाला, अनंग भारथी गर्विष्ट अने स्नेहार्द्र अपांग निरिक्षणोथी श्रीकृष्णना मुख-सरोजने जोतां श्रीकृष्णनी रससंवलित लीलाओथी खसी गयेल वस्त्र-नियन्त्रण वाला श्रीकृष्णथी परिपिडित पिनोन्नत स्तनोवालां छलथी करायेल अने हस्त थी ढंकायेल सर्वांग चुम्बनना आमोदथी प्रत्यंग पुलकिता कपोलांचल थी व्यवहित थइ वचन रचना-वाला, स्मित-सुमन वेरता समीप रहेलां श्रीकृष्णनां मुख-कमलादिनां अंगुष्ठा भरणमां पडतां प्रतिबिंबथी रसना आवेश थी "प्रथम म्हारेज चुंबन करवुंज जोइए" एम विचारी अंगुष्ठा भरणनुं चुम्बन करता विपरित रतिना वचनादिमां रसथी भ्रमण करता. केलि-शयनमां मुग्ध भावथी चंचल थई जतां श्रीमद्राधानां मधुराधिपति संबंधी वचन, चरित, वसन, वलित, चलति, भ्रमति ए सर्व मधुर छे. तेज प्रकारे श्रीकृष्णनां ए श्रीमधुरेश्वरी संबन्धीनां ए सहु माधुर्य–झरतां छे.

मित्रोने देखाडवाज प्रभु गायो ने निरखा गिरि ए चढया, हता. किन्तु उदेश एमनो ए न्होतो. दूर थी स्वप्रियाओना सौन्दर्य गति विलासने

आर्तिभर थी विचित्र वस्त्राभरणने तेमज चकित अवलोकनादिने जोवाज प्रभु गिरि-शृंगे पधार्या हता. परन्तु गोप-समाजने आनुं ज्ञान जरा ए न्होतुं एतो एमज मानतो के अनेक कुसुमोथी कुसुमित सुस्वादु फलोथी फलित लता द्रुम निकुंजोथी समृद्ध थयेल श्रीगोवर्धन पर्वत प्रभु गोचारणमां प्रवृत्त थया हते. श्रीकृष्णने माटे श्रीमद् गोपीजनो गोरस विक्रयना व्याजथी विविध वस्तुओने लइ सहचरोथी अज्ञात पोताना आगमनने सूचित करता. कालिन्दी तटस्थित रस-निकुंजनुं ज्ञापन करता वेणु-रवने सांभली त्यां गया. श्रीकृष्णना आलिंगनने पामेल रति. श्रमजलथी आर्द्र कुकुंमांकित स्वकीय उत्तरीयथी अलकोमां रहेली गोरेणुना प्रोंछननो अभिलाष सवेता, प्रोंछन समये 'रेणु' मां अने 'वेणु' मां श्रीकृष्णना हस्त स्पर्शथी पुलकित अवयवो वाला पूर्व रचित विविध सुमनोथी विनिर्मित शयनमां बिराजेल श्रीकृष्णनां चरण संवाहन परायण मत्ते भक्तिबाला, श्रीकृष्णना चरण कमलमां आसक्त श्रीमदगोपीजनोने दूरथी जोई प्रतीक्षा करता श्रीकृष्ण शिखर उपर थी उतरी रसात्मक नृत्य करी पोताना अनुरागने प्रगट करवा लाग्या.

प्रभु ए वेणु–रवमां त्रण स्वरो करेला. निकट निकुंज सूचक संकेत रूप मंद स्वर, कईक दूर सूचक मध्यम स्वर अने सुदूर निकुंज सूचक तार स्वर आवा स्वर भेद थी श्रीकृष्णेवेणुद्वारा भक्तोने अन्तरंग भक्तोने–आह्वान अर्पुं हतुं यदि प्रभु स्वर भेदवालो वेणु-ध्वनि न करेतो मित्रोने संकेतनो बोध थई जाय. अतः अहीं नाद भेद थी रसात्मकता सुचवाइ छे. जेम मयूर मयूरीने पेरवी रसाविष्ट बनी सर्वांगगत रसने एकत्रित करवा तथा मयूरी ओनां उपसित दानने काजे मयूरी सह नृत्य करे छे. तेम मयूर-मुकुन्द. मयूरी–भानुजा साथे नर्ते छे.

तेवाज रस-निकुंजमां कदाचित श्रीमद्राधा गीत करे छे. रसावेशथी परस्पर अधर-रस सुधानुं पान करे छे. पोताना अभिलाषोने प्रकट करती श्रुत–दुग्ध–मोदकादि सामग्रीओने श्रीमदगोपीजनो लावेला एनुं भोजन करेछे. तदनन्तर कुसुम शयनमां श्रीमद् गोपीजनोनां

सर्व अभिलाषोने प्रभु शयन द्वारा संपूरे छे.

प्रभुनुं ए शयन पूर्व संचित विविध-बंध मनोरथोथी उद्भवेल रसविशेषनुं दान करनाइं हतुं. त्यारपछी रसावेश थी प्रकटेल मर्यादा राहित्यनां क्रीडनथी प्रभुए स्वामिन्यादिओए करेलां रूपनो अंगीकर कर्यो. आ प्रकारे अभिलाष पूर्या बाद व्यस्त शृंगारमां श्रमार्द्रताथी उभययांकित तिलक-रचनानुं माधुर्य वदनारविन्दोमां श्रीमहाप्रभुए अनुभूत कयुं तेज श्रीमहाप्रभुए अत्र निरुप्युं छे.

मनमां निश्चित करेल दिवसे सदा विहारनी इच्छाथी निकलेलां वेणु-ग्रथित बकुल-मालती-कुरबक आदि कुसुमोनां परिमलो मन्द भ्रमर गणथी—आकुल केशपास वाला स्मितविकास युक्त विभ्रमथी द्रवीभूत लावण्य मुख वाला हिरकादि मणी गणथी रचित मृगमदादिनी तिर्यक रेखाओथी शोभित भाल-बिन्दुवाला नासापुटमां लोल मुक्ताओथी शोभता. समाधिष्ट उरोजो पर तरलित थता हारवाला विचित्र वसनान्तरथी दीपी रहेल अखिल वेश रचनावाला अलक तक रागांकित पदांगुली विराजीत विविध नेपुरवाला, स्थिर ग्रीवाथी दधि कलशिकाओने मस्तके लई जता श्रीमदगोपीजनोने व्रजाधिपसुत श्रीकृष्णे मित्रोनी साथे रोक्या. समीप आवेला चकित नयन गोपांगनाओथी चित्तने खोई बेठेला वदनेन्दु सुषमाथी अनेक गोप वधूओने मुग्ध करता. दूर रहेली गायोना निरीक्षणना व्याजथी मित्रोने स्थानान्तर करतां वक्रोक्ति अने कपोल उरोजादिनां स्पर्शथी कन्दर्पने आविर्भूत करता. उत्तमांग रहेल दधि-भाजननुं गृहण करता विविध मणीमय कांची-पट्ट-प्रसूनोने एकज करथी ग्रही लेता, विविध रचित प्रसून-प्रेदभूत निर्मल परिमलोन्मद मधुव्रतोनां गुंजन थी गुंजित लत्ता-गृहमां घोष-नन्दिनीओने लावी श्रीकृष्णे जे अनेक अलौकिक लीलाओ करी—प्रेमाब्धिनुं 'तरण' संपादित कयुं, मर्यादा रहित 'रमण' कयुं हास्य मालादिओनुं जे 'वभित' कयुं. क्षुद्रघंटिकाओनुं शमन कर्युं ए समग्रनुं स्मरण करीने श्रीमहाप्रभुजी मधुराष्टकमां तेनुं वर्णन करेछे.

आ प्रमाणे क्यारेक बकुल-आम्र-कदंबादि द्रुमोथी घेरायेल मंदबायु थी—सुवासित केलि योग्य तरणि तनया नां कूलमां स्नानादिना व्याजथी पधारेल श्रीमद्राधा साथ मकर कुंडल मंडित गंड मंडल थी अखिल भुवनने प्रकाशित करतो, कमलदल लोचन, मुरलीधर, गुंजामणि हारो थी वक्षःस्थल ने शोभावती श्रीमद्राधा वदन ने अवलोकता निखिल मनोरथ स्वरूपे प्रादुर्भूत थयेला प्रभुए आश्लेशादि लीलाओ करी हती. श्रीयमुनामां जलक्रीडा तेम कमलक्रीडन ए करेलुं तदनन्तर कुंजमांथी नीकलता पुष्पावलि-रचित केलि शयन थी उद्भवेल श्रमजलथी भीजाये मुख-पद्मवाला प्रिय थी अर्पायेल कमल थी क्रीडा करता, राधिका साथे जवाना अनेक मार्गो स्फूटी भूत होवाथी ज्यांसुधी मार्ग-विभेदन थाय त्यांसुधी प्रियाने अर्पेल मालाथी उर-स्थलने दीपावता साथे रहेल मंद गति वाला, क्षणे क्षणे आश्लेशादि लीलाओ करता, घूर्णायमान नयन सुपमावलोकनभांज परायण क्यारेक आगल क्यारेक पाछल अने क्यारेक बाहुबंधथी गहन लतच्छादित कुंजमार्गमां यथा सांकर्यथी जया लाग्या. मार्ग-संधि आवता परस्पर द्रष्टिथीज जइश एवी अनुज्ञा मेलवी अनोन्य गुंजामणि हारोनो विनिमय करी पधारता. श्रीमद्राधा कृष्णमां श्रीमहाप्रभुए जे माधुर्य अनुभव्युं तेनुं 'गुंजा मधुरा' थी 'शिष्टं मधुरम्' पर्यन्त श्रीमधुराष्टकमां वर्णन कर्युं छे.

एवी अनेक लीलाओ कर्या पछी श्रीकृष्ण गोप समाजमां प्रवेशे छे. गेह गमनांतर गोप वधूओ सायकाले प्रियना आगमननी प्रतिक्षा करती गोष्ठमां रही हती. गोपसमाज स्थित गोप-गीत-कीर्ति, वेणुवादन परायण गोरजच्छुरित कुन्तल प्रभुए व्रजस्थोनां तथा गायोनां दिन तापनो नाश करवा उद्यत थयेला प्रभु विचित्र 'यष्टि' गृहणथी तथा गायोने वर्णादि भेदे करेला आह्वान थी स्वसमीपे दर्शनार्थं आवेला विचित्र वसनाभूषिता श्रीगोपीओने सर्वगोचर कटाक्षस्पर्शादिना संकेत थी प्रमुदित करता हता. आवा निखिल माधुर्य-रस-पूर्ण श्रीकृष्णचन्द्रने श्रीमहाप्रभुए दर्श्या. अने तेवी माधुर्य भरी सृष्टि मां मधुरप भर्या जे कई

अनुभवो पास थया तेनु वर्णन 'गोपा मधुरा' थी 'सृष्टिर्मधुरा' पर्यन्त श्रीमहाप्रभु ए कयुं छे. मधुराष्टकमां मुख्यत्वे श्रीकृष्णनां सर्वांगनुं वर्णन होइ श्रीमत्प्रभुचरणे विवरणमां श्रीमद्राधाना वर्णननो ध्वनि मुख्यत्वे विरच्यो छे. एमनो श्रीमद्राधा अने श्रीकृष्ण ए उभयनी लीलाओ ललित-मधुरप भरी अने अकथनीय छे.

श्रीमहाप्रभु वर्णन करता करता माधुर्य-रस महाब्धिमां निमग्न थई जतां श्रीमधुराष्टकनां अन्ते 'दलितं मधुरम्-फलितं मधुरम्— प्रतिपादन करे छे. श्रीनन्दगृहना क्याराओं उगेला श्रीमदगोपीजनोना राग-सिंचन थी संवृद्ध थयेलां शृंगार कल्पद्रुमना बधा दलित फलतादि माधुर्यनी पराकाष्ठा छे.

श्रीरघुनाथजी, श्रीबालकृष्णजी अने श्रीगोकुलनाथजी ए पण श्रीमधुराष्टक पर स्वतंत्र विवृत्ति—विवरणो लख्यां छे. श्रीबालकृष्णजी अने श्रीगोकुलनाथजीनी विवृत्तिओ भावमां गंभीर छे उपक्रम तथा व्याख्यामां प्रत्येक विवृत्तिओमां विलक्षणता ईखाई छे. श्रीमत्प्रभु-चरणनी विवृत्ति तो भावप्रचुर छे. श्रीघनश्यामजीनुं टिप्पण पण ते उपर सारो प्रकाश पाडे छे. मधुराष्टकना अन्य संस्करणमां श्रीमत्प्रभु-चरणनी विवृत्तिना पाठ भेदो प्राचीन ग्रन्थोथी प्राप्त करी उमेरी देवामां आवे तो अभ्यासकोने घणी सरलता पडे. महानुभावी श्रीमदहरिराय चरण कृत 'मधुराष्टक तात्पर्य' मां तो वस्तुतः माधुर्य निर्झरे छे. में श्रीमत्प्रभुचरणनी:विवृतिनो आशय यथामति उपर उल्लेख्यो छे. परंतु निगूढ ग्रन्थनी निगूढ विवृत्तिनी निगूढता थी संभव छे के कोई स्थले स्खलन थई गयुं होय तो तेनी विद्वद् वृन्द अवश्य उपेक्षा करशे. एवो अभिलाष सेवी विरमुं छुं ।

राधाधर सुधापातु. किमन्यन्मधुरायितम् ।
यन्निवेद्यं तदप्येतन्, नाम संबंध तो भवेन् ॥

(कार्तिक कृष्ण ६ वि० सं० १९८८ गुरुवार ता० ३.१२.१९३१)

<u>आवश्यक नोंध</u> श्रीपुष्टिमार्गीय युवक परिषद—मुंबईना प्रणेता. पोषक, उत्तेजक अने मार्ग दर्शक. प्रातःस्मरणीय. श्रीमद्वल्लभ-कुल कौस्तुभ नि० ली पूज्यपाद गो० श्री ६ श्रीव्रजनाथलालजी महाराज श्री ए त्रीस वर्ष पूर्वे लखेल "श्रीमधुराष्टकनुं माधुर्य" लेख श्रीमधुराष्टक नी संस्कृत छ टीकाओ तथा व्रजभाषानुवाद सहित ना प्रकाशनमां प्रकट करी आनंदानुभव करीए छीए अने पूज्यपाद महाराज श्री ए परिषदनी प्रगति मां प्रेरणाना पीयूष पाइ जे सुन्दर फालो आप्यो हतो तेनुं स्मरण करी कृतज्ञता व्यक्त करीए छीए.

निवेदक : प्रकाशक

। श्रीकृष्णायनमः ।

॥ श्रीगोपीजनवल्लभायनमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

# अथ श्रीमधुराष्टकम्

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम्
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥१॥
वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपते रखिलं मधुरम् ॥२॥
वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपते रखिलं मधुरम् ॥३॥
गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ॥४॥
करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम् ।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥५॥
गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ॥६॥
गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम् ।
दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ॥७॥
गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥८॥

। इति श्रीमद्वल्लभाचार्यचरण प्रकटितं श्रीमधुराष्टकं संपूर्णम् ।

श्रीकृष्णाय नमः ।
श्रीगोपीजनवल्लभाय नमः ।
श्रीमदाचार्यचरणकमलेभ्यो नमः ।

# मधुराष्टकम् ।

## श्रीमद्विट्ठलेश्वरविरचितविवृतिसमेतम् ।

नमामि श्रीमदाचार्यान् निगूढहृदयान् प्रभून् ।
भक्तेच्छापूरकान् सर्वाज्ञातलीलातिमोहनान्[1] ॥ १ ॥

**अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।**
**हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ १ ॥**

श्रीमत्प्रभुचरणाः प्रियव्रजस्थितित्वेन दैवोद्धारप्रयत्नात्मत्वेन च स्वान्तर्निगूढान् अलौकिकानुभावान् स्वसर्वस्वान् स्वीयानामनुग्रहार्थं[2] प्रकटीकृतवन्तः **अधर**मित्यादिना। **मधुराधिपते**रिति। मधुरा श्रीमद्राधा अधरसुधा च तस्या अधिपतेरिति भावः, एतदर्थमेव प्राकट्यात् ।

---

## श्रीघनश्यामविरचितमधुराष्टकविवृतिटिप्पणी ।

**मधुराधिपते**रित्यस्य विवृतौ **श्रीमद्राधाधरसुधे**ति । 'राधाधर-सुधापातुः किमन्यन्मधुरायितम् । यन्निवेद्यं तदप्येतन्नामसम्बन्धतो भवे'-दित्यत्र निरूपितं सुधामाधुर्यमित्यर्थः । **एतदर्थ**मिति । एतदर्थमित्यर्थः, सुधाग्रहणार्थमेव प्राकट्यात् । तत्रापि लोभगतत्वेन तद्ग्रहणेन तदेकपरता भवति । तत्रापि सुधा यथा देवभावोद्बोधिका तथा इयं एतद्रसभावोद्बोधिका । तत्रापि राधा सिद्धिरूपा, तद्गतत्वेन ग्रहणे सर्वसिद्धिसम्पादिकेत्यर्थः ।

---

१ मोहितानिति पाठः । २ स्वीयानामर्थ इति पाठः ।

एतादृशमाधुर्यं नान्यत्र, लीलासहितस्यैव सर्वस्वत्वात् । रसावेशजनितमर्यादारहितयोः कचिल्लताकुञ्जे गुञ्जन्मधुव्रते सुवर्णयूथिकादिकुसुमरचितकेलिशयने प्रियसख्यानीतविविधताम्बूलाङ्गरागपुष्पहारयावकाञ्जनपात्रसिन्दूरकञ्चुक्यादिसहितमणिमुक्ताहारादिसम्पन्नान्तरे मधुरकलमुरलिकानादानुगमञ्जीरस्वने लतान्तरे(ण) सखीनिरीक्षिते परस्परलावण्यविभवयोः[1] स्मारं स्मारं माधुर्यमनुवर्णयन्ति। तत्रापि[2] प्रियायाः त्रपार्धनतेक्षणकटाक्षनिरीक्षिते रदनच्छददानसुषमामधुरे गण्डद्वये गाढचुम्बनादिना

---

एतादृशत्वं नान्यत्र । **लीले**ति । अनायासेन हर्षात् क्रियमाणा चेष्टा लीलोच्यते । लीलासहितो भगवान्, श्रीमदाचार्याणां सर्वस्वत्वादिति निरूपितम् । **रसावेशे**ति। 'ततश्च कृष्णोपवने जलस्थले'त्यत्र निरूपितं मर्यादाराहित्यमित्यर्थः। कीदृशे वने ? गुञ्जन्मधुव्रते । निरन्तरं लीलास्थानत्वात् । तत्र-भगवत्सम्बन्धिविविधसुगन्धमालापुष्पतल्पश्रमाम्भःसङ्क्रान्तत्वेन मोदलम्पटा मधुपा लीलोद्बोधकास्ते झङ्कारं कुर्वन्ति । तेन शब्देन कुञ्जज्ञानं सम्भवति । अत्र कुञ्जेऽस्तीति प्रियसखीवत् कुञ्जप्रदेशज्ञापका इत्यर्थः । **विविधे**ति । एतादृशानां पदार्थानामानयनं रतान्ते पुनः शृङ्गारार्थम् । अथवा विपरीते भगवति योजनार्थं पूर्वमानीतमिति लक्ष्यते । **मधुरकले**ति । भगवान् मध्यमुरलीनादं करोति येन स्वामिन्यागमने चरणमञ्जीरस्वनो मुरलीनादोपि अनुगतो भवति, तेन कस्यापि ज्ञानं न सम्भवति । एतदर्थमुक्तं **लतान्तरे**ति । महारसे सन्निधौ स्थातुमशक्तत्वात् । रतिसमये स्वस्वामिन्या जयमवलोकनार्थं स्वस्य सन्तोषार्थं लतान्तरे स्थित्वा अवलोकयन्तीत्यर्थः । **त्रपे**ति । पूर्णत्रपया नाऽनङ्गोत्पत्तिः । त्रपागमस्तु पूर्णे रसे भवति । अत्र निरीक्षणे [3]**त्रपार्द्रत्वेन** प्रेमाप्तसंरम्भनिरीक्षणेन अनङ्गोत्पत्तिं करोतीत्यर्थः । नितरामीक्षणकथनेन रदनच्छददानसुषमां प्रियस्य दर्शयती-

---

१ विभावयोरिति पाठः । २ तत्रेति पाठः । ३ त्रपार्द्रेति पाठो मूले क्वचित्स्यात् ।

ताम्बूलादिविचित्रिते प्रियानासापुटगतमुक्ताफलपीडनेन अरुणतराङ्किते अनतिसूक्ष्ममुक्ताफलावलीशोभितकर्णालङ्कारसङ्गतहरिन्मणिमुक्तारुणमणिशृङ्खलितालकावलीराजिते अगरुसारकस्तूरिकाकाश्मीरमणिरचितबिन्दुभाले कुपितयेव रचितभ्रूभङ्गे विमर्दव्यस्तरचने अन्योन्यगण्डद्वयसङ्गे रतिश्रमशीकरार्द्रप्रियगण्डस्थतिलकरचनाप्रकृतिशोभिते मुक्तालङ्कारभूषितसुनासापुटे वदने । किञ्च, प्रियस्य विजितबिम्बाधरे कनकसूत्रसूत्रितबृहत्सुभगामलमुक्ताफलसंशोभितश्वासादरोन्नतिनतिमन्नासापुटे त्रिभुवनविजयव्यग्रनयनपुटे कुटिलभ्रुवि दरहासप्रियस्थँविगलितामलसौरभलुब्धमधुलिहि मल्लिकादियुतमेचककेशपाशे किञ्चिँदुच्चिबुके हीरकादिमणियुतालकावलीविराजिते प्रतिक्षणप्रवृद्धप्रेमप्रोद्यत्सीत्कारे मकरकुण्डलमण्डितगण्डमण्डले कदाचित् चकितनयने वदने । पुनः प्रियाया हृदये गुञ्जामणिहारवति श्यामकञ्चुकीपिहिते मृगमदपत्राङ्कितकुङ्कुमरचने लावण्य-

---

त्यभिप्रायेणोक्तं **विमर्दे**ति । विविधबन्धलीलया व्यस्ता श्रीअङ्गरचना यस्याः । एतेन महासौरतं द्योतितम् । अत एवाग्रे अन्योन्यगण्डद्वयसङ्ग इत्यत्र सुरतान्तावस्था निरूपिता । **मुक्तालङ्कारे**ति । मुक्तानामलं पूर्णत्वं जातं, [1]**मुक्ता**फलत्वेन महारसमयत्वादित्यर्थः । **प्रियस्ये**ति । बिम्बफलस्य विशेषेण जितत्वेन अधरगतरागसाम्येन जितबिम्बत्वम् । परमत्र सुधाधिक्येन विजितमित्यर्थः । **कदाचि**दिति । कदाचिदनागमनदशायां सिद्धिरूपत्वात् [2]**स्थाने** कृते पत्रादीनां चकितनयने भवतः, यथा 'पतति पतत्रे विचलितपत्रे शङ्कितभवदुपयान'मिति तदर्थम् । **गुञ्जामणी**ति । महारसे प्रसन्नेन प्राणप्रियेण स्वहृदिस्था गुञ्जामाला दत्ता तां परिधाय

---

१ ताम्बूलादिनेति पाठः । २ श्वासदरेति पाठः । ३ प्रियस्थेति नास्ति । ४ उज्ज्वलेति पाठः । ५ गुञ्जेति च पाठः । ६ ध्याने इति वा पाठः ।

सरसि संश्लिष्टोच्चकुचे रतिश्रमशीकरप्रोञ्छनार्द्रविचित्रवसनाञ्चलगोपिते कनकयूथिकाकुसुममाल्यशोभिते अतिगौरे विविधमहामणिजटितकनकमुद्रिकालङ्कृतप्रियाङ्गुलिसन्दर्शितविपाटितकञ्चुक्यवकाशे। किञ्च, कण्ठाभरणभूषिते तदनुमुक्ताफलैयष्टिपरम्पराविराजिते पीनोन्नते प्रियालिङ्गनविमर्दितस्रजि हाटकमणिजटितमुरलिकाशोभितदक्षिणकरे क्षणे क्षणे समाश्लिष्टप्राणप्रिये शिथिलोत्तरीये प्रियहृदये । किञ्च, अवसरविशेषे तादृशसखीविज्ञापिते लतागेहान्तरे विकचविविधरुचिरप्रसूनप्रोद्भूतगन्धलोलुपमधुपे धीरपवने पिकादिसमाकुले रचिततल्पे रन्तुकामयोः पूर्वोक्तविधयोः मार्गस्थविचित्रपुष्पपक्षिसख्यादिषु निहितापाङ्गयोः मध्येमार्गं कृतविविधचुम्बनाश्लेषादिरसयोः रचितपुष्पगुच्छोत्क्षेपणयोः गजेन्द्रलीलयोः अंसासक्तबाह्वोः उपात्तलीलाकमलयोः चर्वितताम्बूलयोः कृतकलगीतयोः वेत्रनिवारितमृदुलतयोः वागगोचरसुषमामधुरयोः गमने या माधुर्यानुभवो जातः तमेव ध्यायं ध्यायमनुवर्णयन्ति **गमनं मधुरमित्यनेन**[3] । निरवधित्वेनैवंविधैकैकस्य रसाकरत्वेन तन्निमग्नत्वेन च वर्णनाशक्तिं प्रतिपादयन्ति **अखिलमित्यनेन** । किञ्च । **अखिलं मधुरमित्यनेन** कदाचित् विपरीतशृङ्गारेपि पूर्णरसानुभवस्तादृश एवेति सूचितम् ॥ १ ॥

तादृशानेव समयविशेषोत्पन्नान् स्वप्राणरूपानाहुर्द्वितीयेन **वचन-**

---

स्थितामित्यर्थः । **अवसरे**ति । लीलानन्तरमुभयत्र पुनः शृङ्गारादिकं विधाय हस्ते मुरलिकां दत्वा आदर्शादिषु परस्परप्रतिबिम्बदर्शनेन अत्यार्तिभरं दृष्ट्वा तादृशात्यन्तरङ्गसखीभिर्विज्ञापितम् । अन्यत् कुञ्जेषु

---

१ फलेति नास्ति । २ नतेति पाठः । ३ इत्यन्तेनेति पाठः ।

मित्यादिना ।

**वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।**
**चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥२॥**

श्रीमत्प्रभुप्राणप्रियाया मिथ्याकुपिताया जितपिकध्वनिकूजितायाः कुटिलभ्रूवल्ल्याः सुशोणतराधरायाः अनङ्गातिमरदप्तस्नेहार्द्रापाङ्गनिरीक्षित-प्रियाननायाः[1] प्रियकृतरभसवलितस्रंसदुकूलनियन्त्रणायाः प्रियाचरितोरो-जालभनायाः छलकृतपाणिपिहितसर्वाङ्गचुम्बनामोदपुलकितप्रतीकायाः कपोलाञ्चलव्यवहितवचनरचनायाः सस्मितायाः अङ्गुष्ठाभरणप्रतिबि-म्बितश्रीमत्प्राणप्रियमुखकमलादिसन्निधिभ्रमेण रसावेशे पूर्वं मयैव चुम्बनं कर्तव्यमिति कृताभरणचुम्बनायाः विपरीते वचनादौ रसभ्रमितायाः केलि-शयने मुग्धभावाच्चञ्चलितायाः वचनादिकं मधुराधिपतिसम्बन्धि सर्वं मधुरमिति भावः । अखिलेत्यस्यार्थः पूर्ववद् भावनीयः ॥ २ ॥

**वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ ।**
**नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ ३ ॥**

अतःपरं कदाचित् प्रभुर्विविधकुसुमितफलितलताद्रुमनिकुञ्जपुञ्जस-मृद्धगोवर्धनाद्रिशिखरस्थितो गोचारणपरायणोऽस्ति । गोरसविक्रयादि-व्याजेन प्रियार्थं विविधवस्तूनि गृहीत्वा प्रियसखिकथितं 'वेणुरवं शृणु किमाकुला गच्छसी'त्याकर्ण्य सहचराज्ञातस्वागमनसूचकं कालिन्दीतट-प्रदेशं स्थितरसनिकुञ्जसूचकं रसात्मकं **वेणुरवं** श्रुत्वा तत्र गताभिः

---

गन्तव्यम् । तत्र च लीला कर्तव्येति विज्ञापितामित्यर्थः । **गोचा-रण**-इति । वयस्यानां बुद्धिस्तु गवामवलोकनार्थं प्रभुः गिरिशिखरे स्थितः । प्रभुस्तु स्वप्राणप्रियाणां दूरात् सौन्दर्यगतिविलासार्तिभरविचित्रव-

---

१ प्रियाननश्रियाः इति पाठः ।

प्रियाश्लिष्टाभिः श्रमजलार्द्रकुचकुङ्कुमाङ्कितस्वोत्तरीयविहितालकस्थगोरेणु-प्रोञ्छनाभिलाषाभिः वेणौ रेणौ च प्रियपाणिस्पर्शपुलकितप्रतीकाभिः पूर्वचितैविविधकुसुमविनिर्मितशयनोपविष्टस्य चरणसंवाहनपरायणाभिः मत्तेभगतिभिस्तदेकमानसाभिर्निर्गतं तदा दूराद् दृष्ट्वा प्रतीक्षन् शिखरादवरुह्य रसात्मकं नृत्यं कुर्वन् स्वानुरागभरं दर्शयन् समागतस्य आनन्दाब्धिनिमग्नाभिर्वेण्वादिषु समनुसरसं ध्यायं ध्यायं अनुवर्णितं वेणुरित्यादिना । मधुराधिपतेरित्यादि पूर्ववत् ॥ ३ ॥

**गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।**
**रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ ४ ॥**

तादृशरसनिकुञ्जस्थल एव कदाचित् प्रियेण समं रसपरवशाभि-**र्गीतम्** । किञ्च, परस्परं रसावेशेन यदधरसुधारसं **पीतं**, प्रियानीतवि-

---

स्त्राभरणचकितावलोकनाद्यवलोकनार्थं गिरिशिखरे स्थित इत्यर्थः । **तदेक-**इति । भगवत्येव मनो यासाम् । कुत्र मिलिष्यति ? कथं मिलिष्यति ? कुञ्जे वा गोपसमाजे वा गोधने वा गोवर्धने वा कुत्र मिलिष्यतीति । **तदेकमानसाभिः । किमाकुले**ति । देहानुसन्धानरहिता मार्गानुसन्धान-रहितेत्यर्थः । **प्रदेशमि**ति । वेणुनादेन सूचितकालिन्दीतटप्रदेशमित्यर्थः । **वेणुरव**मिति । वेणुषु त्रिविधं स्वरं करोति । सङ्केतरूपं निकटनिकुञ्जसूचकं मन्दस्वरम् । किञ्चिद्दूरनिकुञ्जसूचक मध्यस्वरम् । दूरनिकुञ्जसूचकं तारस्वरम् । अन्यथा वेणुनादे गानं कृत्वा सङ्केतं यदि सूचयति तदा वयस्यादीनां ज्ञानं भवति । तस्मान्नादभेदेन रसात्मकं सूचयति यथा कोऽपि न जानातीत्यर्थः । **रसात्मक**मिति । यथा मयूरो मयूरीं दृष्ट्वा रसाविष्टो भूत्वा सर्वाङ्गतरस एकत्रकरणार्थं तासां यथेप्सि-

---

१ रचितेति पाठः ।

विधश्रृतदुग्धमोदकादि स्वाभिलाषसूचकं **भुक्तं** तादृशस्वाभिलाषसूचकश्रृतदुग्धमोदकाद्यङ्गीकृत्यानन्तरं कुसुमशयने तत्तदभिलाषं **शयनं** विधाय पूरितवान् । रसावेशजनितमर्यादाराहित्येन क्रीडने स्वामिन्यादिकृतरूपमङ्गीकृतवान् । तद्रीत्याऽभिलाषपूरणानन्तरं व्यस्तश्रृङ्गारे **तिलका**दिरचनां श्रमार्द्रतया उभयत्राङ्कितां वदनारविन्दयोरनुभूतां प्रदर्शितवान् । तमानन्दविशेषं स्मारं स्मारमनुवर्णयन्ति **गीत**मित्यादिना । **मधुराधिपते**रित्यादि पूर्ववत् ॥ ४ ॥

**करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम् ।**
**वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥५॥**

अतःपरं सदा मनसि भाविते‍ऽह्नि विहारेच्छया निर्गतानां समुद्ग्रथितमालतीकुरबकादिकुसुमपरिमलोन्मदभ्रमरयूथाकुलकेशपाशानां स्मितविकाशविभ्रमगलल्लोवण्याननानां हीरकादिमणिगणरचितमृगमदादितिर्यग्रेखैशोभितभालबिन्दूनां नासापुटाग्रगतोदारलोलमुक्तानां समाश्लिष्टोरोजेषु तैरलितहाराणां विचित्रवसनान्तरशोभिताखिलाकल्पानां अलक्तका-

तरसदानार्थं नृत्यति, तथा नृत्यं प्रभुः करोतीत्यर्थः । **स्वाभिलाषे**ति । स्वस्य योऽभिलाष उरोजादिस्पर्शानन्दरूपः तत्स्पर्शेन तत्तत्स्पर्श इव मन्यमानः सन् भुक्तवानित्यर्थः । **तत्तदभिलाष**मिति । पूर्वसञ्चितमनोरथविविधबन्धविशेषजनितरसविशेषदानपूर्वकं शयनमित्यर्थः । **तत्तदभिलाष**मिति । **स्वामिन्यादी**ति । मर्यादाराहित्यरमणे तिलकवस्त्रभूषणादीनां व्यत्यासो भवति । स पुनः कृत इत्यर्थः । अथवा मर्यादाराहित्यं तु विपरीतसुरते भवति । तदा स्वामिन्या कृतरूपमङ्गीकृतवानित्यर्थः ।

**इति श्रीगोस्वामिसुतश्रीघनश्यामविरचिता मधुराष्टकटिप्पणी सम्पूर्णा ॥**

१ लावण्यानामिति पाठः । २ श्रीवेति पाठः । ३ तरलतरेति पाठः ।

ऽङ्किताङ्गुलिविराजितविविधनूपुराणां मूर्ध्न्यलोलग्रीवं दधिकलशिकां वह-न्तीनां व्रजाधिपसुतो वयस्यै रोधं सम्पाद्य समीपागतश्चकितनयनः प्रिया-हृतचेताः वदनेन्दुसुषमामोहिताशेषगोपवधूजनो वक्रोक्तिकपोलोरोजादि-स्पर्शाविर्भावितमनोभवः दूरगगवाद्यवेक्षणापदेशापसारिताशेषवयस्यवृन्दः उपात्तोत्तमाङ्गस्थितदधिभाजनः करैकगृहीतविविधमणिमयकाञ्चीपट्टप्रसूनः विविधरुचिरप्रसूनप्रोद्भूतामलपरिमलोन्मत्तमधुपलतागेहानीतप्रियाजनो यद् यत् कृतवान् नीतवान् प्रेमाब्धितरणं सम्पादितवान् रमणं च मर्यादा-रहितं, वमितं हारादीनां, शमितं क्षुद्रघण्टिकादीनां, तत्सामयिकं ध्यायं ध्यायं अनुवर्णयन्ति करणमित्यादिना । मधुराधिपतेरित्यादि पूर्ववत् ॥ ५ ॥

**गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।**
**सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ॥६॥**
**गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम् ।**
**दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ ७ ॥**

एवं कदाचित् तरणितनयाकूले बकुलाम्रकदम्बादिद्रुमाकुले धीर-गन्धवाहे, केलिहिते रहसि, स्नानादिव्याजेन समागतया श्रीमत्प्रभुप्राण-प्रियया मकरकुण्डलमण्डितगण्डमण्डलप्रभोद्योतिताखिलभुवनः कमलदल-लोचनः अधरार्पितवेणुः गुञ्जामणिमुक्ताहारादिराजितोरःस्थलः अवलो-कितप्रियः निखिलमनोरथरूपागतः आश्लेषादिलीलां कृतवान्। यमुनायां सलिलकमलादीनां च क्रीडां कृतवान्। ततो निर्गमने सति निकुञ्जे पुष्पावलीरचितशयनकेलिजनितश्रमाम्भःसंक्रान्ताननकमलया प्रियदत्त-कमलकृतलीलया प्रियया, वेनार्थं मार्गाः बहवः स्फुटिता इति प्रियेण

---

१ रदने इति पाठः । २ हासादीनामिति पाठः । ३ गमनार्थमिति पाठः ।

सह यावत्पर्यन्तं मार्गविभेदो भवति तावत्पर्यन्तं गेहार्थं प्रचलितया प्रियार्पितस्वोरःस्थहारया सङ्गतस्य मन्थरगतेः क्षणं क्षणं कृताश्लेषस्य घूर्णायमाननयनस्य मुषमावलोकनैकपरायणस्य कदाचिद् पश्चात् बाहुबन्धेन कदाचिदग्रतो गहने लतापिहितोदरे यथामार्गसौकर्यं भवति। एवं मार्गसन्धिस्थितयोः परस्परदृष्टे यामीत्याज्ञां गृहीत्वा गतयोः कृतान्योन्यगुञ्जामालेत्यादिहारविनिमययोः कृतो यो माधुर्यानुभवो जातः तमेव स्मारं स्मारमनुवर्णयन्ति **गुञ्जे**त्यादिना शिष्टं मधुरमित्यन्तेन। **मधुरापते**रित्यादि पूर्ववत् ॥ ६-७ ॥

**गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।**
**दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥८॥**

तदनन्तरं भगवान् गोपसमाजं सम्प्राप्तः, एतासां गेहागमनानन्तरं सायं प्रियागमनं प्रतीक्षन्त्यो गोष्ठादिषु स्थिताः। भगवानपि गोपसमाजस्थः तैर्गीतकीर्तिर्वेणुवादनपरायणो गोरजश्छुरितकुन्तलो व्रजस्थानां गवां च दिनतापं मोचयन् गोष्ठप्रवेशं करोति। ततो गोदोहने सर्वरसग्रहणार्थं उद्यतस्तदा दर्शनार्थं गतानां विचित्रवसनवतीनां विचित्रसूक्ष्मयष्टिग्रहणेन वर्णादिभेदेन गवाह्वानेन स्वसमीपागमनज्ञापकेन समागतानां सर्वागोचरकटाक्षस्पर्शादिसङ्केतादिकृतामोदो निखिलरसपूर्णो दृष्टः, तस्मिन् सृष्टौ योऽनुभवो जातस्तमेवानुवर्णयन्ति **गोपे**त्यादि **सृष्टि**रित्यन्तेन। अतःपरं वक्तुमशक्यत्वं तन्निमग्नत्वेन प्रतिपादयन्ति **दलित**मिति। नन्दगेहालवालोदितस्य श्रीमद्गोपीजनरागसेकसंवृद्धकल्पवृक्षस्य दलितफलितादिकं सर्वं मधुरिमासीमा इति ॥ ८ ॥

**॥ इति श्रीविट्ठलेश्वरविरचिता मधुराष्टकविवृतिः सम्पूर्णा ॥**

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

# मधुराष्टकम्

## श्रीमद्बालकृष्णविरचितविवरणसमेतम् ।

प्रतिक्षणनवोल्लसत्स्मरशतातिलावण्यरुग्-
[1]व्रजेशफलमाधुरीरससुधाब्धिलीलोर्मिभिः ॥
सदा मधुरमूर्तयो विविधभावमुग्धेक्षणाः
स्फुरन्तु हृदि मे श्रिया ललितव[2]ल्लवस्वामिनः ॥१॥

शरणागतकरुणाभरकरणानिशतत्परान् निजाचार्यान् ।
व्रजवल्लवजनवल्लभवल्लभनाम्नः प्रभून् नौमि ॥२॥

अथ 'श्रावणस्यामले पक्ष' इति श्लोके श्रीभगवद्दर्शनस्योक्तत्वात् तस्मिन् समये साक्षाद् भगवान् कोटिकन्दर्पाधिकलावण्यगुणलीलाविशिष्टो-द्बुद्धरसात्मकस्वरूपेण प्रकटीभूय श्रीमदाचार्याणां देहप्राणेन्द्रियान्तःकरण-धर्मादि सर्वं साक्षादलौकिकरसात्मकवचनामृतपोषणेन स्वविषयीकृत्य बहिः-साक्षात्स्वरूपानुभवं कारितवान्, पश्चात् संपूर्णरसदानार्थं तिरोभूय अन्तर्देह-प्राणेन्द्रियादिरूपः सन्नन्तरेव च निखिललीलारसानुभवं कारितवान्, अत एव 'स्फूर्जद्रासादिलीलामृतजलधिभराक्रान्तसर्वं' इत्युक्तं श्रीमत्प्रभुचरणैः। सर्वोत्तमेपि 'तत्कथाक्षिप्तचित्तस्तद्विस्मृतान्यो व्रजप्रिय' इत्याद्युक्तम् । तदा पुनर्विप्रयोगदशानुभवे तद् विना स्थातुमशक्तौ गुणालंम्बनेनैव कालनिर्वाह इति श्रीमदाचार्यचरणा अहर्निशं उद्दीपनालम्बनविभावादि रसान्तःपाति-सकलसामग्रीसम्पन्नं तत्तत्सामयिकलीलागुणविशिष्टमुद्बुद्धरसात्मकं स्वरूपं

---

१ व्रजेशकलमाधुरीति पाठः । २ वल्लभेति पाठः ।

यथानुभूतं तत् तथा वर्णयन्ति **अधरं मधुर**मित्यादिभिः ।

**अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।**
**हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥१॥**

अहो रूपं तु किं वर्णनीयं मधुराधिपतेरखिलमेव मधुरं यावन्तः तत्पदार्थास्ते मधुराः । अथवा रसाः वीरादयः तेषामपि शृङ्गाररसान्तःपातित्वेन मधुरत्वाद् रसत्वं, अन्यथा तत्त्वमेव नास्ति इति रसशास्त्रसिद्धान्तात् । तादृशानां अधिपतिः शृङ्गाररसः, तद्रूपस्य भगवतो यद्यपि अखिलमेव मधुरं, यथा राज्ञः परिधेयानि आभरणानि सुवर्णमयानि उपकरणानि अपि तथा, तथापि यस्य यादृग् रूपमाधुर्यं यस्यां यस्यां लीलायां समनुभूतं विप्रयोगे तत्तत्स्मरणे तत्तन्माधुर्यस्य स्वरूपतो विशेषेण वक्तुमशक्यत्वात् तत्तन्नामनिरूपणपूर्वकं पृथक्त्वेन तत्तन्मधुरमुच्यते । तत्र प्रथमं रसात्मकवचनामृतप्रवेशेन स्वरूपानुभवो जातः, तस्याधरसंबन्धित्वात् पूर्वं तदनुभव एव अभूत, इति वर्णनेपि प्रथमं **तदधरं मधुर**मित्युक्तम् । पश्चात् तत्सुधाप्रवेशे सम्पूर्णतद्वदनमाधुर्यलावण्यस्यानुभवो जात इति **वदनं मधुर**मित्युक्तम् । यथा 'बर्हापीडे'तिश्लोकोक्तसुधाप्रवेशानन्तर'मक्षण्वतां फलमिद'मित्युक्तम् । तदनु वदनमाधुर्यानुभवे कोटिकन्दर्पलावण्यरससंव[1]लितापाङ्गरङ्गतरङ्गविलासानुभवस्य सम्पन्नत्वात् **नयनं मधुर**मित्युक्तम् । तदेवोक्तं 'मनुरक्तकटाक्षमोक्ष'मिति, तत्रैव 'मदविघूर्णितलोचन' इत्यादि च । एतेन विचित्रभावललितत्वं[2] लोचनयोरुक्तम् । ततो विगाढरसे हासरसस्याप्यनुभवात् **हसितं मधुर**मित्युक्तम् । नयनमाधुर्यानन्तरं हसितस्य निरूपणात् नयनयोरपि स्मेरत्वं सूच्यते । ततो अधरवदनमाधुर्यानुभवतो भगवतो हार्दमपि रसपरवशत्वेन स्वाधीनत्वात् अतिमधुरं ज्ञातमिति तथोक्तं **हृदयं मधुर**मिति । एतेन यथा स्वस्य भगवति परमा प्रीतिः, तथा भगवतोपि स्वस्मिन् अनुभूतेति सूचितम् । किञ्च, हृदयपदेन वक्षोपि व्यज्यते । तेन भगवतो हृदयमपि मधुरतरोल्लसदभिनवकैशोरवयःक्रमेण किञ्चित् उच्छूनं सुललितविलासं प्रकटीकरोति, इति तादृशमालि-

---

१ विविधापाङ्गतरङ्ग इति पाठः । २ वलितत्वमिति पाठः ।

श्रवणादौ स्पर्शादौ वीक्षणेपि प्रियाणां महारसानुभावकत्वेन[1] परमानन्ददायकं इति तत्स्मृत्वा तन्माधुर्यमुक्तं **हृदयं मधुर**मिति । ततो **रसान्ते** अलसवलित-भावादिसहितं गमनं, रसादौ तु विलासलीलापूर्वकं तद्भवति इति तदुभयानुभवात् **गमनं मधुर**मित्युक्तम् । एवं पृथक्त्वेन तत्तन्माधुर्यनिरूपणे चित्तं **महारसाब्धौ** लीनमासीत् । क्षणानन्तरं उद्बोधेन पुनः पूर्वरसावेशात् तादृशस्याखिलमेव मधुरमिति अनिर्वचनीयत्वेन अन्ते सर्वत्र **मधुराधिपतेरखिलं मधुर**मित्युक्तम् । अत्र स्मरामि इति क्रियाध्याहारः सर्वत्र कर्तव्यः ॥ १ ॥

**वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।**
**चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥२॥**

ततः पुनरेकान्ते परमहृद्यानि नेपथ्यादिस्वनरूपाणि[2] वन्धादिविशेष-ज्ञापकानि परिहासकारकाणि यानि वचनानि 'रहसि संविदो या हृदि-स्पृशः' इत्याद्युक्तप्रकारकाणि भगवतोक्तानि तेषां माधुर्यस्यानुभूतत्वात् **वचनं मधुर**मुक्तम् । एतस्यैव माधुर्याब्धौ मनसो मग्नत्वात् अन्येषां वक्तुमशक्यत्वेन एकवचनमुक्तम् । वचने पश्चात् तद्वचनोक्तवन्धादिलीलायां तन्माधुर्यमनुभूतं भवति इति **चरितं मधुर**मित्युक्तम् । ततस्तादृश-तच्चरित्राचरणे उद्बुद्धरसात्मकस्य भगवत आच्छादकशक्तिरूपत्वेन वसनस्य रसोद्दीपकत्वाद् अवलोकने पुनः तन्माधुर्यमनुभूतं भवतीति **वसनं मधुर-**मित्युक्तम् । अत एव 'बर्हापीडे'त्यस्य विवरणे यत्र वसनाकृतिरपि न सम्यगवलोकिता तत्र तदाच्छन्नं रसं कथमुद्घाटयेयुरित्युक्तम् । रसो हि गुप्त एव रसत्वमापद्येत' इत्युक्त्या तदाच्छादकमावश्यकम् । आच्छादकत्वेपि आकृतिदर्शनं रसोद्बोधकत्वात् सुतरां मधुरं भवतीति तथोक्तम् । ततो रसानुभवे अलसवलितादयो हावभावादयः सात्त्विकादिभावाश्च परममधुरा भवन्तीति तत् स्मृत्वा **वलितं मधुर**मित्युक्तम् । समुदितभावज्ञापनाय वलितपदम् । एते सर्वे रात्रिसम्बन्धिलीलाप्रकारा निरूपिताः । अतःपरं

---

१ भवकत्वेनेति पाठश्च । २ —रचनरूपाणीति पाठः ।

दिवासम्बन्धिलीलानां मधुरत्वं निरूपयन्ति **चलित**मित्यादिभिः । अयं भावः । प्रातर्यदा गोचारणार्थमुद्यतस्तदा वनलीलालोकनाय[1] अन्तरङ्गवयस्यैः सह नर्मपरिहासादिकं कुर्वन् अवलोकनार्थं बहिःस्थितानां प्रियाणां अति-हृदयङ्गमं लावण्यं प्रदर्शयंश्चलति, तत्सामयिकं स्मृत्वोक्तं **चलितं मधुर**-मिति । अथवा वनादागमनसमयेपि तथैव चलतीति तथोक्तम् । तदुक्तम् 'घनरजस्वलं दर्शयन्मुहु'रिति । अग्रे पुनर्लोके विपिनभ्रमणं मधुरं न भवतीति श्रमहेतुत्वात् भगवतस्तदभावात् तदपि मधुरं निरूप्यते । तथा च वनसम्बन्धिभूम्यादितृणपर्यन्तसमस्तपदार्थानां रसात्मकचरणारविन्दमकर-न्दसम्बन्धेन लीलोपयोगिरसात्मकतां सम्पादयितुं वने भ्रमणं करोतीति चरणारविन्दस्य रसात्मकत्वात् श्रीनिकेतनत्वाच्च भ्रमणजनितरजःसम्बन्धित्वे[2] परमशोभातिशयेन मधुरत्वमेव भवति, न तु कदाचिदपि तदन्यथात्वमिति **भ्रमणमपि मधुर**मुक्तम् । एतदेवोक्तं 'तृणचरानुगं श्रीनिकेतनम्' इत्यस्य विवरणे । अथवा तत्सङ्केतादिषु स्थितानां भक्तानां मिलनार्थं तत्र तत्र भ्रमणं करोति भगवान्, तत्तु तत्तत्प्रियामिलनोत्कलिकासमाकुलविविधरस-भावात्मकमिति परमं मधुरमनुभूतं भवति, सङ्केतस्थप्रेयसीनां चरणारविन्द-संवाहनादिषु लीलायां चेति तत्स्मृत्वा **भ्रमितं मधुर**मुक्तम् । एवं भ्रम-सूचकमपि सर्वं रसात्मकस्य मधुरमिति निरूपयन्ति **मधुराधिपतेरखिलं मधुर**मिति । रसस्तु यत्र यत्र गच्छति तत्र तत्र रसत्वं सम्पाद्य मधुरत्वं सम्पादयतीति स्वस्य मधुरत्वे किं वाच्यमिति भावः । किञ्च, यथा रसस्य ग्रहणरूपत्वात् भ्रमणेपि मधुरत्वं न गच्छति, तथात्रापीति अपि सूच्यते ॥२॥

**वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ ।**
**नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ॥३॥**

अग्रे **वेणुर्मधुर** इत्युच्यते । तस्यायं भावः । सङ्केतस्थलज्ञापनार्थं वेणुनादे कृते 'कलपदैस्तनुभृत्सु सख्य' इत्युक्तत्वात् तत्र स्वनामादिश्रवणात् नादद्वारा तन्माधुर्यमपि अनुभूतं भवति । तथापि सङ्केते समागतानां

१ लीलोत्कण्ठयान्तरङ्गेति पाठः । २ सम्बन्धेपीति पाठः ।

प्रियसङ्गमे सम्पन्ने तदानन्दजनितपरमसौभाग्यशोभाभरेण विलसद्वचनानां तासां प्रियाणां प्रियसमीपवर्तिवेणुविलोकने प्रियप्रापकत्वात् तस्मिन् परमस्नेहभरेण स्वरूपतस्तन्मर्यादालोपकं माधुर्यमनुभूतं भवतीति इति **वेणुर्मधुर** इत्युक्तम् । अधरामृतसम्बन्धेन तस्य तथात्वं स्पष्टमेव । अग्रे **रेणुर्मधुर** इत्युच्यते तस्यायं भावः । गोचारणे रेणुसम्बन्धस्य आवश्यकत्वाद् अलकादिषु तस्य छुरितत्वेन यथा अलकानां कामरूपत्वेन माधुर्यं, तथा रजसो रजोगुणत्वाद् अनुरागरूपत्वेन परममाधुर्यं दृश्यते इति **रेणुर्मधुर** इत्युक्तम् । एतत्सर्वं 'तं गोरजश्छुरितकुन्तले'ति श्लोके निरूपितम् । वदनकमलसम्बन्धे रजसः परागरूपत्वान्माधुर्यं युक्तमेवेत्यपि सूचितम् । अथवा सन्ध्यायां आगमनसमये गोरेणुसङ्घाते घनीभूते इतरावलोकनाभावात् प्रियसङ्गमे च सम्पन्ने तन्मुखारविन्दकटाक्षादिरसानुभवात् स रेणुरपि परममधुरो भवति इति तथोक्तम् । एतेन अन्धकारादीनामपि लीलोपयोगित्वेन मधुरत्वमेव इति सूचितम् । एतत् स्वरूपं 'पीत्वा मुकुन्दमुखसारघे'त्यस्मिन् श्लोके 'सव्रीडहासविनयं यदपाङ्गमोक्ष'मित्यस्य विवरणे निरूपितम् । अथवा रेणुरत्र चरणारविन्दसम्बन्धी ज्ञेयः । तेन रसात्मकत्वात् लीलोपयोगिदेहसम्पादनैकस्वभावत्वाच्च लीलासम्बन्धिनीनां प्रियाणां तद्विरचितदेहवत्त्वेन तन्माधुर्यमनुभूतं भवतीति तथोक्तम् । अग्रे पुनर्वनादागमनसमये त्रिभङ्गललितस्वरूपेण वेणुं संवादयति तदा वेणुरन्ध्रेषु स्वाङ्गुलिचलने पाणेरपूर्वतरा शोभा प्रकटीभवतीति तत्स्मृत्वा **पाणिर्मधुर** इत्युक्तम् । तथैव पादयो'र्वामजान्वन्ताश्रितातिवक्रदक्षिणजानुक'मित्युक्तप्रकारेण स्थापने अनिर्वचनीयसौन्दर्यं प्रकटीभवतीति तत् स्मृत्वा **पादौ मधुरौ** इत्युक्तम् । तदेवोक्तं 'सौन्दर्यं किमपितरां प्रकटयति प्रेमवल्लभ्य'मिति **प्रभुचरणैः** [1]स्वरूपवर्णने । अथवा दिवासम्बन्धिचरित्रे वनलीला सर्वा भक्तानां गृह एव अनुभूता भवति, तत्र पुलिन्दीभाग्यानन्दनकरणे भगवत्पदकमलसम्बन्धिकुङ्कुमस्मरणे जाते दयितास्तनरचिततद्रचनाचातुर्यकलातिक्रमनीयपाणिस्मरणात् तच्छोभामाधुर्यानुभवात् पाणिपादयोर्मधुरत्वं निरूपितमव्यवधानेन । एतच्च 'पूर्णाः

---

१ स्वरूपं वर्ण्यते इति पाठः ।

पुलिन्द्य' इत्यत्र स्फुटीकृतम् । अथवा सन्ध्यायां तत्तत्प्रियावलोकनजनित-विचित्रभावोद्भूतरसेन दोहनविधौ नूपुरमुद्रिकादिभूषणभूषितपाणिपादसौन्दर्य-माधुर्यं प्रियाणामनुभूतं भवतीति तथोक्तम् । एतदेवोक्तं 'वेणुस्वनैः कलपदैर्नियोग-पाशकृतलक्षणयो' रित्यनेन । अथवा लीलासमये तत्तद्बन्धादिरचनायां कुच-कुम्भेषु मकरादिचित्ररचनायां चारुहृदयादिषु स्थापने च तापहारकत्वा-नन्ददायकत्वशोभातिशयत्वमधुरत्वादिगुणाः सर्वेऽनुभूता भवन्तीति तत् स्मृत्वोक्तं **पाणिर्मधुरः पादौ मधुरा**विति । अत एव 'शिरसि धेहि नः श्रीकरग्रह'मिति 'कृणु कुचेषु नः कृन्धि हृच्छय'मिति ताभिरुक्तं फलप्रकरणे। एवमनन्तप्रकारा भावनीयाः । अग्रे पुनर्नृत्यं मधुरमुच्यते तस्यायं भावः । अत्र सर्वं व्रजभूषणसीमन्तिनीसम्बन्धिलीलोपयोगि निरूप्यते । तेन सायं वनादागच्छन् वेणुं कूजयन् नृत्यन्मयूरानुकरणं कुर्वन् दिवा विरहतापं दयितानामपाकरोति । तन्नृत्यं त्वभिनयात्मकमित्यभिनयकरणे मधुरस्मित-पूर्वकभ्रुकुटीभङ्गकटाक्षादिविलासेषूल्लसितेष्वतिरमणीयलावण्यरसभावा मृत पोष-पुष्टाः प्रिया भवन्तीति तत् स्मृत्वा **नृत्यं मधुर**मित्युक्तम् । तस्मिन्नेव समये पुनः समानशीलत्वं विना रसः पुष्टो न भवतीति सख्याङ्गीकारे सख्यरसस्याप्यनुभवात् तस्यापि मधुरत्वं निरूपितं **सख्यं मधुर**मिति । अत एव 'सव्रीडहासविनयं यदपाङ्गमोक्ष'मित्यत्र 'पुष्टे रसे हास' इत्युक्तम् । सख्ये सति हाससम्भवादत्र तन्निरूपणात् सख्येनैव रसपोष इति सख्यस्य मधुरत्वं निरूपितमिति भावः । एवं दिवासम्बन्धि सर्वं मधुरमेवेति **मधुरा-धिपतेरखिलं मधुर**मित्यन्ते निरूपितम् ॥३॥

एवं सख्यसहितं नृत्यस्वरूपं निरूप्य गीतं निरूप्यते ।

**गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।**
**रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ॥४॥**

**मधुरम्** इदं **गीतं** नृत्यानन्तरं क्वचिद्देशविशेषे स्थित्वा करोतीति 'रङ्गे यथा नटवरौ क्व च गायमाना'वित्यत्र निरूपितम् । तस्य गीतस्य भावात्मकत्वात् तन्माधुर्यस्य व्रजसीमन्तिनीहृदयैकवेद्यत्वेन **गीतं मधुर-**

मित्युक्तम् । अथवा अत्र क्रमो न विवक्षितः । श्रीमदाचार्याणां हृदये विप्रयोगरसाविर्भावेन सर्वा एव लीला भगवतो विलासाः प्रकटा जाता इति यदैव यत्स्फूर्तिः तदेव तन्निरूपयन्ति इति तत्सामयिकं गीतं सर्वमपि मधुरं निरूप्यते । एवं सति पूर्वं पाणिपादनृत्यसख्यानि निरूपितानि, तेन रासलीलास्फूर्तौ तत्र नृत्यस्य मुख्यत्वादभिनयार्थं पाणिपादयोश्चालनक्रियायां तत्तत्संस्थानजनितशोभातिशयलावण्यादीनामनिर्वचनीयमाधुर्यानुभवात् तन्माधुर्यं निरूप्य पश्चात् नृत्यस्य माधुर्यं निरूपितम् । ततो रसपोषार्थं सख्यं निरूप्य गीतं निरूपितम् । तेन इदं गीतं 'काचित् समं मुकुन्देने'त्यत्र यदुक्तं तदवगम्यते । तत्र भगवतापि गानं कृतमिति उक्त'मुत्पन्नस्य नादस्यामृतमयत्वायें'त्याभासेन । स च मधुर एव कर्तव्य इत्युक्तत्वात् तत्स्मृत्वा **गीतं मधुरमित्युक्तम्** । किञ्च, रासलीलानन्तरं प्रातर्भगवति अन्तःप्रविष्टे 'वामबाहुकृतवामकपोल' इत्यादियुगश्लोकोक्तनिरूपितलीलासु सर्वत्र गीतस्यानुस्यूतत्वान्माधुर्यानुभवात् तत्सामयिकमपि उक्तमिति ज्ञेयम् । किञ्च, तत्र पुनः सायं व्रजागमनसमये 'मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदा'मित्युक्तप्रकारकागमनस्योक्तत्वात् तत्र मदपदेन पूर्णविबोध उक्तो विवरणे । तस्यार्थस्तु विविधनायिकाविलासस्मृतिधाराजनितानन्दसन्दोहानुभव इति **टिप्पण्यां** विवृतः । 'स चेतरविस्मारक' इति मदपदमुक्तं मूले । एवं सति सायं संयोगसमये यथा तादृशमदजनिता भावाः स्वरूपे प्रकटा भवन्ति तथा वने प्रियाविरहेण पूर्वानुभूतप्रियारसामृतस्मृतिधारया नामस्वरूपात्मकं गीतमपि विचित्रभावोद्भूतं भवति इति तत्स्मृत्वा **गीतं मधुरमित्युक्तम्** । तेनेदं गीतं 'मणिधरः क्वचिदागणयन् गा' इत्यत्र यदुक्तं तदवगन्तव्यम् । तत्र क्वचिदेव गा गणयतीति विवृतत्वात् तथात्वं स्पष्टमेवेति भावः । एवमनन्ता भावा विभावनीयाः । ततः प्रदोषसमयलीलास्फूर्ता तत्संबन्धिपदार्थानां माधुर्यं निरूपयन्ति **पीतं मधुरमिति** । अत्र सर्वस्यापि भावरूपत्वेन निरूपणात् क्तप्रत्ययान्तशब्दा अपि भावार्थका एव इह प्रयुक्ता इति पीतपदेन पानं ज्ञेयम् । अयं भावः । पूर्वं वनलीलायां नादनिष्ठामृतपानेन गवां पशुत्वधर्मनिवृत्तिपूर्वकं रसात्मकता निरूपिता 'गावश्च कृष्णमुख'

इति पद्येन । पश्चात् सायं दोहनसामयिकस्वरूपसौन्दर्यमहिम्नैव सा निरूपिता 'गागोपकै' रित्यनेन । एवं सति रसात्मिकानां तासां रसोपि भावात्मकत्वेन मधुर एव भवितुमर्हति इति तद्रसपाने तस्य भावात्मकत्वेन भावजनकत्वात् भगवतस्तत्प्रि[1]यासम्बन्धिसाक्षाद्रसपानस्मरणेन विचित्रभावविलासललिततरं तत् पानं भवतीति तत्स्मृत्वा **पीतं मधुर**मित्युक्तम् । अन्यथा 'राधाधरसुधापातुः किमन्यन्मधुरायित' मित्युक्त्या तदन्यत्र रुचिरेव न संभवतीति कथं तत् पिबेदिति भावः ॥ एवं एतत्तद्भोग्यपदार्थानां ह्यलौकिकरसात्मकत्वेन भावरूपत्वात् तदग्रे भोजनलीलाकरणात् तत्स्मृत्वा **भुक्तं मधुर**मित्युक्तम् । अत एव **श्रीगोकुलाष्टके** 'श्रीमद्गोकुलभोग्यश्री-' रित्यत्र तत्तत्पदार्थानां स्वरूपात्मकत्वेन भावरूपत्वं निरूपितम् ॥ अग्रे भोजनानन्तरं शयनं निरूपयन्ति **सुप्तं मधुर**मिति । भगवतो हि शयनमपि भावात्मकत्वेन मधुरमेव । तदुक्तं 'निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः' 'वृक्षमूलाश्रयः शेत' इत्यादिभिः । तादृशस्य मधुरत्वं स्फुटमेवेति भावः । किञ्च, लीलायां यावन्तः प्रकाराः शयनस्य प्रियावक्षःस्थलादिषु पदकमलधारणरूपाः बन्धादिप्रकाररूपा वा भवन्ति ते सर्वेपि अनुभूता इति तत् स्मृत्वा तथोक्तं समुदायसूचकत्वेन ॥ एवं प्रदोषसामयिकलीलां निरूप्य रात्रिचरित्र निरूपयन्ति **रूपं मधुर**मिति । रात्रौ भगवान् विविधनायिकाभोगोपयोगिकोटिकन्दर्पाधिकलावण्यमुद्बुद्धरसात्मकं स्वरूपं प्रकटीकृत्य तत्तत्सङ्केतेषु गच्छति तदा तदागमनावलोकनपराः प्रियास्तादृशपरमसौन्दर्यमाधुर्यरससिन्धुलहरीललिततरोल्लसदनेकभावलावण्यमनोहरं रूपं दृष्ट्वा तदवलोकनरसामृतसिन्धुमग्ना भवन्तीति तत् स्मृत्वा **रूपं मधुर**मित्युक्तम् । अथवा, अग्रे पुनः प्रियायाः स्वकरकमलरचिततत्तद्भावात्मकसकलकला[2]कल्पविरचनायां संपूर्णस्वरूपमाधुर्यमनुभूतं भवतीति तत् स्मृत्वा तथोक्तम् । अथवा, परमसौरभसुरभितैलाभ्यञ्जनविधानपूर्वकमज्जनादिसामयिकं स्मृत्वा तथोक्तम् । अथवा, निर्भररससामयिकमेव माधुर्यमनुभूयोक्तम् । एवमनेकधा भावनीयम् ॥ अग्रे तिलकमाधुर्यमुच्यते **तिलकं मधुर**मिति ।

---

१ त्रितयसम्बन्धीत्यन्यः पाठः । २ सकलाकल्पेति द्वितीयः पाठः ।

'दर्शनीयतिलक' इति वाक्यात् सकलशृङ्गारेषु तिलकस्य [1]मुख्यत्वात् तदेवोक्तम् । किञ्च, नायिकानां नखादारभ्य शृङ्गाररचना या क्रियते सा नायकस्य तिलकमारभ्येति रसशास्त्रोक्तत्वात्, प्रथमं तिलकरचनायां मलयजतिलकं विधाय तन्मध्ये कस्तूरीतिलकं कृत्वा तन्मध्ये मुक्ताफलबिन्दुः क्रियत इति । तथा चोक्तमपि **प्रभुचरणैः** 'प्रथमं मलयजतिलकं मृगनाभिजनुस्तदन्तराळेपि । तन्मध्येपि च कुङ्कुममुक्ते'ति । तथाविधरचनायां तादृशस्य परममोहनरूपत्वात् तत्सौन्दर्यमाधुर्यावलोकनरसपूरमग्ना भवन्ति प्रियाः, तत्समयं स्मृत्वा तथोक्तम् ॥ एवं तिलकमाधुर्यं निरूप्य अन्येषामपि भूषणादीनां तन्निरूपयन्ति **मधुराधिपते**रिति । यद्यप्यखिलान्यपि भूषणादीनि मधुराण्येव तथापि तिलकस्य परमसौभाग्यस्थानस्थितत्वात् परमसौभाग्यरूपत्वेन महावशीकरणसामर्थ्यवत्त्वेन तिलकस्यैव मधुरत्वं निरूपितम् । किञ्च, तिलकशोभावलोकने तन्माधुर्यामृतजलधिमग्नं तन्मनो जातमिति तावदेवोक्त्वा स्थितमिति भावः । किञ्चात्र 'मधुराधिपतेरखिलं मधुर'मित्यत्र अखिलपदेन अन्योपि भावः सूच्यते । तथाहि । प्रथममन्यत्र प्रियया सह रमणं कृत्वा पुनरितरस्याः समीपमागते प्रिये तच्चरणकुङ्कुमाङ्कितितिलकावलोकनाद् मानसम्भावनायामपि तज्जनितापूर्वशोभया सर्वविस्मरणे तद्वशीभूतो रमत इत्यखिलं **मधुर**मुक्तम्, खण्डिताया एतदसम्भवात् ॥

अथवा, यथा पूर्वोक्ताद्भुतरसात्मकसाक्षाद् भगवत्स्वरूपान्तःप्रवेशे **श्रीमदाचार्याणां** हृदये तत्तल्लीलाप्राकट्येन तत्तल्लीलानुभवोऽभूत्, तथा जन्मोत्सवमारभ्य बाललीलाया अप्यनुभवो जात इति तत्सामयिकमाधुर्यस्मरणे, अत्र तदपि निरूपितमिति ज्ञेयम् । एवं सति प्राकट्यसमयमारभ्य तत्तल्लीलास्मरणे प्रथमं प्राकट्यानन्तरमेव स्वप्रियावलोकने अतिमृदुलनवकिसलयारुणरुचिरतराधरसौन्दर्यदर्शने चिरेप्सितरसस्य भावि[2]पानानन्दोत्कण्ठाजनितभावनया[3] तन्माधुर्यानुभवाद् **अधरं मधुर**मित्युक्तम् । पश्चात् तादृशवदनावलोकने चिबुककपोलादिशोभाया अपि रसैकपानपर[4]रूपत्वेन

---

१ मुख्यत्वमिति पाठः । २ पालनेति पाठः । ३ भावनायामिति पाठः । ४ स्थलेति पाठः ।

तदभिलाषजनितभावनया तदनुभवात् सम्पूर्णवदनस्याप्यनुभवाद् **वदनं मधुरमित्युक्तम्** । किञ्च, तादृशे समये बालकवदनं प्रोञ्छनाद्यलङ्कारालङ्कृतं भवतीति तथोक्तम् । अथवा प्रतिमासोत्सवादिषु विशेषेणालङ्कृतं भवतीति तत्स्मृत्वा तथोक्तम् । अग्रे नयनं निरूपयति **नयनं मधुरमिति** । अयं भावः । नवकमलदलसदृशशोभातिशयरुचिरस्य श्रीमन्मातृचरणविरचितनवाञ्जनरेखातिरमणीयप्रकटमुग्धभावस्यापि नयनस्य 'तोकता वपुषि तव राजते दृशि तु मदमानिनीमानहरणं' इत्युक्त्या परमप्रेमरसनिभृतमाधुर्यं मधुरत्वेनानुभवात् तथोक्तमिति भावः । अग्रे हसितं निरूपयन्ति **हसित**मिति । [1]बाले हि प्रथममेव वचनाद्यसम्भवात् स्मितमेव भवति । तदप्यधरपल्लव एवेति, केप्येते मां मत्कृतिमपि न जानन्तीति स्वसङ्केतं स्वप्रियाणां ज्ञापयन्निव भगवांस्तादृशं स्मितं करोति तत् तासामतिहृदयङ्गम भवतीति तन्माधुर्यं स्मृत्वा **हसितं मधुरमित्युक्तम्** । किञ्च, बाल्ये तादृशमन्दहसितनिरूपणे अतिकोमलदुग्धदशनकिरणावलीजनितशोभातिशयमाधुर्यादिसङ्ग्रहोपि निरूपित इति ज्ञेयम् । अग्रे तादृशं मधुरस्मितामृतलहरीविमलचन्द्रिकाचारुतरहृदयं परममधुरमनुभूतं भवतीति तत्स्मृत्वा **हृदयं मधुरमित्युक्तम्** । किञ्च, बाले तादृशं हृदयं व्याघ्रनखादिभूषणभूषितत्वेन परमरमणीयं भवतीति तत्स्मृत्वा तथोक्तम् । अथवा तादृशबालकस्य [2]क्रोडादाने हृदयादौ लालनादिकरणे च हृदये माधुर्यं समनुभूतं भवति इति तत्स्मृत्वा तथोक्तम् । अग्रे गमनं निरूपयन्ति **गमन**मिति । हृदयनिरूपणानन्तरं गमननिरूपणात् तादृशबालकस्य प्रथमं हृदयेनैव तत्तद् भवतीति तथोक्तम् । किञ्च, अतिप्रेम्णा क्रोडीकृत्य हृदयोपरि समादाय [3]एकया लालने क्रियमाणे पुनरन्यत्र बाहू प्रसार्य हृदयेनैव गमनं करोति, पुनस्तत्सकाशाद् [4]अन्यस्या एव समीपे समायाति । एवं मुहुर्मुहुर्गमनेन सर्वासां प्रेयसीनां आश्लेषाद्यभिलाषपूरणात् स्वस्य दक्षिणनायकत्वचातुर्यस्य बाल्ये एव ज्ञापनात् तादृश तदतिमधुरमनुभूतं भवतीति तत्स्मृत्वा **गमनं मधुरमुक्तम्** । एवं मधुराधि-

---

१ बाल्ये हीति पाठः । २ क्रीडाया इति पाठः । ३ एकयेति पाठः । ४ अस्या इति पाठः ।

पतेः फलरूपस्याङ्कुरमारभ्यैव सर्वं मधुरमिति तत्स्मृत्वा **अखिलं मधुरमित्युक्तम्** । अत एव उपसंहारे **दलितं मधुरं फलितं मधुर**मित्युक्तम् । ततो वचनं निरूपयन्ति **वचनं मधुर**मिति । तादृशस्य बालकस्य वचनं तु अव्यक्तमधुरं भवति । तद्वचनायां अल्पदशनानां अधरपल्लवस्य च शोभाकिर्मीरितत्वेन परमरुचिरा भवतीति तादृशी सा प्रेयसीनां अतिहृदयङ्गमेति तत् स्मृत्वा **वचनं मधुर**मित्युक्तम् । किञ्च मुग्धभावजनिताव्यक्तभाषणेपि [1]प्रचुरप्रेमभाववतीनां यथा नयनयोर्मदमानिनीमानहरणत्वमनुभूतं तथा तादृग्वचनानामपि तथैवानुभव इति तत् स्मृत्वा तथोक्तम् । एवं वचनमाधुर्यमुक्त्वा तदाचरितमाधुर्यं निरूपयन्ति **चरितं मधुर**मिति । मुग्धदशायामपि नयनकरकमलादिभिर्यत्क्रियते तत् चरितशब्देनोच्यते । तथा च तत्तदङ्गस्पर्शनखदानादिरूपं तत्प्रेयसीनां लालनादौ अतिचतुरनायकचरितमिवानुभूतं भवतीति तत्स्मृत्वा **चरितं मधुर**मुक्तम् । अग्रे वसनं **मधुरं निरूपयन्ति वसन**मिति । तस्यायं भावः । यद्यपि वसनस्य आच्छादकशक्तिरूपत्वमस्ति तथाप्येतादृशे वयसि वसनस्य निरावरणरसानुभावकत्वात् तन्माधुर्यमनुभूतं भवति इति तत्स्मृत्वा **वसनं मधुर**मित्युक्तम् । किञ्च, **ईदृग्रूपस्य बालस्य वसनपरिधानासम्भवाद्** वसनं मधुरमित्युक्तेरयमाशयः । यदा व्रजतरुण्यः क्रोडीकृत्य वक्षःस्थलोपरि संस्थाप्य लालयन्ति तदा अन्यं न ज्ञापयाम इसि स्वाञ्चलेन सङ्गोप्याश्लेषादिना लालयन्ति, तदा तासां प्रियस्यापि तत्परममधुरत्वेन अनुभूतं भवतीति तत्स्मृत्वा तथोक्तम् । अग्रे **वलितं मधुर**मुच्यते । तस्यायं भावः । पूर्वमेकया श्रीगोकुलतरुण्या क्रोडीकृत्य पुनर्वक्षःस्थलोपरि [2]संस्थाप्य लालितः क्षणानन्तरं अन्यस्याः [3]समीपागमने पूर्वस्याः कुचकुङ्कुमादिषु करकमलनखादिषु स्पर्शं विधाय तदन्तिके गच्छतीति तादृशवलनमाधुर्यं तदनुभवैकमनोहरमिति तत् स्मृत्वा **वलितं मधुर**मित्युक्तम् । अतःपरं रिङ्गणलीलास्फूर्तौ[4] तां निरूपयन्ति **चलितं मधुर**मिति । एतन्मधुरत्वं तु 'गोकुले

१ प्रचुरतरप्रेमवतीनामिति पाठः । २ प्रतिष्ठाप्येति पाठः । ३ समीपे इति पाठः । ४ स्फुरितेति पाठः ।

रामकेशवौ रिङ्गमाणौ विजह्रतु'रित्यत्र निरूपितम् । तत्र केशवपदार्थनिरूपणेन केशकृतसौन्दर्यातिशयो निरूपितः । किङ्किणीवलयनूपुरादिशोभा चाग्रे निरूपिता । एवं सति तादृशं चलनमतिमुग्धभावरूपमतिमोहकत्वाद् मधुरं भवतीति तथोक्तम् । किञ्च, चलितवलितयोरव्यवधानेन निरूपणात् तादृशसञ्चलने पुनः परावृत्त्यावलोकयतीति [1]चलितपदेनोच्यते । तेन सिंहावलोकनन्यायेन तच्चलनं करोतीति तादृशमदमन्थरावलोकनगौरवेण मदकलमातङ्गगतिरमणीयतरुणीमनोमोहनोत्तरलितमानिनीमानहरणत्वं चलने द्योतितमिति तत्स्मृत्वा **चलनं मधुर**मित्युक्तम् । अग्रे **भ्रमितं मधुर**मिति निरूपयन्ति । तस्यायं भावः । 'यर्ह्यङ्गनादर्शनीये' त्युक्तप्रकारकव्रजाङ्गणरिङ्गणलीलायां घोषप्रघोषरुचिरावित्युक्त्या मुग्धभावप्रदर्शनार्थमेव तादृक् भ्रमणं करोति, तदा तत्प्रेयसीनां पूर्वं लालनादौ स्वेप्सितरसानुभवकरणादधुना तु एतादृशमुग्धभावप्रदर्शनाच्च तद् भ्रमणं मधुरमनुभूतं भवतीति तत्स्मृत्या **भ्रमितं मधुर**मित्युक्तम् । किञ्च, अग्रे वानरैः सह भ्रमणकरणे रहसि प्रियासङ्गे सति तद् भ्रमणस्य रसानुभावकत्वादपि **मधुरत्व**मुक्तम् । अत्र 'कुमारो द्विवार्षिक' इत्युक्त्या मुग्धभावप्रदर्शनोक्त्या चैषा बाल्यभावसहिता कुमारलीलोक्ता । केवलां त्वग्रे निरूपयिष्यन्ति इति अग्रे **मधुराधिपतेरखिलं मधुर**मित्युक्तम् । बालभावेनापि सहिता कुमारलीला प्रेयसीनां [2]स्वसमीहितरसदानात् मधुरा तदा केवलाया मधुरत्वे किं वाच्यमिति भावः । अग्रे **वेणुर्मधुर** इति निरूपयन्ति । तस्यायं भावः । आक्रीडनपदार्थानां मध्ये वेणुर्मुख्य इति स एवोक्तः । स पुनर्बाल्येपि आक्रीडनक्रीडायां कदाचिदधरे स्थाप्यते, कदाचिद् वादयितुं फूत्करोति, कदाचित् बालभावकृतफूत्कारस्य वादनाशक्तौ स्वयमेव गुञ्जति, कदाचिदेतादृशमुग्धभावेपि अतिमनोहरस्वभावस्वरादिसहितं वेणुं वादयति भगवान्, इत्येवं बाल्यमारभ्यैव प्रियाधरसम्बन्धस्य जातत्वात् तज्जनितविविधप्रकारसौभाग्यानुभवाद् **वेणुर्मधुर** इत्युक्तम् । अग्रे रेणुं निरूपयन्ति **रेणुर्मधुर** इति । 'पङ्काङ्गरागरुचिरा' विति श्लोके पङ्कस्याङ्गरागरूपत्वनिरूपणेन रिङ्गण-

१ वलितेति पाठः । २ स्वसमाहितेति पाठः ।

लीलायां रेणोः प्रत्यङ्गसङ्गे अङ्गरागरञ्चितपरममनोहरशोभाजनकत्वात् तन्मिषेण प्रोञ्छनकरणादौ तन्माधुर्यमनुभूतं भवतीति तत्स्मृत्वा तथोक्तम् । किञ्च, रेणुशब्दोऽत्र स्त्रीलिङ्गवाची भूरूपोऽप्यस्ति, तेन रिङ्गणलीलायां सकलाङ्गसङ्गो भुवः स्त्रिया इव कामलीलारसभोगो भवतीति तादृग्रसाविष्टानां तद्वेद्यमिति तत् स्मृत्वा **रेणुर्मधुर** इत्युक्तम् । अत एव रेणुनिरूपणानन्तरं पाणिपादयोरव्यवधानेन निरूपणम् । रिङ्गणलीलायां भूमौ [1]पतिते गाढाश्लेषादिकृतिरिव पाणिस्थितिर्भवति, बन्धादिविशेषप्रकार इव पादस्थितिर्भवति इति तत्प्रकारकानुभवस्तु तासामेव इति तथोक्तम् । **अथवा, लालनादौ पाणिपादयोः** [2]**स्वकुचकुम्भादिषु स्थापने तान्माधुर्यमनुभूतं** भवतीति तथोक्तम् । अथवा, पाणिपादादिषु तत्तत्कमलादिचिह्नानां दर्शनात् तत्तच्चिह्नोक्तधर्मास्तु [3]**बालभावमार**भ्यैव स्त्रियाभिरनुभूयन्त इति तत्स्मृत्वा तथोक्तम् । एवमनेकप्रकारा भावनीयाः । अतःपरं **नृत्यं मधुर**मुच्यते । [4]लालनकरणे यथैव प्रिया नृत्यं कारयति तथैव भगवान् नृत्यति इति तदवलोकने तासां **यथा इदानीं अस्मत्सन्तोषार्थं अस्मद्वशो भूत्वा नृत्यं करोति,** तथाग्रेप्यस्मद्वशोस्मत्सन्तोषं[5] करिष्यति इत्याशया तत् नृत्यं परमरसाधयकं भवतीति **नृत्यं मधुर**मित्युक्तम् । **किञ्च,** भ्रूभङ्गाद्यभिनयानां बाल्येपि [6]कामिनीकामोद्बोधकत्वाद्रसाविष्टानां तथैवानुभवात् तत्स्मृत्वा तथोक्तम् । अतःपरं सख्य निरूपयन्ति **सख्यं मधुर**मिति । अयं भावः । 'समानशीलव्यसनेषु सख्य'मित्युक्तत्वात् सर्वसमक्षं स्वस्य बालभावेनैव [7]**स्वलालनरसाविष्टां तत्तन्मधुरमुग्धभावानुसारिणीं विधाय पश्चात् सख्यभावं कृत्वा रहसि** तत्तल्लीलारसानुभवमग्रे कारयतीति तत्स्मृत्वा **सख्यं मधुर**मित्युक्तम् । अथवा, बालभावेन सख्य कृत्वा सर्वसमक्षमेव प्रियाभिः राह क्रीडाकरणे प्रिययोः स्वसमीहितरसानुभव एव भवत्यन्येषां बालभावस्यैवेति तत्स्मृत्वा **सख्यं मधुर**मित्युक्तम् । अग्रे **गीतं मधुर**मुच्यते । तस्यायं भावः । मुग्धभावांगीकारेऽपि

---

१ पतने इति पाठः । २ स्वकुचकुङ्कुमादिचिह्नानामिति पाठः । ३ बाल्येति पाठः । ४ लीलानुकरणे । ५ भावप्रियोऽस्मत्तोषं करिष्यतीति पाठः । ६ कामुकानामिति पाठः । ७ रसाविष्टगोपिकामिति पाठः ।

यावन्तो गीतभेदास्तदभिनये रसाविष्टानां कामरसाविर्भाव एव भवतीति **गीतं मधुर**मित्युक्तम् । अथवा, मुग्धभावप्रदर्शनार्थमेव कदाचिदव्यक्तं गीतं करोति तथापि तासां तादृशाभिनयजनितभ्रूभङ्गकटाक्षाद्यवलोकने कामरस एव उत्पद्यते, अन्येषां बाल्यरसाविर्भाव एव भवतीति तत्स्मृत्वा तथोक्तम् । अत एवोक्तं 'व्रजजनश्लाघ्यगुणे'ति गीते, तेन तथात्वम् । अग्रे **पीतं मधुरं भुक्तं मधुर**मुच्यते । तस्यायं भावः । बाल्ये पानभोजनादिकं श्रीमन्मातृचरणसमीपे कृतं भवति यद्यपि तथापि [1]स्वभावाग्रहेणैव काञ्चित् [2]प्रियां समाहूय स्वसमीपे स्थापयित्वा तया [3]सममेव पानभोजनादिकं करोतीति तत्स्मृत्वा तथोक्तम् । अथवा, चौरचर्योक्तप्रकारेण सर्वासामुपभोगकरणात् तथोक्तम् । अथवा, सायं प्रथमं पयःफेनादिपानं भवति, पश्चाद्रात्रौ भोजनं भवतीति पूर्वं तदुक्तम् । तथा च स्वर्णपात्रे पायःफेनपानव्याजेनेत्युक्त्या तस्य मधुरत्वं [4]युक्तमेवेति तथोक्तम् । एव अनेकप्रकाराः पानभोजनादौ भावनीयाः । ततः **सुप्तं मधुर**मुच्यते । तस्यायं भावः । यद्यपि शयनं बाल्ये मातृचरणसमीपे तथापि भक्तानां रात्रौ विप्रयोगेन तदात्मकतायां अन्तस्तत्प्राकट्ये तत्स्वरूपानुभव एव भवति इति तथोक्तम् । [5]प्रातरेत्य बहिरवलोकनाभावजनिततापनिवृत्त्यर्थं 'चिरविरहितापहरे' इत्यादि गीतेन प्रार्थ्यते ताभिः । अथवा क्रोडीकृत्य लालनादौ बालभावेन क्रोड एव कदाचित्स्वपिति तदा तस्याः प्रियायाः वक्षसि समालिङ्गय एककरेण कुचस्पर्शं कुर्वन् स्वपितीति पूर्णरसानुभव एव तस्या भवतीति तत्स्मृत्वा **सुप्तं मधुर**मुक्तम् । अग्रे **रूपं मधुर**मुच्यते । तस्यायं भावः । एवं क्रोड एव शयने कृते सर्वाङ्गावलोकनस्पर्शादौ तन्माधुर्यमनुभूतं भवतीति **रूपं मधुर**मुक्तम् । अथवा, बाल्यदशायामपि तादृशरूपस्य परमसौभाग्यौदार्यगुणाधारत्वाद्रसाविष्टानां कामोद्दीपकत्वेन **रूपं मधुर**मुक्तम् । अग्रे तिलकं निरूपयन्ति **तिलकं मधुर**मिति । यद्यपि गोरोचनादिकृततिलको मुग्धभावमेव प्रकटयति, तथापि तादृशे रूपे कृतत्वात् स्वस्यापि मोहनैकस्वभावात् कामभावमेवोत्पादयतीति तत्स्मृत्वा तथोक्तम् । किञ्च, अस्य

---

१ बालभावेति पाठः । २ स्त्रियमिति पाठः । ३ सहैवेति पाठः । ४ उक्तेति पाठः । ५ आगत्येति पाठः ।

तिलकस्य मुख्यत्वेन तन्निरूपणात् सर्वेषां भूषणानामपि निरूपणं ज्ञेयम् । तेन सर्वाण्याभरणानि तादृशभावोद्दीपकानि मधुराण्येव इति ज्ञापनाय अग्रे निरूपयन्ति **मधुराधिपतेरखिलं मधुरम्** ॥

अतः परं केवला कुमारलीला निरूप्यते **करणं मधुर**मिति । यद्यपि **श्रीमदाचार्यैः** निखिललीलामाधुर्यानुभवाद् बाललीलामाधुर्यसमुदायेनैव **'अधरं मधुर'**मित्यादि निरूपितं, तथापि **प्रथमदर्शने** यादृशानुभवो जातस्तादृशमेव माधुर्यं प्रथमं निरूपितं भवतीत्यभिप्रायेण पूर्वं प्रथमानुभवप्रकारकभावविवरणं कृत्वा पश्चादितरलीलामाधुर्यविवरणं कृतमिति श्लोकचतुष्टयस्य पुनः पृथक्तया [1]बाललीलाभावनिरूपणं कृतमिति ज्ञेयम् ॥ ४ ॥

प्रस्तुतं निरूपयन्ति **करणं मधुर**मिति ।

**करणं मधुरं रमणं मधुरं तरणं मधुरं हरणं मधुरम् ।**
**वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥५॥**

ईदृग्रूपतिलकनिरूपणेन भगवतः सकलकलाचातुर्यातिशयस्फूर्तौ लीलासम्बन्धिविविधोपायविरचनस्याशक्यस्यापि शक्यत्वसम्पादनरूपत्वानुभवात् **करणं मधुर**मित्युक्तम् । एतत्सर्वं 'निलायनैः सेतुबन्धैर्मर्कटोत्प्लवनादिभिः । एवं विहारैः कौमारैः कौमारं जहतुर्व्रज' इत्यस्य विवरणे **श्रीमदाचार्यैः** 'ब्राह्मणोपि भवति क्षत्रियोपि भवत्येकस्यां शाखामारूढः सर्वं फलं भुङ्क्ते' इत्यादि निरूपितम् । विशेषतः **पिप्पणयां** कारिकाभिः स्फुटीकृतं **श्रीमत्प्रभुचरणैः** ॥ अग्रे तादृशकृत्यनन्तरं रमणं मधुरमेव भवतीति **रमणं मधुर**मित्युक्तम् ॥ ततः कदाचिद् यमुनापारस्थ[2]भर्तुर्मिलनार्थं यातायातमपेक्षितमुभयोः सान्निध्ये किञ्चिन्निमषान्तरं विना न सम्भवतीति कौतूहलक्रीडया स्वस्य नाविककलाकौशलं [3]प्रदर्शयन् पारोत्तारणविधिं स्वयमेव करोति भगवांस्तदा भक्तानां [4]पारावारोत्तरणविधाने परस्परमिलने सति चिरनिभृतनिर्भरोत्तरलितसुभगानुरागभरमधुरतरोल्लसितस्मितस्मेरापाङ्गभङ्गविलोकन-

---

१ लीलात्मकभावेति पाठः । २ भक्तेति पाठः । ३ प्रदर्श्येति पाठः । ४ पारोत्तारणेति पाठः ।

वचनरचनायां परमकुतुकाकूतविचित्रभावानामुच्छलितत्वाद् विलक्षणरसानुभवेन तत्तरणमतिमधुरमनुभूतं भवतीति तत्स्मृत्वा **तरणं मधुरमित्युक्तम्** ॥ [1]एवं तरणेपि भावा अनेका भावनीयाः अग्रे पुनरुपद्रावकलीलां निरूपयन्ति **हरणं मधुरमिति** । **हरणं** चौर्यं बलादन्यसम्बन्धिवस्तुपदार्थानामाहरणं वा, तत्सर्वेषामुपद्रावकम्, भक्तानां तु परमरसानुभावकत्वेन परममधुरमनुभूतं भवतीति तत्स्मृत्वा **हरणं मधुरमित्युक्तम्** । अत्राप्यनेकप्रकारा ज्ञेयाः । किञ्च, चौर्यसमये गृहीतश्चेद् विविधभावकृतापाङ्गादिदर्शनेन स्वरूपरसानुभव एव भवतीति तत्स्मृत्वा तस्य मधुरत्वं निरूपितमिति भावः ॥ एतदग्रे ततोऽप्युपद्रावकमाहुः **वमितं मधुरमिति** । चौर्येण दधिदुग्धादिकं पिबतीति ज्ञात्वा गृहीतश्चेत् तन्मुखोपरि दुग्धादिगण्डूषं कृत्वा पलायते, तदा पुनः कौतुकरसाविष्टास्तत्कृतिं विलोकयन्त्यो हसन्त्येव न तु तासां कोपादिकं भवति, इति प्रभुरपि दूरे स्थित्वा तन्मुखमवलोकयन् हसतीति स्वरूपमाधुर्यरसमोहिता एव करोतीति तत्समयं स्मृत्वा **वमितं मधुरमित्युक्तम्** ॥ अग्रे पुनस्तादृशोपद्रवोपलम्भनार्थं यदा श्रीमातृचरणसमीपे **प्रियाः समायान्ति तत्पूर्वमेवागत्य** श्रीमन्मातृचरणसमीपे परमसाधुर्भूत्वा विविधमुग्धभावैः क्रीडति, तदा तास्तादृशोपद्रवकर्तुः तादृशलीलाशान्तस्वरूपत्वं [2]विलक्ष्य तज्जनितमुग्धभावातिसौन्दर्यं प्रकटीभवतीति तदनिर्वचनीयमाधुर्यरसानुभवेन विविधभावतरङ्गान्दोलितहृदयाः स्वरूपमेव पश्यन्त्यः किमपि वक्तुं न शक्नुवन्ति, तत्समयं स्मृत्वोक्तं **शमितं मधुरमिति** । एतदेवोक्तं 'तरङ्गा इव रागाब्धेरुदिताः प्रिययोर्मिथः । भावा वक्तुमशक्यास्ते ज्ञेयास्तु तदनुग्रहात्' इति **प्रभुचरणैः** ॥ एवं तत्तत्सामयिकं उपद्रावकमपि परममधुरमित्युक्तमग्रे **मधुराधिपतेरखिलं मधुरमिति** ॥ ५ ॥

अतः परं यमुनातीरलीलास्फूर्तौ तच्चिरूपयन्ति **गुञ्जा मधुरा** इत्यादिभिः ।

**गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।**
**सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ॥६॥**

---

१ एवमनन्ता भावास्तरणेऽपि भावनीया इति पाठः । २ वीक्ष्येति पाठः ।

यमुनातीरवनेषु गुञ्जातरवो बहवोपि सन्ति फलिता इति 'गुञ्जानां मधुराञ्जनदीप्तिभिः सुनासापुटमुक्ताफलभूषणं तवास्यसदृशं भवती'त्युक्तत्वेन भावात्मकत्वात् धारणं करोति भगवांस्तेन भावात्मकत्वेन तन्माधुर्यं स्मृत्वा तथोक्तम् । तथैव वन्यमालाया धारणमपि पुष्पाणां प्रियाहसितसादृश्येन तद्ग्रथितमालाया भावात्मकत्वेन रसोद्बोधकत्वात् परमसौन्दर्यमाधुर्यानुभवात् मालाया मधुरत्वं निरूपितम् । मालाया 'बर्हापीडे'ति श्लोके विक्षेपकशक्तिमत्त्वेन रसोद्दीपकत्वं निरूपितमेवेति स्फुटमेव तथात्वमिति भावः । अथवा, 'दिव्यगन्धतुलसीमधुमत्ते'रित्युक्ते लीलायां प्रियाविरचितमालाधारणेन आलिङ्गनादिसम्मर्दनजनितकुङ्कुमादिसौरभशोभारचितमाधुर्यानुभवात् तथोक्तम् । अथवा, 'ग्रीवोरःस्थलकटितटकाञ्चीदामप्रपदयोः सततं, विहरन्ती वनमाला मत्तालिकुलैरभवदुद्गीते'ति श्लोके तत्तदङ्गविहारव्यञ्जितविपरीतरसभावात्मकत्वं मालाया द्योत्यते । तेन तन्माधुर्यसौभाग्यं किं वाच्यमिति भावः । एवंमनेकविधा भावाः मालायामपि भावनीयाः ॥ एवं तीरसम्पत्तिमाधुर्यं निरूप्य यमुनाया माधुर्यं निरूपयन्ति **यमुना मधुरेति** । यमुनायाः साक्षाद्रसात्मकभगवद्व्रजरसज्ञरमणीलीलारसानुभवोद्भूतरसभावात्मकत्वेन च माधुर्यस्य प्रकटत्वात् स्वरूपतो **यमुना मधुरे**त्युक्तम् ॥ ततस्तरङ्गानामुच्यते **वीची मधुरे**ति । अत्र वीचीनिरूपणे त्रिविधवायुनिरूपणमपि ज्ञेयम्, अन्यथा वीचीनामसम्भवात् । सोपि लीलायां रसाधायकत्वात् मन्द एवेति वीचयोपि मृदुलतरा एव सूच्यन्ते । तादृशीनां शृङ्गाररसजलधिसमुच्छलत्तरलतरङ्गसदृशप्रियापाङ्गरङ्गसमसौभाग्येन भावात्मकत्वाद् मधुरत्वं निरूपितम् ॥ ततो जलस्य माधुर्यं निरूपयन्ति **सलिलं मधुरमिति** । 'उपरि चलदमलकमलारुणद्युतिरेणुजलभरेणामुना व्रजयुवतिकुचकुङ्कुमारुणमुरः स्मारयसि मारपितुरधुने'ति निरूपणात् जलस्यापि तादृशरसात्मकभावरूपत्वात् मधुरत्वं निरूपितम् । किञ्च, 'सकलगोपिकासङ्गमस्मरश्रमजलाणुभिः सकलगात्रजैः सङ्गम' इत्युक्तप्रकारकरसात्मकत्वेनापि मधुरत्वस्मरणात् तथात्वमुक्तम् । तेन जलक्रीडाजनितपरमानन्दानुभावकत्वात् तथोक्तमित्यपि सूचितम् । किञ्च, कुमारिकाभिः जलक्रीडायां

व्रतचर्योक्तप्रकारकसलिलमाधुर्यं यथानुभूतं तथा स्वस्याप्यनुभवात् तथोक्तमित्येवमनेकप्रकारा भावनीयाः ॥ ततः **कमलानां** निरूपयन्ति **कमलं मधुर**मिति । यद्यपि **कमलानां** माधुर्यं तापहारकादिधर्मैः प्रकटमेव तथापि, 'अत्राधिरजनिहरिविहृतिमीक्षितुं कुवलयाभिधनयनान्युषसि तनुष' इति **यमुनाष्टपदी**गीतोक्ततन्नयनरूपत्वेन रसात्मकत्वात् तल्लीलावलोकनजनितविविधभावसंवलिततद्रसरूपमकरन्दमाधुर्यानुभवात् तथोक्तमिति भावः ॥ अथवा, प्रियानेत्रसदृशशोभातिशयधारणेन भावात्मकत्वात् तथोक्तम् ॥ एवं यमुनासम्बन्धिसमस्तपदार्थानां माधुर्यवत्त्वमेवेत्यग्रे **मधुराधिपते**रित्युक्तम् ॥ ६ ॥

अतः परं समस्तलीलोपयोगिपदार्थानां [1]उद्दीपनविभावादीनां माधुर्यं निरूपयन्ति **गोपी मधुरे**ति ।

**गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम् ।**
**दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ ७ ॥**

**गोपीपदेन**[2] शुद्धभावात्मिकास्ता उक्ताः । यद्यपि लोकेपि नायिकानां माधुर्यं भवति तथाप्येकान्तिका एताः शुद्धभावेन परमस्निग्धाः अलौकिकरसात्मिका भगवत्स्वरूपैकनिष्ठा इति स्वरूपत एव साहजिकमलौकिकमाधुर्यमस्तीति तादृशस्वरूपानुभवाद् **गोपी मधुरे**त्युक्तम् । किञ्च, एतासां शुद्धभावदत्त्वेन देहप्राणेन्द्रियान्तःकरणादयोपि भगवत्स्वरूपभावात्मका एवेति तत्सौन्दर्यमाधुर्यलावण्यादीनां सर्वदा प्रकाशमानत्वात् सार्वदिकमेव तासामलौकिकं माधुर्यमिति तत्स्मृत्वा तथोक्तम् । किञ्च, यमुनामाधुर्यवर्णनप्रस्तावे **गोपी मधुरे**ति निरूपणात् जलक्रीडासमयः सूच्यते । तेन जलक्रीडायां गोपीनां वसनभूषणादीनामल्पत्वसम्भवात् स्वाभाविकं सौन्दर्यजनितमसाधारणं माधुर्यं तत्तदङ्गेष्वनुभूतं भवतीति तत्स्मृत्वा तथोक्तम् । अत्र गोपीपदे त्वेकवचनं शुद्धभावात्मकजात्यभिप्रायेणोक्तम् ॥ ततो लीलाया मधुरत्वं निरूपयन्ति **लीला मधुरे**ति । तादृशीनां लीला हावभावकटाक्षादिरूपाः 'काचित्कराम्बुजं शौरे'रित्यारभ्य 'पादन्यासैर्भुजविधुतिभि'रित्यादिसर्वाः शरत्काव्यकथारसाश्रया इत्यन्तेनोक्ताः सर्वा मधुरा इति

---

१ आलम्बनेति च पाठः । २ शब्देनेति पाठः ।

तदखिलं स्मृत्वा तथोक्तम् । यद्यपि कामलीला मधुरा भवति, तथापि भगवल्लीलायामुद्दीपनविभावानामालम्बनविभावानां चालौकिकरसात्मकत्वात् तल्लीलानामप्यलौकिकत्वेन तन्माधुर्यस्य वैलक्षण्यानुभवात् तल्लीला मधुरेत्युक्तम् । किञ्च, गोपीपदस्य शुद्धभावार्थकत्वात् शुद्धभावप्रसादित इति प्रस्तावे कुमारीणां तथा निरूपणात् ता अपि अत्र निरूप्यन्ते **गोपी मधुरा लीला मधुरे**ति । किञ्च, यमुनासम्बन्धिलीलानिरूपणप्रस्तावे 'गोपी मधुरे'ति निरूपणेनापि व्रतसम्बन्धिन्यो ज्ञायन्ते, यमुनायाः कुमारीकामपूरकत्वात् । तदुक्तम् । 'कुमारीकामपूरके कुरु भक्तिराय-' मिति । तास्तु यमुनायां शृङ्गारोद्दीपकवसनेन भूषणादित्यागेन विहरन्तीति तासां परमसौन्दर्यमाधुर्यरमणीयतरप्रत्यङ्गावलोकनार्थं भगवता वसनेषु हृतेषु पुनस्तत्प्रार्थनतदुत्तरविरचनायामन्तरुच्छलद्रसाब्धिपूरजनितविचित्रभावतरङ्गसंवलितावलोकनपरिहासकौतुकरसात्मकमुग्धभावातिललितसकलाङ्गावलोकनजनितपरमरसानुभवोभूद्भगवत इति तत्स्मृत्वा **गोपी मधुरा लीला मधुरे**त्युक्तम् ॥ अग्रे पुनः स्वसमीपागमने स्वकरकमलेनालौकिकरसात्मकवसनयोजनं **युक्त**पदेनोच्यते । तादृशं वसनपरिधापनं स्मृत्वा **युक्तं मधुर**मित्युक्तम् ॥ अग्रे **मुक्तं मधुरं** निरूप्यते । तस्यायं भावः । तत्तदङ्गपरमसौन्दर्यमाधुर्यावलोकनपूर्वकं नीवीपरिधापने सात्त्विकभावाविर्भावेन करकमलान्नीवी स्खलतीति तत् स्मृत्वा **मुक्तं मधुर**मुक्तम् । अथवा, सौन्दर्यावलोकनार्थमेव करकमलान्नीवीं मुञ्चतीति तथोक्तम् । अथवा, परिहासार्थमपि तथा करोतीत्यनन्तप्रकारकभावसंवलितं मोचनमुक्तम् । अथवा, प्रौढानामेव मोचनमुच्यते । तदा 'नीवीं पति प्रणिहिते च करे प्रियेणे'त्युक्त्या तन्मोचनमाधुर्यं तदनुभवैकवेद्यमिति तत्स्मृत्वा तथोक्तम् ॥ अग्रे **दृष्टं मधुरं** निरूप्यते । तस्यायं भावः । तादृशे समये परस्परोच्छलितकामभावतरलतरावलोकनं परममधुरं भवतीति तथोक्तम् । अथवा, [1]व्रतस्थानामेतावत्पर्यन्तं कौमारभावसंवलितावलोकनमभूदधुनैव तथाविधकामरूपवसनपरिधापने तद्रसात्मकं परस्परं निरीक्षणं परममधुरं भवतीति तत्स्मृत्वा **दृष्टं मधुर**-

१ वृतार्थानामिति पाठः ।

रुक्तम् । तथा चोक्तं 'प्रेष्ठसङ्गमसर्जिता' इत्यस्य विवरणे 'रसात्मका जातास्ता' इति **श्रीभागवते** ॥ अतः परं श्रीमतः **शिष्टं मधुरं** निरूप्यते । अत्रायं भावः । व्रतस्थाः सर्वा ऋषयः । तेषां परमानुग्रहेण देहप्राणेन्द्रियान्तःकरणं तद्धर्मादयः सर्वे भगवता स्वविषयीकृताः, अधुना लीलात्मकस्वरूपप्राप्त्यनन्तरं तदीयपुंस्त्वाख्यो यो धर्मः सोवशिष्टः पृथक्तया भगवता स्वान्तःस्थापितोङ्गीकृतत्वात् । तद्धर्मरूपा एव ते वयस्याः, तेषां दर्शने तासां स्वधर्मरूपत्वाज्ञानाल्लज्जया विविधभावसंवलितवचनमाधुरीसमुद्रलहरीविलासा जाताः; तेषां तु [1]तद्धर्मरूपवयस्यत्वेन पृथग् विद्यमानत्वाद् भगवत्कृतिचातुर्यज्ञानेन स्वस्यापि तदङ्गीकृतिजनितरसात्मकभावरूपत्वसम्पत्तिज्ञानेन च विविधभावाकूतं तल्लीलावलोकनं भवतीति तत्स्मृत्वोक्तं **शिष्टं मधुरमिति** । तादृशलीलावलोकनमितरपुरुषाणां न सम्भवति रसाभाससम्पादकत्वात् । अथवा, उद्दीपनालम्बनविभावलीलानिरूपणानन्तरं 'शिष्टं मधुर'मिति निरूपणात् । शिष्टपदेन रमणमेवोक्तम् । तेन 'आत्तगजेन्द्रलील' इत्येतत्प्रकारकानिर्वचनीयमाधुर्यानुभवात् तथोक्तम् । अथवा शिष्टपदेन रत्यन्तो ज्ञेयः । तेन लोके तदन्ते विरतिर्भवतीति रसाभावो निरूपित इत्यतो भगवतस्तत्करणमपि मधुरमेवेह विरत्यभावादिति **शिष्टं मधुरमुक्तमिति** भावः ॥ तथा चोक्तं 'स्वरतिरात्तगजेन्द्रलील' इति । तादृशमपि भगवत्सम्बन्धिरससम्पादकमिति **मधुराधिपतेरखिलं मधुरमित्युक्तमग्रे** ॥ ७ ॥

अतः परं परेषामप्ययोग्यानां योग्यत्वं निरूपयन्ति **गोपा मधुरा** इति ।

**गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।**
**दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥८॥**

**गोपा** अन्तरङ्गाः शुद्धभावं प्रपन्नाः सङ्केतादिषु भगवल्लीलासाधकाः तत्तद्भक्तसङ्गमकरणैकतत्पराः सर्वदा भगवद्भावाविष्टाः [2]सर्वदानुभूतलीलागुणगानरसैकसरसमानसाः, अत एव बहिरपि तदेकरसार्द्रनयनाः तत्तत्प्रियासम्बन्धिवार्तानुवादकरणोपयोगित्वेन भगवतोऽतिप्रियाः, तादृशानां तेषां तावन्निखिलधर्मादिस्फूर्तौ **गोपा मधुरा** इत्युक्तम् । एतदेवोक्तं **वेणुगीते**

---

१ स्वधर्मरूपेति पाठः । २ पूर्वानुभूतेति पाठः ।

'एते देवाः साक्षिण' इति विवरणे ॥ ततोऽग्रे इतोऽप्ययोग्यानां माधुर्यं निरूपयन्ति **गावो मधुरा** इति । गावस्तु पशुत्वेन अत्यन्तं अयोग्याः, तथापि वेणुनादामृतप्रवेशे तासामपि रसात्मकालौकिकभावसम्पत्तिः पशुत्वधर्मनिवृत्तिपूर्वकं सम्पन्नेति 'गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैः पिबन्त्य' इत्यनेन निरूपितम् । अत एव गावोपि भावात्मकत्वेन मधुरा एवेति तथोक्तम् । अथवा, गावोऽनुभाविकाः, गोदोहनादिव्याजेन तत्तद्भक्तसंयोगे तत्तद्रसानु[1]भवकारिका इति विप्रयोगसमये तासां गवां दर्शनस्पर्शादौ तत्तत्प्रियावलोकनस्पर्शादिमाधुर्यानुभवो भवतीति तत्स्मृत्वा **गावो मधुरा** इत्युक्तम् ॥ अतः परमचेतनानां तत्रापि शुष्काणां मधुरत्वं निरूपयन्ति **यष्टिर्मधुरे**ति । **यष्टिर्नीरसा**, तस्या अपि मधुरत्वस्य सम्पादने अलौकिकं चरित्रं भगवतो निरूपितम् । अयं भावः । **यष्टिस्तु** नियामिका दण्डसाधिका भवति । रसात्मकलीलायां दण्डान्तराभावात् यष्टिनिरूपणेन दानलीला व्यज्यते । तेन दधिविक्रयार्थं निर्गतानां वने समागतानां व्रज[2]वल्लवीनां निरोधार्थं प्रवृत्तस्य तन्निरोधसाधिका यष्टिरिति ज्ञाप्यते । तथा च तन्निरोधकरणे परस्परोत्तरप्रत्युत्तररसार्णवे मग्नानां [3]समुत्तरणे सति प्रथमं निरोधव्याजेन परमलावण्यरससंवलितानेकभावोल्लसितापूर्वतररुचिरस्मित[4]स्मरोत्फुल्लविलोचनसुधासिन्धुप्रसृतमाधुरीभरातिमधुरापाङ्गभङ्गीभिरनङ्गरङ्गतरङ्गा-[5]नुत्तेजयता भगवता तासां वक्षःस्थलादिषु यष्टयैव स्पर्शः क्रियते, तदा करकमलसम्बन्धजनितरसात्मकयष्टिस्पर्शेन कुसुमशरस्पर्शाघातेनेव तासां **हृदयं** विविधभावोद्घुर्णितं भवतीति तन्माधुर्यं तासामेव वेद्यं, नान्येषाम्, स्वस्य तदनुभवात्। तत्स्मृत्वा **यष्टिर्मधुरे**त्युक्तम् ॥ एवं लोकदृष्ट्या अयोग्यानामपि भगवत्सम्बन्धित्वेन मधुरत्वं निरूप्य लीलासृष्टिः सर्वापि मधुरैवेति निरूपयन्ति **सृष्टिर्मधुरे**ति । अयं भावः । 'पुष्टि कायेने'ति वाक्यात् साक्षाद्रसात्मकभगवच्चरणारविन्दरजआदितदप्राकृतभूतसम्पादितस्वरूपा लीलासृष्टिः, तत्र यस्य यादृशं रूपमपेक्षितं तादृशमेव भवितुमर्हतीति लोकदृष्ट्या

---

१ अनुभाविका इति च पाठः । २ तरुणीनामित्यपि पाठः । ३ समुत्तरणेति पाठः । ४ स्मेरोज्ज्वलेति च पाठः । ५ उच्चिनयतेति पाठः।

[1]यष्टेः नीरसत्वेपि रसात्मकसृष्ट्यन्तर्गतत्वेन भावात्मकत्वात् तस्या मधुरत्वं निरूप्य सृष्टिरेव सर्वा मधुरेति ज्ञापनाय **सृष्टिर्मधुरेत्युक्तम्** ॥ एवं भगवतः सर्वं रसात्मकमिति निरूप्य तादृशस्य स्वरूपनिरूपणपूर्वकं उपसंहरन्ति **दलितं मधुरं फलितं मधुर**मिति । अत्र भगवतो रसात्मकफलरूपत्वाद् व्रजसीमन्तिनीनां तद्दलत्वेनोपभोगयोग्यत्वेन माधुर्यं निरूपितम् । एवं सति फलस्य वृक्षाश्रयत्वाद् भगवतो वृक्षरूपत्वमपि निरूप्यते । तथा चोक्तमपि **श्रीप्रभुचरणैः** 'नन्दगेहालवालोदितस्त्रीरागसेकसंवृद्धसुरवृक्षं' तथा 'भावैरङ्कुरितं महीमृगदृशामाकल्पमासिञ्चित'मिति । लोके वृक्षस्य फलमेव उपभोग्यं भवति । अयं तु अङ्कुरमारभ्य फलपर्यन्तमनवरतसुरवृक्ष एव रसात्मक उपभोक्ष्यते इति ज्ञापयितुं **दलितं मधुरमित्युक्तम्** । वृक्षस्य यथा प्रथममङ्कुरमारभ्य पल्लवशाखाकलिकापुष्पफलानि क्रमशो भवन्ति, तथास्यापि नन्दगेहालवाले प्राकट्यादारभ्य बाल्यकौमारपौगण्डकैशोरपर्यन्तं सर्वदा रसात्मकत्वेन उपभोग्यत्वमेवेत्यलौकिकत्वेन ततो वैलक्षण्यं निरूपितम् । किञ्च, अयं रसात्मको वृक्ष इति रसस्य भावात्मकत्वेन भावानां कोमलप्रौढतरादिविविधविचित्ररूपत्वादङ्कुरपल्लवादिरूपत्वं शास्त्रे निरूपितम् 'अङ्कुरपल्लवशाखेत्यादिने'ति । तादृशत्वज्ञापनाय भगवतः पल्लवादिधारणं **श्रीभागवते** निरूपितं 'चूतप्रवालबर्हस्तबकोत्पलाब्जमाले'त्यत्र । तद्भावास्तु विवरणे 'वस्तुनिर्देशमात्रेणे'त्यादिकारिकाभिः स्फुटीकृता इति तत् सर्वं स्मृत्वा **दलितं मधुरं फलितं मधुर**मुक्तम[2]व्यवधानेन । किञ्च, अत्रोपक्रमोपसंहाराभ्यामपि अयमेव भावार्थः स्फुटीभवति । तथा च उपक्रमे अधरस्योक्तत्वात् उपसंहारे दलितस्य निरूपणाच्च अधरस्य दलरूपत्वेन उपक्रमोपसंहारसङ्गतौ सत्यां तन्मध्यपातिसम्पूर्णवृक्षस्यैव रसात्मकत्वेन उपभोग्यत्वमिति ज्ञापनार्थं अन्ते पुनः **फलितं मधुर**मुक्तमिति भावः । एवं सम्पूर्णवृक्षस्य रसरूपत्वं निरूप्य फलरूपत्वं निरूपयन्ति **फलितं मधुर**मिति । 'अतो निरोधो महाफल' इत्युक्तत्वात् फलप्रकरणीयपूर्णसंयोगरसानुभवानन्तरं विप्रयोगे श्रीमदुद्धवमिलनजनितोत्सवभराविर्भूतविचित्रभावा-

---

१ सृष्टेरिति पाठः । २ तदव्यवधानेति पाठः ।

मृतसिन्धुकल्लोलदोलायितव्रजयुवतिदेहप्राणेन्द्रियान्तःकरणादिषु [1]तत्तद्रूपेण निरन्तरं लीलाकरणरूप यत्फलितं तन्मधुरमित्युक्तम्. तथा निरोधस्य सम्पूर्णत्वादिति । अत एव 'उद्धवागमने जात उत्सवः सुमहान्यथे'ति निरूपितं निरोधवर्णने ॥ एवं फलपर्यन्तं निरूप्य भगवतो [2]ह्युभयरसात्मकत्वादुभयरसलीलापि सर्वा मधुरैवेति निरूपयन्तो निरोधसमाप्तिं निरूपयन्ति **मधुराधिपतेरखिलं मधुरमिति** । उभयरसरूपस्य सर्वं मधुरमेवेति निरूपणात्संयोगे यथा शृङ्गाररसान्तःपातित्वेन वीरादीनामपि मधुरत्वं, तथा विप्रयोगेपि अत्यार्त्या कथञ्चिदपि प्रियचरणसम्बन्धो भवत्विति बुद्ध्या कृतानां 'कस्याश्चित् पूतनायन्त्या' इत्यादिउक्तप्रकारकवीरादीनां रसत्वेन मधुरत्वमेवेति ज्ञापनाय अखिलमेव तादृशस्य भगवतो मधुरमित्युक्तं **श्रीमदाचार्यचरणैः मधुराधिपतेरखिलं मधुरमिति** ॥ ८ ॥

मधुराधिपते रूपमाधुर्यमधुराखिलान् ।
**श्रीमदाचार्यचरणान्** नमामि मधुरप्रदान् ॥ १ ॥
स्वतःसमुल्लसद्भूरिकरुणामृतकेलिनः ।
अनुग्रहानिलेनेद मानसं सुरभीकृतम् ॥ २ ॥
ततः स्फुटोऽभून्मधुरभावानां कोपि सौरभः ।
विकसच्छ्रीमदाचार्यमुखपद्म[3]सुधात्मनाम् ॥ ३ ॥
अगाधं माधुर्यं जयति मधुराधीशजलधे-
रगाह्यस्तल्लीलाम्बुधिमधुरिमा वागविषयः ।
अपि स्वाचार्यस्याम्बुजमधुरता तत्र कृपया
स्फुटा भावाः केचित् तदिह खलु बिन्दोर्विलसितम् ॥ ४ ॥
**श्रीविट्ठलेश्वर**पदाम्बुजमञ्जुमाध्वीमाधुर्यलुब्धमदमत्तमधुव्रतस्य ।
आनन्दगुञ्जितमिवालपितं ममेदं सौहार्दतः स्वसुहृदः परिशीलयन्तु ॥ ५ ॥

**इति श्रीवल्लभाचार्यसूनुश्रीगोस्वामिश्रीविट्ठलेश्वरदीक्षितात्मज-श्रीबालकृष्णकृतं श्रीमधुराष्टकविवरणं सम्पूर्णम् ॥**

---

१ तत्त्वरूपेणेति पाठः । २ रसात्मकस्येति पाठः । ३ आसवात्मवानिति आसवात्मनामिति च पाठौ ।

श्रीकृष्णाय नमः ।
श्रीगोपीजनवल्लभाय नमः ।
श्रीमदाचार्यचरणकमलेभ्यो नमः ।

# मधुराष्टकम्

## श्रीवल्लभकृतविवरणसमेतम् ।

जयन्ति जगतीतले भगवदास्यवैश्वानराः
स्वकीयजनभावनाप्रकटवल्लभाधीश्वराः ।
वियोगतरलीकृतव्रजवधूविलासं ययु-
स्त एव मधुराष्टके मधुरगीतपूर्णात्मकाः ॥ १ ॥
यत्करुणीकृतदृष्ट्या भावाः स्वत एव वर्धिताः सततम् ।
हृदये तदेकशरणे वन्दे तान् श्रीमदाचार्यान् ॥ २ ॥
श्रीमदाचार्यचरणकमलैकरसाश्रयः ।
संसिक्तहृदयात्माहं व्याख्यास्ये मधुराष्टकम् ॥ ३ ॥
सर्वाः सर्वात्मभावेन भगवद्गानतत्पराः ।
साक्षात्फलात्मरूपेण कृष्णेनाङ्गीकृता हि ताः ॥ ४ ॥
ततो मानादिभावेन स्वान्ते मानं परं दधुः ।
तद्वीक्ष्य भगवान्मध्यस्तिरोधानं चकार हि ॥ ५ ॥
तद्वर्ण्यते द्विधा तासु स्वरूपेण गुणेन च ।
गुणानामपि तादात्म्यं स्वरूपं वै रसाकरम् ॥ ६ ॥
'रसो वै स' इति श्रुत्या तत्तथैव निगद्यते ।
'यत्राकृतिस्तत्र गुणा' इति न्यायोपदेशतः ॥ ७ ॥
तस्मात्स्वरूपमाधुर्यं गुणानां वा तथैव च ।
विवेकरहिता भक्ता भावयेयुर्मुहुर्मुहुः ॥ ८ ॥
प्रत्यङ्गभावनापूर्वं गानं सर्वाः पृथक् पृथक् ।
कालक्षेपाय तास्तत्र कुर्वन्तीति परस्परम् ॥ ९ ॥

अथ **श्रीमद्वल्लभाधीशचरणास्तादृशीनां** भावं स्वहृदि समाधाय तत्तल्लीलानुभवं कुर्वन्तस्तादृशालापसंयुक्तगुणगानपराः सन्तो यथा कथञ्चिद्विप्रयोगकालक्षेपार्थं सर्वथा यत्क्षणमपि तेन विना स्थातुं न शक्यते, तदनिर्वाहकत्वेन कल्पान्तरोपसमकक्षत्वेन ' त्रुटिर्युगायते त्वामपश्यता ' मिति वाक्यात्तादृशभावयुक्तानां भावं चानुभूय स्वस्य प्रथममित्येव तदास्यरूपत्वेनोद्वताधरसुधापानकरणत्वेन च प्रार्थयन्ति **अधरं मधुर**मिति ।

**अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।**
**हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ १ ॥**

या सुधा सर्वाभोग्यरूपा, स्वामिनीनां गुणगानदशायामेव कर्णद्वारेण हृदये प्रवेष्टुं शक्या, तत्रापि तदधरसम्बन्धेनैव मधुरा, सा लोभात्मक अधर एव स्थापिता, तत्प्रार्थनायां तावन्मात्रमित्युक्तम् , तथा च तद्वद्गुणगानलीलासामयिकमनुभावादिकं सर्वं हृदि कृत्वेत्युक्तमित्यर्थः । यद्वा । अधरमेव मधुरमिति स्वामिनीनामिव भगवतस्तद्गुणालापेनैवोत्कण्ठाविरहशामकत्वात्तद्भावापन्नमिति सार्वदिकं सूचितम् । तेन तद्विना क्षणमपि कुत्रापि स्थातुं न शक्नोतीति भावः । तादृग्भावसम्पादने **श्रीमदाचार्याणामेव** श्रीयमुनावल्लीलोपयोगित्वादिकमस्तीति ज्ञापनायाप्युक्तम् । अथवा । पूर्वोक्तभाववतीनामवस्थां दृष्ट्वा स्वस्मिन्नपि तद्भावापन्नतया विप्रयोगरसानुभवार्थं तद्भावपूरकत्वेनानन्यधर्मस्फूर्त्या कथमपि शरीरसम्पादकत्वेन च रसवशात्तथैवोक्तम् । अत एव 'तत्कथाक्षिप्तचित्त' इति **सर्वोत्तमे प्रभुभि**र्निरूपितम् । अथवा । समानशीलव्यसनवत्त्वेन सजातीयतादृशीभिः सह लीलामृतजलधिमध्यपातित्वादवगाहनपूर्वकं **माधुर्य**विशिष्टमधरमेव प्रार्थयन्ति । तथा च विविधलीलाभावतरङ्गनिमग्नत्वे तदाधारत्वेनैव स्वस्वरूपस्थितिरिति भावः । अत एव तृतीयाध्याये'प्यधरसीधुनाप्याययस्व न' इति । अथवा । स्वस्य तदास्यरूपत्वेन प्रतिक्षणं तदधरसुधासंवलितत्वानुकूलकृतिकरणत्वेन चैतयोर्व्यापारसत्त्वादिति सर्वदा तदनुभवेनाधुनापि पूर्वात्परस्पराश्रयानुभूतं स्मृत्वा तासां भावपोषणार्थं सम्प्रत्येकां प्रत्यवदन् **अधरं मधुर**मिति ॥ एवमधरशोभाजनितमाधुर्यं निरूप्य वदनशोभां निरूपयन्ति **वदनं मधुर**मिति ।

पूर्वोक्तभाववतीनां सर्वदा भक्तिरूपभगवन्मुखारविन्ददर्शनेनोत्कटभावजनित-तापोपशमनत्वादिदानीं तद्राहित्येन कथं तत्तापशान्तिरिति परस्परं तद्गतमाधुर्यनिरूपणार्थमत्यार्तिपूर्वकं तद्विषयकं दर्शनमेव भावयन्ति । तथा च । तादृगवस्थायां सर्वथा जीवनासम्भावनायां स्वाम्यनुपयोगदशायां तदनुभवः स्वास्थ्ये हेतुरिति तथात्रापीति । अथवा । स्वामिनीनां फलरूपं तावदिदमेव यतः प्रातरागम्य सायमागमनपर्यन्तं तद्भावनपर्यन्तं तद्भावनया तावत्पर्यन्तमपि विधुचकोरवत्स्मरणमात्रेणैव तावत्कालं कथमपि नीयते । पुनस्तत्समयप्रतीक्षयैव तादृगुच्छलितरसस्वभावत्वात्सन्मुखाभिसरणादिकमपि क्रियत एव । तदैव भगवानपि मयूरानुकरणपूर्वकं नृत्यं कुर्वन् तादृशकटाक्षावलोकनादिभिस्तासां सर्वभावपूर्वकमनोरथमापूरयन् गोष्ठं प्राप्नोतीत्यर्थः । अत एव 'मुदितवक्त्रमुपयाति दुरन्त मोचयन्व्रजगवां दिनताप'मिति । एतावन्मात्रं सर्वं हृदि धृत्वा **वदनं मधुर**मित्युक्तम् । यद्वा । 'बर्हापीडे'ति श्लोके गोपिकानामेव भावरूपस्तदर्थमेव कोटिकन्दर्पलावण्यरूपो भगवान् प्रकटः कृष्ण इत्युच्यते । तस्मात्स्वामिनीनां यत्फलितं फलं तदनुभूय समानशीलव्यसनवतीषु तावदिदमेव निश्चीयते । 'अक्षण्वतां फलमिदं न परं विदाम' इति ताभिर्गीतमपि । तथा सति फलसम्बन्धि मधुरत्वमित्युक्तम् । यद्वा । वदनस्य चन्द्रोपमत्वमपि घटत एव । यथा शीतलत्वात्तापहारकत्वाज्जीवनसम्पादकत्वाच्च भगवन्मुखचन्द्रोपि तासां सुखदोस्तीति भावः । अथवा । स्वास्यं तदास्यरूपत्वेन प्रतिस्वामिनीमाननिराकरणदशायामपि तद्गुणानुवादार्थं मध्यस्थतया प्रत्युपकृतित्वेन च सर्वदोभयरसप्राप्तावपि माधुर्यविशिष्टं कटाक्षादिभावयुक्तं वदनमप्यनुभवयोग्यं करोतीति फलितम् । अत एव 'मधुरया गिरा वल्गुवाक्ययये'त्युक्तम् । एतत्सर्वं हृदि कृत्वा **वदनं मधुर**मित्युक्तम् ॥ एवं वदनशोभाजनितमाधुर्यं निरूप्य नयनशोभाजनितमाधुर्यं निरूपयन्ति **नयनं मधुर**मिति । एतद्भाववतीनां तु भगवद्दीक्षणमात्रेणैव कामभावजननात्तासामिन्द्रियादिषु तद्व्यापारसत्त्वात् क्षणमात्रमप्येताः स्थातुं न शक्नुवन्तीति, तथावस्थायां तादृग्दीक्षणापेक्षायां तस्यैव स्वरूपभावनं चक्रुः, नो चेत्तद्विना बलराहित्येन विरहसामयिकं जीवनमेव न

सम्भवेत्, तथा सति तावद्दीक्षणमात्रेणैव तासां जीवनमुचितमिति भावः । अत एव 'त्वत्सुन्दरस्मितनिरीक्षणे'त्यभिप्रायेण **नयनं मधुर**मित्युक्तम् । अथवा । नयनमिति जात्यभिप्रायेणैकवचनम् । तथा सति स्वामिनीनां कटाक्षादीन्यलससंवलितानि भावरूपाणि प्रियावलोकनरूपाणि भगवन्नयने प्रतिबिम्बितानि तद्भावपूर्वककटाक्षावलोकनानुसन्धानेन मधुरत्वप्रतीतिरित्यपि सुष्ठूक्तिः । अत एव 'शश्वत्प्रियासितापाङ्गे'त्यत्र तथैव निरूपणादिति भावः । यद्वा । नयतीति नयनं, तेन सर्वान् लीलासृष्टिस्थान् भजनानन्दानुभवार्थं स्वरूपानन्ददानार्थं च लीलामृतसमुद्रादुद्धृत्य तदनुभवं कारयित्वा नेत्रद्वारेण पुनस्तत्रैव तथा लीनान् करोतीति फलितमित्यर्थः । अत एव 'प्रहसितं प्रिय प्रेमवीक्षण'मिति ताभिर्गीतम् । अथवा । स्वस्य सन्नियोगशिष्टत्वेन तावन्मात्र सर्वं हृदि कृत्वा **नयनं मधुर**मित्युक्तम् ॥ एवं नयनशोभाजनितमाधुर्यं निरूप्य हास्यशोभाजनितमाधुर्यं निरूपयन्ति **हसितं मधुर**मिति । एतद्भाववतीनां मानसस्य त्रिगुणात्मकत्वेन निरूपणाद्भगवानपि प्रेमहासावलोकनपूर्वैकैस्त्रिभिः कृत्वा तद्धरणं करोतीति तदाक्षिप्तमनाः सत्यः स्वप्रेष्ठमपि नालोकितवत्यस्तावत्कालं कथमपि वहन्त्यस्तद्धसितस्य माधुर्यं स्वस्वास्थ्यहेतुतया सम्प्रति निरूपयन्ति । तथा सति तद्धर्मपुरःसरत्वेन तद्धासससापेक्षकमाधुर्यावलोकनेनैव जीवनसम्भावना, नान्यथेति भावः । अत एव 'उदारहासद्विजकुन्ददीधिति'रिति लीलोपयोगित्वेन निरूपितम् । यद्वा । भगवतः सर्वदा लीलापरवशत्वात्तत्तद्भक्तभावानुकूलत्वेनैव स्थितिश्चोच्यते । तेन तत्तद्भावानुरूपहास्योक्तिरपि निश्चीयते । तस्मादेतासां वियोगभावजनितहास्यप्रार्थनायां तद्धसितस्य जीवनसम्पादकत्वात्सुधारूपमाधुर्यं प्रार्थयन्तीति भावः । अथवा । स्वस्य तदास्यरूपत्वाद्धासस्य तदाधारकत्वेन प्रतिक्षणं स्वामिनीविषयकमपि तदनुभूय तत्सम्बन्धेन द्विगुणितमाधुर्यं भावयन्तीति **श्रीमदाचार्यैस्**तावन्मात्रमपि सर्वं हृदि धृत्वा **हसितं मधुर**मित्युक्तम् ॥ एवं हास्यजनितमाधुर्यं निरूप्य हृदयमाधुर्यं निरूपयन्ति **हृदयं मधुर**मिति । तिरोधानदशायामपि भगवानेतासां हृद्येव स्थितः, न त्वन्यत्र, नो चेत्, तासां लीलाभावमेव न सम्भवेदतोऽन्यत्रापि स्थितिः, परं भावरूपेणात्रैव

ज्ञायते । किञ्च, धर्मसहित एव हृदयारूढो जातो, न तु केवलं धर्मः, तस्मिन् समये तद्धृदयसम्बन्धमात्रेणैव तथैवोक्तमित्यभिप्रायो ज्ञापितः । यद्वा । रसोद्बुद्धदशायामपि विपरीतानुकरणत्वोक्त्या तद्धर्मान् स्वस्मिन्नपि स्थापितवत्यः, स्वधर्मास्तास्वेव स्थापयन्ति इति विशेषतः परस्परं हृदयोपगूहनं जातमिति तथैवोक्तम् । तथा सति तद्भावानुकृत्यालिङ्गनपूर्वकृतिमत्त्वादिधर्मसहितत्वेन हृदयं मधुरमेव प्राप्तमिति भावः । अथवा । हृदय एव स्वामिनीभावनिरूपकत्वेन भगवानपि स्वस्मिंस्तद्धर्मान् संस्थाप्य तद्भावमङ्गीकरोति । तथा सति सर्वभावप्रपत्तावेताभिस्तद्भावात्मकं हृदयं मधुररूपेणैवानुभूतमिति भावः । अथवा । स्वस्य भगवदात्मकत्वेन स्वामिनीभावसन्नियोगशिष्टत्वेन च सर्वदोभयरसात्मकं हृदयं चानुभूय **मधुर**मित्युक्तम् ॥ एवं हृदयमाधुर्यं निरूप्य गमनमाधुर्यं निरूपयन्ति **गमनं मधुर**मिति । भगवतो भावात्मकत्वाद्भावानुकरणकृतिमत्त्वाच्च लीलोपयोगिनीनां हृदयदेशे भावरूपेणैव गमनं करोतीति सर्वत्र गमनशील एव भवति । अत एव तद्भाववतीनां हृदये भावानुकूललीलाविष्करणार्थं मानादिदोषदूरीकरणार्थं च तत्तद्भावरूपेण गमनं, तत्रापि रसानुभावकत्वेन तदनुकूलभजनानन्ददानेन वा गमनं तथैवोक्तमिति भावः । अथवा । यदैतासां परित्यज्यान्यत्र वनान्तरमपि गच्छेत् तदा द्रुमलतादीन् ता एव पृच्छन्ति । अत्रैव समागतोऽयं नन्दसूनुर्भवद्भिर्दृष्टश्चेतः सूचनीय इत्यर्थः । नो चेत्, कथं पदपङ्क्तिर्भूमौ दृश्यत इति तद्दर्शनानां मनोनुरञ्जकत्वेन **गमनं मधुर**मित्युक्तम् । तथा सति सर्वथेदानीमयमपि यत्र कुत्र वा हर्षादिपूर्वकं गमन प्रापयिष्यतीति भावः । यद्वा । तत्सन्नियोगशिष्टत्वव्यतिरेकेणापि विप्रयोगपुष्टीकरणेऽप्यसमर्थः स्यादतो भावनायां साक्षात्स्पर्शाभावादाविर्भूतलीलायां गतिर्गमनमिति तत्प्राप्तिः सूचिता । तथा सति संयोगरसानुभवकर्तृणां विप्रयोगरसस्य तत्पूर्वाङ्गित्वात्तेन विना तदसम्भवात्तत एवातिप्रियत्वेन माधुर्योक्तिरिति भावः । अथवा । स्वस्य भगवत्सहकारिगमनशीलत्वेन यत्र यत्र भगवानागच्छति तत्र तत्रैव अन्तः स्वयमपि स्थितः सन् तादृशीनां हृदि गमनपूर्वकमाधुर्यं चानुभूय **गमनं मधुर**मित्युक्तम् ॥ एवं गमनमाधुर्यं निरूप्य धर्मित्वेन च माधुर्यं निरूपयन्ति

**मधुराधिपतेरखिलं मधुरमिति** । भगवतो रसात्मकत्वात्तल्लीलाया अपि रसात्मकत्वं, यथा स्वरूपेऽनुभवादीनां भावनापर्यवसायित्वं, तथा लीलायामपि ज्ञापयितुं तास्ता अनुचक्रुरित्युक्तम् । तेन स्वरूपस्य लीलात्मकत्वात्तदधीनत्वाच्च सन्नियोगशिष्टत्वादपि यत्र यत्र लीला भवति तत्र तत्र स्वरूपमप्युद्बुद्धं भवतीति निर्गलितार्थः । यद्वा । यत्राकृतिस्तत्र गुणा वसन्तीति न्यायेन गुणानां माधुर्येणैव निरूपणत्वात्तदधिष्ठातर्यपि माधुर्यवाचकत्वे किं वाच्यमिति कैमुतिकन्यायः प्रदर्शितः । तथा सति **मधुराधिपतेर्**भगवतो **यदखिलं** लीलात्मकं स्वरूपात्मकं वा तत्सर्वं **मधुर**मेव भावनीयमिति दिक् । अथवा । स्वस्य सन्नियोगशिष्टत्वेनैव स्वरूपात्मकत्वं लीलात्मकत्वं च बोधयन्स्वकीयान्प्रति तादृग्भावपरवशत्वादतिकरुणत्वेन तथैवोक्तवानिति भावः । अत एव 'तल्लीलाप्रेमपूरित' इति **सर्वोत्तमे प्रभुभि**र्नाम निरूपितम् ॥१॥

एवं लीलानुभावज्ञाः सात्त्विकादिगुणान्विताः ।
पुनस्तद्गतमाधुर्यभावनं कर्तुमुद्यताः ॥ १ ॥
तथैव **श्रीमदाचार्यास्तासां** भावं विभाव्य च ।
विप्रयोगरसं प्राप्य संगतास्तदधीनताम् ॥ २ ॥

**वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।**
**चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥२॥**

**वचनं मधुरमिति** । भगवद्वचनं भक्तानामाकारणार्थं जातमिति यदैव तामिः श्रुत तदैव गृहादिकं सर्वं त्यक्त्वा शीघ्रतया तद्भावाधीनत्वेनैव यत्र भगवांस्तिष्ठति तत्रैव ताः समागच्छन्तीति पुनः प्रश्नानुकरणकृतिमत्त्वेन तद्वचनानां मधुरत्वप्रतीतिरिति तथैवोक्तम् । यद्वा । भगवता निषेधव्यतिरेकेणापि यानि वाक्यानि प्रियरूपेणैवोक्तानि तान्येव मधुराणीति वा । तथैव बोधनार्थं तदधिकारसंपत्तावपि तैरेव प्रार्थनं कृतवत्य इत्यपि सूचितम् । तथा सति तद्व्यतिरेकेणासां जीवनसम्भावनैव नास्तीति भावः प्रतिफलितः । अत एव 'संरम्भगद्गदगिरो ब्रुवतानुरक्ता' इत्युक्तम् । अथवा । स्वस्य सन्नियोगशिष्टतासम्पादकधर्मवत्त्वेन तासां विलासात्मकं लीलात्मकं ह्यनुभूय

तथैवोक्तम् ॥ एवं वचनमाधुर्यं निरूप्य चरितमाधुर्यं निरूपयन्ति **चरितं मधुर**मिति । भगवतश्चरित्रमपि पूतनासुपयःपानादिकं तत्तल्लीलानुकरणपूर्वकं भगवति हृद्याविर्भूते तदात्मकत्वात्तदनुकरणं शक्वयमिति तद्भावनया तत् कृतवत्यः पश्चात् तेन चरितावगाहकरसात्मकमाधुर्यं भावयन्तीति भावः । यद्वा । 'दावाग्निं पश्यतोल्बण'मिति वाक्यात्तादृशीनामतिभीतानां तल्लीलावेशवतीनां विरहसामयिकं सर्वं तादृशमेव ज्ञायते । यत एतादृशीनामेव दावाग्निदर्शनं नान्यासामिति तादृशेपि समये जीवनाभावमालक्ष्य तत्प्रतीकाररूपमाधुर्यं प्रार्थयन्तीत्यर्थः । तथा सति जीवनसम्भावनापूर्वकमाधुर्यावगाहकत्वेन लीलानुकरणमिति भावः । अथवा । स्वामिनीनां तान्येवातिप्रियाणि यानि भगवता बाल्यानुकृतिमत्त्वेन रसात्मकानि कृतानि चरितानि तान्यपि मनस्यनुभूय ताभिस्तथैवोक्तमिति भावः । अथवा । स्वस्य तदात्मत्वात्तल्लीलावलोकनत्वाच्चरितानुगतमाधुर्यविलासादिकं विरहरसापन्नत्वेनैव प्रार्थयन्तीति भावः ॥ एवं चरितमाधुर्यं निरूप्य वसनमाधुर्यं निरूपयन्ति **वसनं मधुर**मिति । स्वामिनीनां कटाक्षावलोकनादिभावपरिपूर्णस्योद्बुद्धरसात्मकस्य भगवतो लीलामृतसमुद्रत्वेनोच्छलिततरङ्गत्वादाच्छादकशक्तिमत्त्वेन पीताम्बरधारणं त्वावश्यकमिति तद्वेष्टितत्वेनैव रसाधायकत्वं ज्ञायते । अन्यथा तादृशोद्बुद्धरसात्मकस्वरूपं निरीक्ष्य विमोहिता एव स्युः, लीलाऽपि न स्यादतोपि तद्ग्रहणं युक्तमेवेति तत्साहायकत्वेनैव रसप्राप्तिः सूचितेति भावः । तदेव मधुरमिति प्रार्थनायां ताभिस्तथैवोच्यत इत्यर्थः । अत एव, 'कनककपिशं वासो बिभ्रदि'त्युक्तम् । अथवा । स्वस्य तदात्मकत्वेन तादृशोद्बुद्धरसात्मकदशायामपि तदपेक्षणीयत्वात्पूर्वोक्तमपि सर्वं हृदि कृत्वा तथैव प्रार्थनं कृतमिति भावः । अत एव 'मालानुपृक्तपरिधानविचित्रवेषा'-विति ॥ एवं वसनमाधुर्यं निरूप्य वलितमाधुर्यं निरूपयन्ति **वलितं मधुर**मिति । भगवतो गोपालैः सह वनगमनं तु प्रत्यहमिति गाश्चारयन्निकुञ्जगह्वरादीन्वीक्ष्य, तान् गोचारणार्थं वनान्तरे प्रेषयित्वा यद्गोवत्सादिकं तु तत्रैवास्तीति तदपि विज्ञापयित्वा स्वयं विश्रामं करोति । तत्रापि सख्यादिप्रेरणया सर्वदा तद्भावाधीनत्वात्तद्विप्रयोगजनितखेददूरीकरणार्थं क्रीडादिकमपि

करोतीति तादृशीनां तत्समय एव दानावसर इति सूचितम् । अलस इति शेषः । तथा सत्यलसवलिताद्धि कटाक्षाणां माधुर्यं स्मृत्वा तथैव प्रार्थयन्तीति भावः । अथवा । सर्पमणिनृत्यन्यायेनापि रसवशात्तद्भावपुरःसरो भूत्वा तादृशानुकरणपूर्वकं नृत्य कुर्वन् वलितरूपं जातमित्यर्थः । तेन त्रिभंग-ललितस्वरूपविशिष्टमाधुर्यादिकमनुभूय ताभिस्तथैवोक्तमिति भावः । यद्वा । स्वस्य तत्स्वरूपात्मकत्वेन तत्तद्रसानुभवकर्तृत्वेन सर्वदा सन्नियोगशिष्टत्वाव-गाहकधर्मत्वेन च तादृशमेव माधुर्यं प्रार्थ्यत इति भावः ॥ एवं वलित-माधुर्यं निरूप्य चलितमाधुर्यं निरूपयन्ति **चलितं मधुरमिति** । भगवत-श्चलनं, तदपि सायमागमनसमये कुन्ददामकृतकौतुकवेषत्वेन गवां पश्चाद् गोपैः सह हासपूर्वकलीलामाकलयन् नृत्यरसानुकूलकशक्तिमत्त्वेन तथा भाव-सम्पादकत्वेन च तथा भवतीत्यर्थः । तेन तादृशीनां मनोभिलाषादिकं मन्थरगतिचलनेनैव सिध्यतीति चलनविशिष्टमाधुर्यं प्रार्थयन्तीति भावः । अथवा । स्वामिनीनां भावपूर्णकटाक्षावलोकनेन तादृशोद्बुद्धरसात्मकः सन् तदैव तासां मनोरथादिकमापूरयन् तादृग्दर्शनलाभसंतुष्टतया मुहुर्मुहुस्ता-दृशमाधुर्यावलोकन कुर्वन् व्रजं प्रविशतीत्यर्थः । तथा सति अन्तरङ्गभक्तानां तादृशानुभवकर्त्रीणामन्योन्यविलासादिकृतमाधुर्यभावनं तु युक्तमेवेति भावः सूचितः । अथवा । स्वस्य तत्सन्नियोगशिष्टत्वापन्नत्वेनोभयरसानुभवकर्तृत्वेन प्रतिक्षणं चलनविशिष्टमाधुर्यं प्रार्थयन्तीति भावः ॥ एवं चलितमाधुर्यं निरूप्य भ्रमितमाधुर्यं निरूपयन्ति **भ्रमितं मधुरमिति** । भगवतो बाल-दशायामपि प्रतिस्वामिनीभावपूरकत्वेन तत्तन्मनोरथपूरणार्थं तासां गृहे क्रीडाव्याजेन स्वयमभिसरण करोतीति रसशास्त्रे तथैवोक्तत्वादित्यर्थः । तेनालम्बनविभावाधीनत्वेन रसस्योक्तत्वात्पुष्टीकरणार्थं तथाकरणमिति भावः । यद्वा । भगवतोऽनन्तशक्तिमत्त्वान्मातृचरणादीनां निकट एव स्थितः सन् सर्वाज्ञातरूपत्वेन समानशीलव्यसनवतीनां गृहेषु गत्वा यत्नादिकं कुर्वन्नपि हस्तेन शिक्यमवलम्ब्य प्रत्यहं दधिनवनीतादिकं चोरयतीत्यर्थः । तथा सति सार्वदिकरसानुभवकर्त्रीणां तथानुभववत्त्वाद्वैतच्चौर्यविशिष्टमाधुर्यभावनं तु युक्त-मेवेति भावः । अत एव 'प्रहसितमुखी न शुपालब्धुमैच्छ'दिति ॥ एवं

धर्मविशिष्टं माधुर्यं निरूप्य धर्मिविशिष्टमाधुर्यं निरूपयन्ति **मधुराधिपतेरखिलं मधुरमिति** । न केवलं धर्माणामेव प्रार्थनमुचितं, किन्तु तद्विशिष्टधर्मिण एवेति तद्गुणसंविज्ञानबहुव्रीहित्वेन लम्बकर्णमानयेत्यत्र तथैवानुभवसत्त्वात् तथैवोच्यत इत्यर्थः । तथा सति माधुर्यविशिष्टषड्गुणैश्वर्यात्मकस्य भगवतो मधुराधिपतेर्यदखिलं तत्सर्वं तत्स्वरूपमाधुर्यवद्भावनीयमिति भावः । अत एव 'नवीनमधुरस्नेहः प्रेयसीप्रेमसञ्चय' इति ॥ २ ॥

एवं लीलात्मकास्तास्ताः पुनस्तास्ता विचेतसः ।
कुर्वन्तीति रसावेशात् कालक्षेपाय सर्वथा ॥ १ ॥
तद्वदेव सदा **श्रीमदाचार्या** भावतत्पराः ।
माधुर्यानुभवज्ञास्ते तल्लीलां वर्णयन्ति हि ॥ २ ॥

**वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ ।**
**नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ॥३॥**

**वेणुर्मधुर** इति। भगवताधरसुधाभोगोपभोगित्वेन स अधर एव स्थापितस्तत्रापि हस्तयुगलचालनेन तत्साहाय्यकतया स्वयं रसाविष्टो जात इत्यर्थः । तेन मयूरानुकरणपूर्वकनृत्यकरणतदधीनत्वेनैवेति ज्ञापनायापि माधुर्यानुभवपूर्वकं तथैव प्रार्थयन्तीति भावः । अत एव 'रन्ध्रान्वेणोरधरसुधया पूरय'-मित्युक्तम् । अथवा । गोचारणक्रीडायामपि वेणोरावश्यकत्वाद्वंशमाह्वानादिकं तु तेन विना न संभवतीत्यर्थः । किञ्च, संकेतस्थले सखीनामाकारणार्थं नादमयस्पष्टीकरणार्थं च तासां हृदि प्रविश्य वेणुरेव सर्वं सूचयतीत्यर्थः । तथा सति भगवान्वेणुव्यतिरेकेण रासमेकं विहाय किमपि कर्तुं न शक्नोतीति लीलायां वेणुकर्तृकमाधुर्यं भावयन्तीति भावः । अत एव वेणुरपि सहायतां प्राप्स्यतीत्युक्तमप्याचार्यवर्यैः फलप्रकरणोपक्रमे । यद्वा । स्वस्य भगवदास्यस्वरूपत्वेन तदाधारकवेणुरूपत्वेन च तयोः सन्नियोगशिष्टत्वात्तत्कृतमाधुर्यानुभवं कुर्वन्तीति भावः ॥ एवं वेणुमाधुर्यं निरूप्य रेणुमाधुर्यं निरूपयन्ति **रेणुर्मधुर** इति । यच्चरणरजो ब्रह्मादीनामपि दुर्लभं, तदर्थं तपः कुर्वन्ति, परन्तु नाद्यापि प्राप्तम् । किञ्च, लक्ष्मीरपि तद्रजःकामनयान्यसुरप्रयासशङ्कया

वा तत्प्राप्त्यर्थमेव माहात्म्यज्ञानपूर्वकभक्तिभावात्तच्चरणमेवाश्रयतीत्यर्थः । तथा सति भगवच्चरणानामरविन्दपदोपादानत्वात्परागोपलक्षकरजोमाधुर्यं प्रार्थयन्तीति भावः अत एव 'गोविन्दांघ्र्यब्जरेणव' इत्युक्तम् । अथवा । भगवतः स्वामिनीभावाधीनकृतिमत्त्वेन तच्चरणरजःकामना तु सर्वदैव तिष्ठतीति तद्भावोपलब्धौ तादृशीभिस्तथैवोक्तमित्यर्थः । तेनोभयचरणरजःकामनयैव तादृशीनां जीवनसंभावनम्, नान्यथेति भावः । यद्वा । स्वस्य तदात्मकत्वादुभयसंबन्धसंपादकत्वेनोभयत्रापि परस्परं चरणरजःकामनापूर्वकमाधुर्यं निरूपयन्तीति भावः ॥ एवं रेणुमाधुर्यं निरूप्य पाणिमाधुर्यं निरूपयन्ति **पाणिर्मधुर** इति । भगवता गोवर्धनधारणं तु गोकुलरक्षायै कृतं, गोकुलरक्षणं तावदनन्यस्वामित्वेनेत्यर्थः । तेन भक्तवात्सल्यानुग्राहकशक्तिमत्त्वेन गोपगोपीगवामपि तदन्तःस्थापयित्वा छत्राकमिव तदुद्धरणं करोतीति भावः । तदा जीवनसंपादकत्वेन च तन्मुखावलोनकपूर्वकमाधुर्यं पाणावेवेति ज्ञापनायापि तथैव प्रार्थयन्तीत्यर्थः । अनेन भगवतोऽनन्यगोकुलस्वामित्वं सूचितमिति भावः । यद्वा । स्वामिनीनां चूडाबन्धनादिकृतिमत्त्वेन केशप्रसाधनं तु पाणिकृतमेवेति तत्र अग्रे पुष्पाणि संस्थाप्य स्वयमेव सर्वं करोतीत्यर्थः । तथा सति तादृशीनां तादृक्पाणिकृतमाधुर्यावलोकनं तु युक्तमेवेति भावः । अथवा । स्वस्य भगवत्सन्नियोगशिष्टतानुकूलशक्तिमत्त्वेन तत्सख्याधिकरणत्वात्तत्सामयिकं पाणिकृतमाधुर्यं प्रार्थयन्तीति भावः ॥ एवं पाणिमाधुर्यं निरूप्य पादमाधुर्यं निरूपयन्ति **पादो मधुर** इति । भगवति जीवैर्नमनातिरिक्तं कर्तुं न शक्यमिति तादृशनमनाधिकारशक्तिमत्त्वेन तादृशभात्रोपलब्धौ तदात्मकाः सत्यः स्वशिरसा माधुर्यविशिष्टपादतलस्पर्शनं कुर्वन्तीत्यर्थः । अत एव 'सन्त्यज्य सर्वविषयांस्तव पादमूल'मित्याद्युक्तयः । तेन तत्संबन्धव्यतिरेकेणासां जीवनसंभावनाभाव इति भावः । यद्वा । अविचार्य प्रियत्वकरणं तु दासानामेव धर्मो, नान्येषां, तेन तादृशवनविहारजनितश्रमनिराकरणार्थं भगवतः पादसेवनं त्वावश्यकमिति तथैव प्रार्थयन्ति इत्यर्थः । तथा च स्वधर्मावबोधकशक्तिमत्त्वेन दास्यानुकरणपूर्वकं माधुर्यविशिष्टपादसेवनं कुर्वन्तीति भावः । अथवा । स्वस्य तदास्यरूपत्वेन तदात्मकत्वात्तादृक्श्रमादिकं सर्वं विज्ञाय तादृशीभिः सह

तथैव सेवनं भावयन्ति इति भावः ॥ एवं पादमाधुर्यं निरूप्य नृत्यमाधुर्यं निरूपयन्ति **नृत्यं मधुरमिति** । यदि ताः सर्वथा भगवद्व्यतिरेकेण स्थातुं न शक्नुवन्ति तदा भगवांस्तासां तादृशोत्कटभावं वीक्ष्य तादृशीभिः सहोद्बुसहोद्बुद्धशृङ्गाररसात्मकस्वरूपेण तासां स्वरूपानन्ददानार्थं तन्मण्डलेन वेष्टितत्वेन नृत्य कुर्वन् रासलीलां करीतीत्यर्थः । तथा सत्यन्योन्यमुखावलोकनं गानपूर्वकमाधुर्यविशिष्टनृत्यानुकरणं प्रार्थयन्ति इति भावः । अथवा रसावेशदशायामपि यथा यथा हस्तकादिभावं प्रदर्श्य भगवान् नृत्यं करोति तथैता अपि पार्श्वभाग एव स्थिताः सत्यः पूर्णरसात्मकं नृत्यं कुर्वन्तीत्यर्थः । तेन मध्ये रसावेशभरेण काश्चिद् हृष्टरोमाः सत्यः भगवतश्चुम्बनादिकं कुर्वन्तीति भावः । यद्वा । रस एव रासस्तल्लीलाया एव फलदाननिश्चयात्स्वस्य तादृग्लीलानुभवपूर्वकरसात्मकत्वेन माधुर्यविशिष्टतादृशं नृत्यं भावयन्तीति भावः ॥ एवं नृत्यमाधुर्यं निरूप्य सख्यमाधुर्यं निरूपयन्ति **सख्यं मधुरमिति** । सख्यं तु समानशीलव्यसनेष्वेव, नान्यत्रेति, अत एवार्जुनादयो भगवदभिप्रेतकार्यकरणादविचार्य प्रियत्वकरणाद्वा त एवान्तरङ्गसखाय इत्युच्यन्ते । भगवानपि तदभिप्रेतकार्यकरणत्वात् स्वस्मिन् तादृशसखित्व मन्यते । तथा सति परस्परमनोरथाभिपूरकत्वेनैता अपि तद्भावानुकूलकमाधुर्यविशिष्टसख्यभावं प्रार्थयन्तीत्यर्थः । अत एव 'सखे दर्शय संनिधि'मित्येव प्रार्थयन्तीति भावः । अथवा । वयं तु ते प्रियाः, अस्मद्रक्षणं तु त्वया कर्तव्यमेव, नो चेन्नाथत्वमेव न संभवतीति तथैव संपादयेति प्रार्थना । अतोऽस्मदङ्गीकारार्थमेव व्रज एवाविर्भूत इति प्रयोजनवशात् सखिरूपेणास्मान्पालयतीत्यर्थः । किञ्च । यदि चेत् पालनं न करिष्यसि तदास्माकं प्राणा अपि स्थिरा न भविष्यन्तीति त्वदवतारप्रयोजनं व्यर्थमेव भविष्यतीत्येतावत्सर्वं विचार्यैव करणीयमित्यर्थः । तथा सति 'वीर योषितां सख उदेयिवान्सात्वतां कुल' इत्याद्युक्तयस्तथैवार्थं द्योतयन्तीति भावः । यद्वा । स्वस्य साक्षात्स्वरूपात्मकत्वेन समानशीलव्यसनत्वेन च तादृशीनां प्रार्थनादिक संवीक्ष्य स्वयमपि तादृशमाधुर्यविशिष्टसख्यं प्रार्थयन्ति इति भावः ॥ एवं धर्मविशिष्टमाधुर्यं निरूप्य धर्मिविशिष्टमाधुर्यं निरूपयन्ति **मधुराधिपतेरखिलं मधुरमिति** ।

लीलानां धर्मात्मकत्वात्तदात्मकाः सत्यस्तदानन्दानुभवं कृत्वा ताभिरेव भगत्स्फूर्तिर्जायत इति निश्चित्य तास्ता माधुर्यरूपेणैवानुभूय यत्रैतादृशं माधुर्यं यस्य तस्य मधुराधिपतेर्यदखिलं लीलाचरित्रावयवादिकं तत्सर्वं मधुरमेव भावयन्तीति भावः । आचार्या अपि तादृशानुकरणकृतिमत्त्वेन विप्रयोग-दशायां तथैव विभावयन्तीत्यर्थः ॥ ३ ॥

एवं पुनः प्रियाः सर्वा मिलित्वा यमुनातटे ।
भगवद्गीतमाश्रित्य तदेवाद्यानुवर्णयन् ॥ १ ॥
तथैव श्रीमदाचार्या विप्रयोगनिरूपणात् ।
तत्पुष्टीकरणाच्चात्र तत्स्वयं चानुवर्णयन् ॥ २ ॥

**गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।**
**रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ॥४॥**

**गीतं मधुर**मिति । गीतादि कामरसोद्बोधकं, तच्च स्त्रीणां विशेषत इति कामभाववतीनां तु ततोधिकं तदुद्बोधकं भवतीत्यर्थः । तथा सति स्वयमपि गान कुर्वन्त्यः परस्परं माधुर्यरसात्मकं वेणुकूजितगानं प्रार्थयन्तीति भावः । अत एव 'निशम्य गीत तदनङ्गवर्धन'मित्याद्युक्तम् । अथवा । गानं तु भगवत्कृतमेवेति तत्कर्तृकस्वरूपस्फूर्तौ तदालम्बनविभावत्वेन काम-भावत्वेन च भगवन्तमेव प्रार्थयन्तीति भावः । अत एव 'गायन्तं स्त्रियः कामयन्त' इति श्रुतेः । यद्वा । सायमागमनसमयेपि स्वामिन्यो व्रजाद्बहिरे-वागत्य तत्प्रतीक्षां कुर्वन्त्यस्तिष्ठन्तीति यदा पुनर्दूरत एव यथा यथा वेणु-कूजितगीतं शृण्वन्त्यस्तथा तथोद्बुद्धशृङ्गाररसात्मकस्वरूपनिरीक्षणार्थं निकट एव समागच्छन्तीत्यर्थः । तदा भगवानपि तद्भावात्मकस्वरूपनिरीक्षणार्थत्वेन तत्तन्मनोरथानुकूलकनृत्यं कुर्वन् गोपैः सह सांकेतिकं सर्वमेव सूचनार्थं तथा गीतं श्रावयतीत्यर्थः । तथा सति गीतकर्तृकसर्वव्यापारेणैव तादृशीनां फला-नुभूतिर्भवतीति भावः । अथवा । स्वस्य तदात्मकत्वात्तदनुभवयोग्यतासंपन्नत्वेन मध्यस्थतया तदनुगुणकार्यकर्तृत्वेन च प्रतिक्षणं तल्लीलायां माधुर्यविशिष्टगीतं प्रार्थयन्तीति भावः ॥ एवं गीतमाधुर्यं निरूप्य पीतमाधुर्यं निरूपयन्ति **पीतं मधुर**मिति । भगवतः पानं हि तत् । गोष्ठ एव स्वयं स्थितः सन्

गोपवेषदुग्धादि दोहनं कारयित्वा गोचारणात्पूर्वमेव तान्पाययित्वा स्वयमपि पीत्वा पश्चाद् वनगमनादिकं करोतीत्यर्थः । किञ्च, ये तृणादिकं न भक्षयन्ति, सर्वथा तदाधारत्वेनैव स्थिता भवन्तीति तान्वत्सानपि स्वहस्तेनैव पयः पाययतीत्यर्थः । तथा सति बाल्यानुकृतिमत्त्वेन भगवता यत्कृतं दुग्धपानादिकं तदेव प्रार्थयन्तीति भावः । अथवा । संकेतस्थले स्वामिनीभिः सह विहारादिकं कुर्वन् तादृशोद्बुद्धरसात्मकत्वेन परस्परकटाक्षाद्यवलोकनेनोत्कटरसपानं करोतीत्यर्थः । तेनेदानीं भगवद्व्यतिरेकेण स्थातुमशक्यत्वात्तदेव माधुर्यविशिष्टपानं भावयन्तीति भावः । अत एव 'त्वदधरमधुरमधूनि पिबन्तं दृश्यसे पुरतो गतागत'मित्यादि **जयदेवो**क्तिरपि । अथवा । स्वस्य तदास्यरूपत्वेन तदाधारत्वात्तत्तल्लीलोपयोगितन्माधुर्यादिकं तत्सामयिकं प्रार्थयन्तीति भावः ॥ एवं पीतमाधुर्यं निरूप्य भुक्तमाधुर्यं निरूपयन्ति **भुक्तं मधुर**मिति । भगवान् पुष्टिमार्गीयपदार्थानां भोगकरणार्थमेव प्रकटीभूतस्तस्माद्बालक्रीडाव्याजेन स्वामिनीनां गृहे गत्वा तादृग्भावपरवशत्वेन तदाज्ञापूर्वकं यथा भवति तथा शिक्यस्थितानां पदार्थानां भोगं करोतीत्यर्थः । अन्यथा तदङ्गीकारं विना तेषां साफल्यमेव नास्तीति तास्तथैव प्रार्थयन्तीति भावः । अत एव 'अस्मदीयपदार्थानां भोगः कार्यस्तथैव ही'ति सर्वथा प्रवृत्तिभावपूर्वकं निरूपितमित्यर्थः । अथवा । यज्ञपत्नीनां फलदानार्थमेव तत्र गत्वाग्रे बालकान् संप्रेष्य याचनरूपत्वेन तद्भावात्मकं तत्रत्यं सर्वमङ्गीकरोतीत्यर्थः । तत्रापि मुख्यायास्तदपेक्षयोत्कृष्टत्वेन साक्षादङ्गसंगत्वेन च तत्समर्पितभोजनादिकं भगवान्पुष्टिमार्गरीत्यैवाङ्गीकरोतीत्यर्थः । तथा सति सर्वात्मभाववतीनां तदुच्छिष्टोपभोगित्वेनैव जीवनसंभावना नान्यथैतदभिप्रायं ज्ञात्वा तास्तथैव प्रार्थयन्तीति भावः । यद्वा । श्रीगोवर्धनसान्वादिषु स्थित्वा गोपबालैः सह क्रीडां कुर्वन् तत्प्रतीक्षापूर्वकं यथा भवति तथा मात्रा प्रेषितसख्यानीतभोजनादिकं तद्भावाधीनत्वेन सर्वान् भोजयित्वा रामेण सह स्वयमपि भोजनं करोतीत्यर्थः । किञ्च । महेन्द्रयागनिराकरणत्वेन निजानां निरोधकरणार्थमेव स्वाज्ञया नन्दादीन्प्रबोध्यानेकविधान्पाकान्कारयित्वा स्वयं तद्रूपीभूत्वा तत्समर्पितं सर्वं भुनक्तीत्यर्थः। तेन सर्वात्मभाववत्यस्तास्तादृशरसात्मकस्वरूपानुभवकरणत्वेन

तत्तल्लीलात्मकमाधुर्यविशिष्टभुक्तं भोजनमिति प्रार्थयन्तीति भावः । अथवा । स्वस्य तदास्यरूपत्वात्तद्भोक्तृत्वं स्वस्मिन्नेव प्रतिफलतीति विप्रयोगानुभवकरणत्वेन पूर्वानुभूतभुक्तं स्वयमपि भावयन्तीति भावः । अत एव 'श्रीकृष्णास्यं यज्ञभोक्ते'ति **सर्वोत्तमे** नामद्वयमुक्तम् ॥ एवं भुक्तमाधुर्यं निरूप्य सुप्तमाधुर्यं निरूपयन्ति **सुप्तं मधुर**मिति। यशोदोत्संगलालितस्य भगवतस्तद्धस्तलालनेनैव सर्वदा शयनमुचित, तत्रापि स्तनपानदानापेक्षितत्वात्तद्व्यतिरेकेण शयनादिकं न करोतीत्यर्थः । अत एव 'तमङ्कमारूढमपाययत् स्तन'मित्याद्युक्तम् । अथवा । प्रातरारभ्य सायमागमनपर्यंतं गोचारणादिकं कृत्वा तत्तल्लीलाविहारजनितश्रमनिराकरणार्थं स्वामिनीनां भवन एव गत्वा तादृशभावात्मकत्वेन तल्लालनपूर्वकं शयनं करोतीत्यर्थः । तथा सति तासां दिवाविरहखिन्नमानसानां भगवच्चरणारविन्दसंबन्धेनैव तापशान्तिर्नान्यथेति तास्तथैव शयनं प्रार्थयन्तीति भावः । यद्वा । वन एव विहारादिकं कुर्वन् बालान्प्रति तथैवोक्तवान्, गोचारणादिकं भवद्भिरेक कर्तव्यं, मया तु श्रमवशात् कुञ्जान्तरे यत्किंचित् विश्राममात्रं क्रियत इति तदनुज्ञया तेपि तथैव कुर्वन्तीत्यर्थः । ततः संकेतस्थले स्वानुगुणत्वेनैव ता अपि समागच्छन्तीति तत्कृतभावपूर्वककटाक्षावलोकनादिभिः सर्वाङ्गजनितश्रम निवार्य भगवान् शयनं करोतीत्यर्थः । तथा च सति तालवृत्तादिकं कुर्वत्यः स्वाभिलषितमनोरथादिकं यथा भवति तथा तल्लीलानुस्मरणवशात्तद्भावयन्तीति भावः । अथवा । प्रातरेव किंचिदुन्मीलदुन्नतभ्रूभङ्गकटाक्षावलोकनादिना स्वामिनीनामथ च तथाभाववतीनामतीवसुखजनकस्वात्तत्तद्रसानुभवकत्वेन तदेव प्रार्थयन्तीति भावः । तेन तादृगुन्मीलितनयननलिनदर्शनव्यतिरेकेण तासां जीवनासंभवात् नेष्टापत्तिरिति भावः । यद्वा । स्वस्य साक्षाद्रसात्मकसन्नियोगशिष्टत्वेन तत्र सानुभवकत्वेन वाधुना विप्रयोगदशापन्नत्वेन पूर्वानुभूतं स्मारंस्मारं तथैव प्रार्थयन्तीति भावः ॥ एवं सुप्तमाधुर्यं निरूप्य रूपमाधुर्यं निरूपयन्ति **रूपं मधुर**मिति । भगवतो रूपं रसात्मकं, 'रसघन' इति श्रुतेः । तत्रापि तत्तद्रसानुभवकर्तृत्वेन स्वयं तत्तद्रूपो भवतीति 'रङ्गं गतः साग्रज' इत्यत्र तथैव निरूपणात् । तथा सति स्वयं शृङ्गाररस एव स्थितः सन् तेषु तेषु तत्तद्रसानुभवं कारयतीति भावः ।

अत एव 'गोप्यः कामा'दित्याद्युक्तम् । अथवा । शृङ्गारो हि द्विविधः, संयोगविप्रयोगाभ्याम् . रसशास्त्रे तथैव निरूपणात् । तथा सत्यानन्दमात्रकरपादमुखोदरादिमत्त्वेनोभयरसात्मको भगवान् प्रतिपाद्यते । किंच । व्रजसीमन्तिनीनां उद्बुद्धशृङ्गाररसात्मकस्वरूपेणैवानन्दानुभवं प्रयच्छतीत्यर्थः । अत एव 'रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती'ति श्रुतेस्तथैवोक्तत्वात् । अथवा । भगवान् शृङ्गारोद्बुद्धदशायां तदधीनत्वान्नृत्यादिकरणत्वेन भक्तानां रसोद्दीपनं कुर्वन् अधरस्थितवेणुकूजनं करोतीत्यर्थः । तथा सति व्रजदेवीनां भावपूरणार्थमेव तादृग्रसानुभवजनकत्वेन त्रिभङ्गललितरूपः स्वयमेव भवतीति भावः । एता अपि तादृक्स्वरूपदर्शनापेक्षायां विरहदशापन्नत्वेन सर्वथा जीवनसंभावनारहितत्वेन च माधुर्यविशिष्टं त्रिभङ्गललितरूपं प्रार्थयन्तीति भावः । अत एव ' दर्शनीयतिलको वनमाले'त्यत्र तथैव निरूपितमाचार्यैः । यद्वा, रासलीलायां भक्तकण्ठावलम्बितनृत्यकरणत्वेन रसात्मकस्वरूपनिरूपणत्वात्तादृशीनां भावपूरणार्थं प्रभुस्तथैव करोतीत्यर्थः । तथा सत्येतासां तादृशमण्डलानुकरणकनृत्यकर्तृत्वेनाधुनापि साधनासाध्यत्वेन ताश्च मुहुर्मुहुर्माधुर्यात्मकं तद्रूपमेव भावयन्तीति भावः । अत एव 'तासां मध्ये द्वयोद्वयो'रित्युक्तम् । अथवा । स्वस्य सर्वदा सन्नियोगशिष्टत्वेन निरूपणत्वाद् भगवत्सहक्रीडाकरणत्वेनाधुना तादृग्भाववतीभिः सह विप्रयोगरसानुभवार्थं स्वयमपि तथा प्रार्थनं कुर्वन्तीति भावः ॥ एवं रूपमाधुर्यं निरूप्य तिलकमाधुर्यं निरूपयन्ति **तिलकं मधुरमिति** । भगवतो बाललीलायां मातृचरणादिभिर्ललिनवशान्नेत्राञ्जनं कृत्वा भाग्यविशाले भाले रक्षार्थं वात्सल्यानुपूर्वकं यथा भवति तथा गोरोचनेन तिलकं क्रियत इत्यर्थः । तथा सति दर्शनोत्कण्ठितबुद्धीनां तेन विना प्राणधारणं न संभवतीति तास्तथैव प्रार्थयन्तीति भावः । यद्वा । बाललीलायां भगवतः शृङ्गारादिकं तु गोपीजनैः क्रियत इति स्थलान्तरे नीत्वा स्वामिनीसाहित्येनैव यथा तथा भवति नान्यथेत्यर्थः । तस्माद्वस्त्रालंकारभूषितकरणानन्तरं स्वामिनीभिरेव भावपूर्वकं कटाक्षावलोकनं यथा भवति तथा नवकुङ्कुमेन कस्तूरिकया वा मकरपत्रिकातिलकं क्रियत इति भावः । एतासामपि तद्भावाधीनकृतिमत्त्वात्

तादृशकृतिव्यतिरेकेण जीवनं व्यर्थमिति ज्ञात्वा तास्तथैव प्रार्थयन्तीति भावः । अथवा । स्वस्य भगवदात्मकत्वेन तद्भावात्मकत्वेन च तादृशलीलोपयोगित्वात्तत्सामयिकं सर्वं स्मृत्वैव तादृशीभिः सह मनसि भावयन्तीति भावः ॥ एवं धर्मविशिष्टमाधुर्यं निरूप्य धर्मिविशिष्टमाधुर्यं निरूपयन्ति **मधुराधिपतेरखिलं मधुरमिति** । यत्र धर्माणां माधुर्यमीदृग् भावपूर्वकं निरूपितम्, तत्र धर्मिमाधुर्ये किं वाच्यमिति कैमुतिकन्यायः प्रदर्शित इत्यर्थः । एतदेव सर्वं मनसि धृत्वा मधुराधिपतेरखिलं मधुरमित्येवोक्तं **श्रीमदाचार्यैः** ॥ ४ ॥

एवं स्वान्तःस्थितं भावं ताः पुष्टं कर्तुमुद्यताः ।
तास्ता लीलाः प्रकुर्वन्त्यः पुनर्गानं मुखे जगुः ॥ १ ॥
तथैव **श्रीमदाचार्यास्तं** पुष्टं कर्तुमुद्यताः ।
पुनः स्वान्तर्गतं भावं भगवद्भावसंश्रिताः ॥ २ ॥

**करणं मधुरं हरणं मधुरं तरणं मधुरं रमणं मधुरम् ।**
**वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥५॥**

**करणं मधुरमिति** । यदि भगवानेव तासां हृदि स्वयमेव तिष्ठन् बाह्यतिरोधानाकृतिकरणत्वेन लीलात्मकस्वरूपानन्ददानं न प्रयच्छेत्तदा ताभिः संयोगरस एवानुभूतो भवति, न तु विप्रयोगः, तदपेक्षया विना सोपि न पुष्टो भवतीत्यर्थः । तेनैतासां पूर्वं संयोगरसानुभवं कारयित्वैतत्स्वरूपानभिज्ञत्वेन पश्चात् तत्पुष्टीकरणार्थं तिरोधानलीलया विप्रयोगरसानुभवं कारयित्वापि पुनः संयोगरसाभिनिवेशे स्वयं तथा करोतीति भावः । अथवा । पुनराविर्भूय रासलीलाकरणत्वेन तासां तादृग्भावसंपादकत्वादलौकिककामप्राकट्येन कामरूपः स्वयमेवाविर्भवतीत्यर्थः । अन्यथा गानप्रलापादिराहित्येन रोदनप्राप्तानां जीवनसंभावनया तत्संभावनैव नास्तीति भावः । यद्वा । तास्वभिमानादिदोषकरणं तु भगवतैव कृतमिति, परन्तु दासधर्मत्वात्तास्तु स्वापराधमेव मन्यन्ते, न तु भगवत्कृतं, तथापि भगवत्कृतमेवेत्यर्थः । किञ्च । दैन्यानुकरणत्वेन साधनासाध्यत्वात् रोदनमेव तासां निरीक्ष्य स्वयमतिदयालुत्वेन संतुष्टः सन् तत्पूर्वोक्तदोषं स्वयं निवार्य पश्चात्तन्मध्य

एवाविर्भावं करोतीति तदपि तत्कृतमेवेत्यर्थः । तथा सत्येतासां दैन्यभाव-साधनत्वेनैव साक्षात्स्वरूपसम्बन्धानुभवो भवतीति नान्यथेति भावः । अत एव 'भक्तानां दैन्यमेवैकं हरितोषणसाधन'मित्युक्तमाचार्यवर्यैः । अथवा । स्वस्य साक्षाद्भगवत्स्वरूपात्मकत्वेन सर्वदा तद्रसपूर्णत्वेन च स्वस्मिन्नि-प्रयोगरसपोषणार्थमेव तदनुकरणत्वेन दैन्यं यथा भवति तथा करणविशिष्ट-माधुर्यं प्रार्थयन्तीति भावः ॥ एवं करणमाधुर्यं निरूप्य हरणमाधुर्यं निरूप-यन्ति **हरणं मधुरमिति** । कुमारीणां वरदानप्रस्तावे जलक्रीडादिदोष-निवारणार्थमन्यभजननिवारकत्वेन स्वांगीकारपूर्वकशुद्धभावोत्पादनार्थं तासां वासांसि गृहीत्वा सत्वरमेव स्वयं नीपमारुह्य तथोक्तवान्, यदि भवत्यो दास्यश्चेत्तदा मदुक्तमेव करणीयं, अन्यथा तु न दास्य एव । तत्रापि जलाद्बहिरागत्य नमनपूर्वकं यथा भवति तथा यदि याचनं करिष्यथ तदा-हमपि भवतीनां शुद्धभावं दृष्ट्वा दास्यामीत्यर्थः । तथा सति लौकिकानु-रोधं परित्यज्य भगवदाज्ञाकरणत्वेन तास्तथैव कुर्वन्तीति भावः । तादृशा-नुकरणकृतिमत्त्वेन तल्लीलावलोकनत्वेन च तादृग्भावसंपादनार्थं विरहदशायां वस्त्राननुसंधानादेता अपि तथा प्रार्थयन्तीति भावः । यद्वा । भगवतो गुणाः षड् व्यामोहका अपि सन्ति, तैरेव मनोहरणादिकं कृत्वा तत्र स्थित एव व्यामोहकरूपो भवतीत्यर्थः । तथा सति मनःक्षोभजनकत्वेन जीवना संभावनत्वेन च तत्कृतप्रार्थनायां तथैव निरूपणादिति भावः । अत एव 'प्रगतकामदं पद्मजार्चित'मित्याद्युक्तम् । अथवा । स्वामिनीनां मानदशा-यामपि तद्विना स्थातुं न शक्यत इति तन्निराकरणार्थमेव तादृशकटाक्षा-वलोकनादिभिस्तद्धरण करोतीत्यर्थः । तादृशशृंगारात्मकस्वरूपावलोकनत्वेन ता अपि मानादिकं त्यजन्तीति भावः । अत एव 'दृशि तु मदमानिनी-मानहरण'मित्युक्तम् । अथवा । स्वस्य रसात्मकभगवत्स्वरूपसन्नियोगशिष्टत्वेन तत्तत्कार्यदर्शनानुकरणत्वेन च विरहानुभवकरणार्थं तादृशीनां भावं मनसि धृत्वा तथैव प्रार्थयन्तीति भावः ॥ एवं हरणमाधुर्यं निरूप्य तरणमाधुर्यं निरूपयन्ति **तरणं मधुरमिति** । भगवान् भक्तानां ब्रह्मानन्दानुभवकरणार्थं वैकुण्ठदर्शनार्थं च पूर्वं तथैव तेषां मज्जनं करोतीति । पुनः स्वभजनानन्दप्रापणार्थमेव लीलासमुद्रे

निमज्य स्वेच्छया पुनस्तत्क्रीडाकरणार्थं तान् तारयतीत्यर्थः । तथा सति विप्रयोगलीलामृतसमुद्रमज्जनत्वेन भगवत्तस्तारकरूपत्वात्तास्तथैव प्रार्थयन्तीति भावः । अथवा । तॄ प्लवनतरणयोरिति धातोरुभयार्थकत्वात्संयोगविप्रयोग-रसानुभवकर्तृत्वेन तादृशलीलामृतसमुद्रे पुनः पुनस्तन्मज्जनोन्मज्जनादिकं करोतीत्यर्थः । किंच । स्वयमपि तदधीनत्वादाधाराधेयभाववत्त्वाच्चानन्तशक्ति-मत्त्वेन तथैव करोतीत्यर्थः । अत एव **प्रभुभिः** तथोक्तं **श्रीमद्गोकुलाष्टके** 'श्रीमद्गोकुलतारक' इति । क्रीडास्थानत्वात्तथोचितमिति भावः । अथवा । श्रीयमुनायां स्थितः सन् जलदोषात्मकमुरदूरीकरणत्वेन भक्तानां स्वस्यापि वा प्रतिबन्धनिराकरणत्वेन च तत्संबंधसंपादकत्वात्स्वयं तरति ता अपि तारयतीत्यर्थः । तथा सति मज्जनसमयानुकूलव्यापारकृतिमत्त्वेन भगवति निश्चयत्वात्तरणविशिष्टमाधुर्यं प्रार्थयन्तीति भावः । अत एव 'यमुनाविको गोपीपारावारकृतोद्यम' इत्युक्तम् । अथवा । स्वस्य साक्षात्तत्स्वरूपात्मक-त्वात्तत्तल्लीलामृतसमुद्रमज्जनोन्मज्जनेन विप्रयोगरसानुभवं कुर्वन्तः **श्रीमदाचा-र्यवर्यास्तदनुकरणत्वेन** तथैव मनसि विभावयन्तीति भावः ॥ एवं तरणमाधुर्यं निरूप्य रमणमाधुर्यं निरूपयन्ति **रमणं मधुरमिति** । भगवान् गोचार-णादिक्रीडाकरणार्थं गोपबालैः समानवयस्कैः सह लीलापरवशत्वेन प्रत्यहं वनगमनं करोतीत्यर्थः । तत्रापि सखामंडलीकरणत्वेन बाल्यरसानुभवं कर्तुं तत्तच्चरितानुसारेण तैः साकं रमणं करोतीति तत्तल्लीलास्मरणत्वेन विप्रयोगं कालक्षेपार्थं ता अपि माधुर्यविशिष्टरमणं प्रार्थयन्तीति भावः । अथवा । श्रीगोवर्धनसान्वादिषु स्थितः सन् भोजनानुकूलबाल्यचरितानुकरणत्वेन तथा भोजनादिकं करोतीत्यर्थः । तथा सति केषाञ्चिद् भोजनं दत्तं केषाञ्चिद् वाक्यमात्रेणैव केषाञ्चिद्भुक्तभांडादिकं तथा रमणं करोतति भावः । यद्वा । भगवतः स्वामिनीभावात्मकत्वान्निकुंजगह्वरांतरेषु तादृशविहारकर्त्रीभिः सह तत्तद्भोगकरणार्थं रमणादिकं करोतीत्यर्थः । तास्तादृग्विलाससंपत्तावपि भावात्मकत्वात्तथैव भगवन्तं प्रार्थयन्तीति भावः । अथवा । रासलीला-करणत्वेन यावतीर्गोपीर्व्रजयोषितस्तावंतमात्मानं कृत्वा तासां साक्षात्स्वरूपा-नन्ददानार्थं ताभिः सह रमणं करोतीत्यर्थः । तथा सति भगवद्भावात्मिकाः

सत्यः शक्तिविशिष्टरमणं प्रार्थयन्तीति भावः । अत एव 'एकाकी न रमते, स द्वितीयमैच्छ'दिति श्रुतेः । अथवा । स्वस्य सन्नियोगशिष्टत्वेन यावन्तो भगवद्धर्मास्तावन्त एवात्रापि स्थिताः सन्तीति तासु तद्धर्मान् ख्यापयन्तस्तादृशीनां जीवनसंपादकत्वेन परस्परं मिलित्वा रमणमाधुर्यं भावयन्तीति भावः ॥ एवं रमणमाधुर्यं निरूप्य वमितमाधुर्यं निरूपयन्ति **वमितं मधुर**मिति । भगवतो भावात्मकत्वात्तदीक्षणादीनि तथैव सन्तीति क्रीडासक्तत्वेन प्रत्यंगेषु रात्रिजागरजनितविलाससूचकत्वाद् भक्तानामतिसंतोषदायकत्वेन भावोद्दारिणीदृष्टिपातत्वाद्वमितं तथैव भातीत्यर्थः । तथा सति तादृग्दर्शनाभिलाषपूरितविग्रहत्वेन तेन विना स्थातु न शक्नुवन्तीति जीवनसंपादनार्थमेव तदेव प्रार्थयन्तीति भावः । अथवा । भगवतः शृंगारोद्बुद्धरसात्मकस्वरूपत्वेन स्वामिनीभावाधीनकृतिकरणत्वात्सर्वदा तद्धयानात्मको भूत्वा तद्विलासादीन् भक्तानामनुभावयतीत्यर्थः । अत एव केशप्रसाधनत्वे तथैव निरूपित**माचार्य**वर्यैः । तथा सति भावरूपेण यत्कृतं भगवता तद्वमितं, तत्प्रार्थयन्तीति भावः । यद्वा । स्वामिनीनां स्वान्तर्गतभावज्ञापनार्थं वेणुकूजनादिकं कुर्वन् तत्रैव भावपूरकत्वेन तासां भावोच्छलनादिकं सर्वं ज्ञापयतीत्यर्थः । तेनैतद्भाववतीनां जीवनसंभावनारहितानां भगवन्मुखोद्गतामृतस्रावि वेणुश्रवणं तथैव भवतीति भावः । अथवा । स्वस्य साक्षाद्भगवदास्यरूपत्वेन सर्वदा तदुपभोगित्वेन चांतर्निष्ठभावं बहिः प्रकटीकरणार्थं तथैव भावयन्तीति भावः ॥ एवं वमितमाधुर्यं निरूप्य शमितमाधुर्यं निरूपयन्ति **शमितं मधुर**मिति । भगवान् क्रीडां करोतीत्यर्थः । अन्यथा महदुपद्रवसहितं दुष्टदैत्यादिनिवारणं कथं स्यादिति भावः । अथवा । शमु उपशम इति धातावुपदेशकाल एवोपसर्गस्य पतितत्वात्तेन भक्तवात्सल्यानुग्राहकधर्मवत्त्वेन पूतनादीनां शमनं करोतीत्यर्थः । अत एव 'गोप्यस्तृणं समभ्येत्य जगृहुर्जातसंभ्रमा' इति **श्रीशुकोक्तम्** । तथा सति पूर्वोक्तानुस्मरणकृतिमत्त्वेनाधुनापि तास्तद्वदेव रक्षार्थं द्रष्टुकामाः शमनं प्रार्थयन्तीति भावः । अथवा । कर्तुमकर्तुमन्यथाकर्तुंसमर्थत्वेन पूर्वं स्वरूपानन्ददानं कृत्वा पश्चात् तदकर्तुं विप्रयोगं विधाय पुनरन्यथाकर्तृत्वेन दैन्यप्रादुर्भावानन्तरं तासां यथा पूर्ववत् करोतीत्यर्थः ।

तेन स्वस्यैव सर्वकर्तृत्वेनैतासां जीवनसंपादकत्वात्तन्निराकरणं न युक्तमिति भावः । अत एव 'साक्षान्मन्मथमन्मथ' इत्युक्तम् । अथवा । स्वस्य साक्षाद्रसात्मकसन्नियोगशिष्टत्वेनोभयरसानुभवकरणार्थं तादृशीभिः सह शमन-विशिष्टमाधुर्यं प्रार्थयन्तीति भावोपि सूचितः ॥ एवं धर्मविशिष्टमाधुर्यं निरूप्य धर्मिविशिष्टमाधुर्यं निरूपयन्ति **मधुराधिपतेरखिलं मधुर**मिति । यत्र भक्तानां विप्रयोगदशापन्नत्वेन लीलायां मधुरत्वस्यैव प्रतीतिस्तत्र साक्षा-त्स्वरूपानन्दानुभवे का वार्तेति संशयनिराकरणपूर्वकज्ञापनार्थं मधुरा या भगवल्लीलास्तासां योऽधिपो भगवान् षड्गुणैश्वर्यसंपन्नः सर्वकरणसमर्थः फलदाता तस्य यत्सर्वं निरूपितं तन्मधुरमेवेत्यर्थः । अखिलमित्यव्ययेना-विकृतत्वं निरूपितम् ॥ ५ ॥

एवं पुलिनमागत्य कालिन्द्याः तस्य भावनाः ।
स्तुतिं चक्रुरुदारां च स्वप्रियालापपूर्विकाम् ॥ १ ॥
तथैव **श्रीमदाचार्या** भावनां भावपूर्विकाम् ।
यमुनासहितां चक्रुर्महतीं स्तुतिमुत्तमाम् ॥ २ ॥

**गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।**
**सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ॥६॥**

**गुञ्जा मधुरे**ति । भगवान् रसात्मकः शृंगारात्मा गोचारणादिक्रीडा-करणार्थं शिरसि मयूरमुकुटं कंठे गुञ्जां कटितटे सुवर्णमेखलामसे पीतवस्त्रं बिभर्ति । ततस्तद्भूषणयुक्तसौंदर्यावलोकनत्वेन किंचित्स्वास्थ्यकरणत्वादेता-स्तथैव प्रार्थयन्तीति भावः । अत एव 'गुञ्जावतंसपरिपिच्छलसन्मुखाये'ति **ब्रह्मणोक्तम्** । अथवा । भगवतः स्वामिनीभावात्मकत्वात् गुञ्जादिधारणं तु युक्तमेवेति वने विहारादिकं कुर्वन् तत्स्मरणकर्तृत्वेन तद्व्यतिरेकेण स्थातुम-शक्यत्वाद्यत्किंचित्स्थैर्यकरणार्थं तदंगीकृतत्वेन स्वयमपि धारणं करोतीत्यर्थः । तथा सति गुंजाया वनस्थितत्वात्तद्दर्शनेन तत्स्मृतिजननात् भावपूर्वकालिंग-नकरणत्वेन तां दधातीति भावः । अथवा । स्वामिनीनां वनगमनाभावा-देतस्या वनस्थितत्वाच्च ताभिः कथं ग्रहीतुं शक्येति तासामतीव तुष्टिकरणार्थं

तदर्थं वा स्वयमेव धारयतीत्यर्थः । तेन यावद् दर्शनादिकं न भवति तावदेव स्वयं धीयते पश्चात्साक्षात्स्वरूपमिलनानन्तरं तु पूर्णांगीकरणत्वेनैव ता एव धारयन्तीति भावः । अथवा । स्वस्य सश्रियोगशिष्टत्वेनोभयसम्बन्धित्वादत्र ता गृहीत्वा स्वयमेव तत्र गत्वा तत्पुरत एव हस्ते संस्थाप्य प्रार्थनापूर्वकं यथा भवति तथांगीकारयन्तीति पूर्वावस्थानिरूपकत्वेनैवाधुना पुनस्तदनुभवकरणार्थं तादृशीभिः सह गुंजामाधुर्यं प्रार्थयन्तीति भावः । एवं गुंजामाधुर्यं निरूप्य मालामाधुर्यं निरूपयन्ति **माला मधुरे**ति । माला वैजयन्ती सर्वजयप्रकाशिका कीर्तिमयी च सर्वदोद्बुद्धशृंगाररसार्थमेवाच्छादकत्वेन तां विभावयन्तीत्यर्थः । नो चेद्रसोच्छलितत्वात्सर्वा एव विमोहिता भवेयुः, तर्हि किमपि कार्यं स्वतः परतो न भविष्यतीत्याशंक्य तासां फलानुभवकरणार्थं सर्वसाधिकां तां दधातीत्यर्थः । तथा सति सन्मुखस्थितस्वरूपावलोकनकटाक्षादिपूरितत्वेन स्वानुभूतरसानन्दानुभवं सर्वाः प्रतिक्षणं कुर्वन्तीति भावः । अत एव तादृशोद्बुद्धशृंगाररसात्मकस्वरूपप्राकट्यो वनवैजयन्तीं च मालां बिभ्रदित्युक्तम् । अथवा । माला वनमाला, नानाप्रकाराणि पुष्पाणि यस्यामिति तादृशशृंगाररसोद्बोधनाय पुष्पाणां रसोद्दीपकत्वात्तत्प्रकारिकां दधातीत्यर्थः । यद्वा । वनमालाया द्विरूपत्वात् 'पादावलंबिता माला वनमाला प्रकीर्तिते'ति मालेत्युपलक्षणमात्रं, किंतु कंठाभरणमारभ्य यावंतो मुक्ताहारास्तावंत एव सर्वान् धृत्वा पश्चात्तदधो मालामेतां धारितवानित्यर्थः । तथा सति सर्वालंकारभूषितत्वेनापि वनगतशोभाया आवश्यकत्वात्कामोद्दीपनार्थं तादृशभाववत्यो माधुर्यविशिष्टमालां प्रार्थयन्तीति भावः । अत एव 'मुक्ताहारोल्लसद्वक्ष' इति । अथवा । स्वस्य साक्षाद्भगवन्मुखारविन्दत्वेन तदात्मकत्वाद्विप्रयोगदशापन्नत्वेन तद्विना स्थातुं अशक्यत्वाच्च तत्तत्सामयिकं सर्वं स्मृत्वा तादृशभाववतीभिः सह तथैव विभावयन्तीतिः भावः ॥ एवं मालामधुर्यं निरूप्य यमुनामाधुर्यं निरूपयन्ति **यमुना मधुरे**ति । श्रीयमुनाया भगवत्समानधर्मत्वाद्यथा भगवांल्लीलात्मकस्तथेयमपि लीला सृष्टिस्थानां स्वरूपानन्ददानादिकं करोतीत्यर्थः । किंच । भगवानप्येतदधीनत्वेनैव सर्वं करोतीति स्वैश्वर्यादिकं तत्रैव स्थाप्य तद्द्वारेणैव

फलं प्रयच्छतीति सन्नियोगशिष्टत्वेनैव सर्वं करोतीति सन्नियोगशिष्टत्वेनैव सर्वदा तिष्ठतीत्यर्थः । अथवा । जलविहारादिकं तावदत्रैव भवतीति प्रेष्ठानुकूलकरणत्वेन तासामाकारणं स्वयमेव करोतीति भगवता स्तुतेत्यर्थः । स्वामिन्य अपि सर्वदैतदधीनस्थितिकरणत्वेन स्वानुभूतसुखसंदर्शनादेतामेव स्तुवन्तीत्यर्थः । तथा सत्येतावद्धर्मसामर्थ्यवत्त्वमेतस्यामेव दृष्ट्वा तस्य साधनत्वेन तादृक्प्रियसंगमाभिलाषवत्यस्तामेव माधुर्यविशिष्टां प्रार्थयन्तीति भावः । यद्वा । स्वामिनीनां विप्रयोगदशायामपि तादृशप्रियविश्लेषपीडनादिकं वीक्ष्य कर्तुमकर्तुमन्यथाकर्तुंसमर्थत्वेन तद्धर्मात्मकत्वात्साक्षात्स्वरूपानुभवं कारयतीत्यर्थः । किंच । गोचारणादिक्रीडां कुर्वतो भगवतः प्रिया विप्रयोगमात्रात्मकस्य सर्वथा क्षणमपि तद्विना स्थातुमशक्यस्यार्तिं मत्वा स्वपुलिन एव तत्संबंध रचयतीत्यर्थः । तथा चैतावन्मात्रकृतिकरणत्वेन तादृशोपकृतित्राभावान्मूर्छिताः सत्यो माधुर्यविशिष्टयमुनां प्रार्थयन्तीति भावः । अथवा । यमुना यमभगिनी । यमोपि भगिनीसम्बन्धव्यतिरिक्तानां पीडयति, न तु तदीयानां, वयं तु तदंगीकृता एवेति तत्सदृशकामपीडनादस्माक रक्षिष्यतीति विश्वासतो यमुनां प्रार्थयन्तीति भावः । यद्वा । कालिन्दीरूपत्वेनाविर्भूतत्वात्कलिं द्यतीति कलिन्दस्तस्य कन्येति भगवत्प्रतिबन्धकादिदोषदूरीकरणत्वेनास्माकमंगीकारं करोत्विति प्रार्थनेत्यर्थ । तथा सति सर्वकरणसमर्थत्वे जाते यदि तादृक्प्रभुसम्बन्धं करिष्यति तदैव जीवनसंभावना, नो चेदसमञ्जसमिति भावः । अथवा । स्वस्य साक्षाद्भगवत्स्वरूपात्मकत्वेन समानशीलव्यसनवत्त्वेन चैतदवस्थापन्नत्वात्तद्द्वारेणैव तादृशीनां मनोभिलाषपूरणार्थं स्वयमपि तथा प्रार्थयन्तीति भावः ॥ एवं यमुनामाधुर्यं निरूप्य वीचीमाधुर्यं निरूपयन्ति **वीची मधुरे**ति । वीचीति जात्येकवचनाभिप्रायेण, किन्तु तरंगा बहव एवाऽसंख्याताः, तेषां शोभादिकरणत्वेन शीतलत्वादिधर्मदायकत्वेनाप्यायकत्वाद् भगवदुपयोगिन एव भवन्तीत्यर्थः । तथा सति क्रीडोपयोगित्वात्तापनिवारकत्वादिधर्मवत्त्वेन स्वगतविप्रयोगदुःखनिवारणार्थं तास्तथैव प्रार्थयन्तीति भावः । अथवा । तरंगाणां भुजनिरूपकत्वेनैव सर्वोपकरणत्वं, नहि कोपि हस्तव्यतिरेकेण किमपि कार्यं

कर्तुं शक्नोति, तस्मात्पुलिनस्थवालुकासमीचीनकरणादिकं तु तरलतरंगप्रसारणेनैव भवति, नान्यथेत्यर्थः । तेनैतद्दर्शनमनोरथपूरकत्वेन कामजनिततापनिवृत्तित्वान्माधुर्यविशिष्टतरंगान्प्रार्थयन्तीति भावः । यद्वा । पुलिनं तावत्क्रीडास्थलं, तत्र जलापेक्षया सिञ्चनादिकं युक्तमेवेति, नो चेद् भगवच्चरणारविन्दानामतीवकोमलत्वाद्रमणादिकं कथं संभवतीति तैस्तथैव क्रियत इत्यर्थ । तथा सति तद्वरतुकृतव्यापारसामग्रीदर्शनात्प्रियमिलनादिकं तावदत्रैव भविष्यतीति तन्निकटस्थिता एव तद्रूपां तां प्रार्थयन्तीति भावः । अत एव 'कृष्णाया हस्ततरलाचितकोमलवालुक'मित्यत्र तथैव निरूपितमाचार्यवर्यैः । यद्वा । स्वस्य साक्षाद्रसात्मकसन्नियोगशिष्टत्वेनैतत्सजातीयत्वेनापि समानशीलव्यसनवत्त्वादिधर्मदर्शनात्प्रियप्रतिबन्धनिवारकशक्तिविशिष्टत्वेन तत्करग्रहणपूर्वकं यथा भवति तथा प्रार्थयन्तीति भावः ।। एवं वीचीमाधुर्यं निरूप्य सलिलमाधुर्यं निरूपयन्ति **सलिलं मधुरमिति** । यमुनासाहित्यात्सलिलं तज्जलमेव निरूप्यते । क्रीडार्थं जलं तावदवश्यमपेक्ष्यं श्रमनिवारकत्वेनैव, पुनस्तत्संभावना नान्यथेत्यर्थः । तथा सति तादृशीनां तद्वतलीलावगाहकशक्तिसत्त्वेनाधुनापि तत्तत्क्रीडाकरणार्थं स्मरणमात्रेणैव तापनिवारकत्वान्नोपकृतिं ज्ञात्वा तादृग् जलं प्रार्थयन्तीतिः भावः । अथवा राजकुमारीणां वरदानप्रस्तावे पूर्वमन्यदेवोपासनया फलप्रतिबन्धकत्वेन तावत्कालं व्यर्थमेव जातमिति पश्चाद् व्रतान्तरारम्भकत्वेन उपोषणविधिप्राप्तत्वाद् देवहेलनक्रीडादिदोषनिवारकत्वेन तज्जलमेव फलप्रतिपादकं भवतीत्यर्थः । अत एव 'कालिन्द्यां स्नातुमन्वह'मित्युक्तम् । तथा सत्येतज्जलसम्बन्धमात्रेणैवानिष्टनिवृत्तीष्टप्राप्तित्वाद् भगवद्भावसम्पादकत्वेन तज्जलं प्रार्थयन्तीति भावः । यद्वा । भगवान् गोचारणादिक्रीडां कुर्वन्मात्रा प्रेषितभोजनादिकं कृत्वा पुनर्गृहगमनशंकाभावत्वेन तृषार्तान्वीक्ष्य यमुनाकूलमेवागतस्तत्र सर्वान् जलं पाययित्वा स्वयमपि पश्चात्पिबतीत्यर्थः । तेन जल एव मधुररस इतिन्यायात्तत्रापि श्रीयमुनासम्बन्धित्वेन शीतलत्वसुस्पृष्टत्वादिगुणवज्जलं प्रार्थयन्तीति भावः । अत एव 'सुस्पृष्टाः शीतलाः शिवा' इत्युक्तम् । अथवा । भगवतः क्रीडाकरणत्वेन तत्रैव रसाविर्भावत्वात्तादृशीभिः सह रमणकर्तृत्वेन

श्रमजनितखेददूरीकरणार्थं जलोत्क्षेपणादिकर्तृत्वेन विहारादिकं करोतीत्यर्थः । तथा सति साक्षात्स्वरूपावलोकनकटाक्षादिभावपूर्वकस्पर्शनाभिप्रायेण माधुर्यविशिष्टजलं प्रार्थयन्तीति भावः । यद्वा । स्वस्य भगवदास्यरूपत्वेन रसात्मकत्वात्तज्जलपानादिकरणत्वेनाधुना विप्रयोगरसानुभवकत्वात्कथमपि इष्टप्राप्तिसिद्ध्यर्थं दोषनिराकरणत्वेन तादृशीभिः सह तथैव प्रार्थयन्तीति भावः ॥ एवं सलिलमाधुर्यं निरूप्य कमलमाधुर्यं निरूपयन्ति **कमलं मधुर**मिति । भगवान्वनादागमनसमये गाः पुरस्कृत्य पश्चात्स्वयमपि हस्ते कमलं भ्रामयन् नूपुरशब्दानुकरणत्वेन शनैः शनैरागच्छतीत्यर्थः । किंच । स्वामिनीमिलनानुकूलकृतिकरणत्वेन तादृग्भावसम्पादकत्वादत्यार्तिनिरूपकत्वेन ,यावद् दर्शनादिकं न भवति तावत्कोमलत्वशीतलत्वतापहारकत्वादिगुणयुक्तत्वेन स्वोपकारकृतिमत्त्वात्कमलं धारितवानित्यर्थः । तथा सति तादृग्दर्शनापेक्षापूर्वकत्वेन तद्विना स्थातुमशक्यत्वादेताः कमलविशिष्टमाधुर्यं प्रार्थयन्तीति भावः । अथवा । भक्तानामखिलप्रकाशानुकूलकृतिकरणत्वेन तद्रसलभ्यत्वात्सुखसेव्यत्वबोधनाय तेषां रसात्मके हृदि चक्षुषि वा स्थापयितुं तद्योग्यतासूचनत्वेन चरणे कमलाभिधं चिह्नं दधातीत्यर्थः । तेन मनःपूर्वककटाक्षावलोकनादिव्यारसत्त्वेन चरणांकजानुरंजकत्वाद्रसाधायकत्वेनैतास्तत्कमलं प्रार्थयन्तीति भावः । अत एव 'जीवैर्नमनातिरिक्तं कर्तुं न शक्य'मिति शिक्षायानाभिस्तथैवोक्तं 'प्रणतदेहिना'मिति । यद्वा । भगवन्मुखस्यैव कमलत्वेन निरूपणत्वाच्चन्द्रवत्तापहारकत्वेन नेत्रद्वारेणैव लावण्यामृतपानकरणत्वेन च ताभिः तथैवोच्यत इत्यर्थं. । तेन मुखांबुजदर्शनादेव तासां तापशान्तिर्नान्यथेति मरणसंभावनैव निश्चीयत इति भावः । अत एव 'जलरुहाननं चारु दर्शये'त्युक्तम् । अथवा । कमलगतकमलनिरूपकत्वेन तादृग्रागविशिष्टत्वेन तद्वद्विकासित्वेन च सौरभादिगुणदायकत्वान्नेत्रयोः कमलत्वोपमयोस्तत्सादृश्यं घटत एवेत्यर्थः । अतं एव कमले कमलोत्पत्तिरिति विरोधालंकारत्वेन भगवति तथोच्यत इत्यर्थः । यद्वा । स्वस्य साक्षाद्भगवदास्यरूपत्वेन मुखारविन्दरसभोक्तृत्वं नेत्राम्बुजे स्यादपि तथैव रसपानकरणादधुना वैसादृश्यनिरूपकत्वेन पूर्वानुभूतं सर्वं स्मृत्वा ताभिः सह तथैव

भावयन्तीति भावः ॥ एवं धर्मविशिष्टमाधुर्यं निरूप्य धर्मिविशिष्टमाधुर्यं निरूपयन्ति **मधुराधिपतेरखिलं मधुर**मिति । यत्र यत्सम्बन्धेन लौकायिकपदार्थानां प्रतिक्षणं माधुर्यं नवं नवं जायत इति तदधिष्ठातरि किमिति न, किंतु वर्तत इति काकूक्तिनिश्चयोपक्रमत्वाद्भगवतो मधुराधिपतेः सर्वसामग्रीसहितस्य यदखिलं तत्सर्वं मधुरमेवेति प्रार्थना विषयीक्रियत इत्यर्थः ॥६॥

एवं स्वदुःखं विस्मृत्य तद्दुःखं वीक्ष्य वा पुनः ।
तत्कथां शुश्रुवुः सर्वाः स्वदुःखालापनाशिकाम् ॥ १ ॥
तथैव **श्रीमदाचार्याः** समाधाय मनः स्वयम् ।
तथैव सहसा स्थित्वा दौर्मनस्यं त्यजन्ति वै ॥ २ ॥

**गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम् ।**
**दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ॥७॥**

**गोपी मधुरे**ति । क्रीडार्थमेव यामेकां गृहीत्वा रहस्येतद्व्यतिरिक्तास्त्यक्त्वा तदनुगुणत्वेनैव तादृग्वनान्तरं प्राप्य तत्तत्सामग्रीसम्पादनत्वात् केशप्रसाधनादिकं कृत्वा नृत्यादिकं करोतीति भगवानेतयैवोपभुक्त इत्यर्थः । एवं सति तदनुकरणत्वेनैव कदाचित् युष्माकमपि तदाज्ञया वा जीवनसम्पादनं करिष्यतीति तामेव प्रार्थयन्तीति भावः । अथवा । तामपि त्यक्त्वा ततोऽपि वनान्तरं गत्वा स्वयमेव तिष्ठति न तु तत्सहित इति तर्हि तामेव दृष्ट्वा सर्वास्तत्रैव स्थिता भवन्तीति, यद्येतन्मिलनार्थं भगवानागमिष्यति तदाऽस्माकमपि दर्शनं भविष्यतीत्येतत्साहाय्यकर्तृत्वेन ता मिलनोत्साहकतया माधुर्यविशिष्टां तां प्रार्थयन्तीति तदर्थमेव सर्वं कुर्वन्तीत्यर्थः । तथा सत्येतद्वत्यनुसारेणास्माकमपि गतिर्भविष्यतीति नातः परमेनां त्यक्त्वा गन्तुं शक्नुवन्तीति सहसा प्रवृत्तिरिति भावः । यद्वा । पुलिनस्थत्वात्पुनर्दर्शनमेतत्कृतोपकारत्वेनैव ज्ञायत इति नो चेत्पूर्वमेव कथं न जातमिति तात्कालिकानुभवजन्यज्ञानवत्त्वेन तद्भावात्मकत्वादेवास्माकं कार्यसिद्धिर्भविष्यतीति निश्चित्य तादृग्गुणविशिष्टां प्रार्थयन्तीति भावः । अथवा । गुणगानादिकृतिकरणत्वेन चैतदर्थमेवाविर्भूतो भगवान्, नास्मदर्थम्, नो चेद्-गुणगानं तावदस्माभिः पूर्वमेव कृतं परन्तु नाविर्भूत एव, ततोऽनुमीयते, किं चित्रं

यो यस्याधीनः स तु तदनुकूलं करोत्येवेत्यर्थः । तथा सति तादृग्दर्शनाभिलाषयुक्तत्वेन तत्फलप्राप्त्यर्थं तावदेतस्या एवाश्रयकरणं युक्तमिति भावः । यद्वा । स्वस्य साक्षाद्भगवत्स्वरूपसन्नियोगशिष्टत्वेन तत्तत्कृतिकरणत्वेनाधुना विप्रयोगरसानुभवकरणार्थं तत्तदवस्थापन्नत्वेन तादृशीभिः सह तथैव प्रार्थयन्तीति भावः ॥ एवं गोपीमाधुर्यं निरूप्य लीलामाधुर्यं निरूपयन्ति **लीला मधुरे**ति । जात्येकवचनाभिप्रायेण भगवतो लीला मधुरेत्येतावदुक्तम् । किन्तु ता असंख्याता एव । यत्र यथापेक्षितरूपाणि तथा निरूपणार्थं च दशविधलीलासु तासां प्रविष्टत्वादित्यर्थः । यतो भगवदवतारा असंख्याताः सन्तीति तथा लीलाया साक्षात्स्वरूपात्मकत्वात्ता अप्यसंख्याता इत्यर्थः। किंच । यथाऽवतारिण्येव सर्वेऽवतारास्तिष्ठन्ति तथा दशविधलीलास्वेव सर्वा एव संविशन्तीत्यर्थः । तत्र बाल्यानुकृतिकरणत्वेनैव भगवतः सर्वलीलाकरणत्वात्तत्तद्भावपूरकत्वेन भक्तानामभिलषितार्थदानकरणत्वेन च तास्तथैव प्रार्थयन्तीति भावः । अथवा । गोचारणादिलीलायामेव सर्वरसानुभवकर्तृत्वात्तादृग्भक्तमनोरथादिपूरकत्वेन कुंजान्तरीयरसदातृत्वेन च भावपूर्वककटाक्षावलोकनादिकं यथा भवति तथा रमणं करोतीत्यर्थः । तथा सति बाल्यानुकरणत्वेनैव सर्वाज्ञातलीलाया रसदातृत्वेन तादृशानुग्रहं करोतीति पूर्वानुभूतं स्मृत्वैव विप्रयोगकालक्षेपार्थं लीला मधुरेति तां प्रार्थयन्तीति भावः । यद्वा । नृत्यविशिष्टरासलीलाकरणत्वेन तासां हृदि रसाविर्भावत्वादैश्वर्यादिगुणविधायकत्वं, नो चेद्बहुनर्तकीयुक्तो नृत्यविशेषो रास इति लक्षणानुपपत्तेः । तस्मादेतदनुरोधित्वेनैव रासकरण नान्यथेत्यर्थः । तथा सति संयोगविशिष्टरसानुभवजनकत्वेन जीवनसंभावनत्वादिति भ्रमरकीटन्यायेन लीलात्मकाः सत्यस्तामेव प्रार्थयन्तीति भावः । अत एव 'रासलीलैकतात्पर्य' इति **श्रीमत्प्रभुभिः सर्वोत्तम** एवोक्तम् ॥ एवं लीलामाधुर्यं निरूप्य युक्तमाधुर्यं निरूपयन्ति **युक्तं मधुर**मिति । युक्तं योजनं, तेन भक्तानां तत्तल्लीलारसानुभवकरणार्थं तत्तत्क्रियाव्यापारसत्त्वेन यथाऽधिकारप्राप्तानां लीलासमुद्रे योजितवानित्यर्थः । अन्यथाऽक्षरात्मकानन्दमध्यपातित्वेन भक्तानां लीलान्तराप्रवेश एव न संभवतीति कथं साक्षाद्भजनानन्दव्यतिरेकेण फला-

नुभव इति तत्प्रार्थयन्तीति भावः । अत एव 'भजनानन्दयोजन' इत्युक्तम् । अथवा । बालल्लीलायामेव भक्तानां तथाकरणाद्यशोदोत्संगलालितः सन् तासामन्तर्भावं ज्ञात्वा भगवान्सर्वकरणसमर्थत्वेन तादृशगोपनरीत्या तदनुकूलकृतिमत्त्वेन च सर्वाभीष्टदातृत्वात्साक्षात्स्वरूपानन्द एव तान् योजयतीत्यर्थः । तथा सति तत्स्वरूपानन्ददानकरणत्वेनैव तत्तद्भाववतीनां जीवनसम्भावना, नान्यथा । केवलशैशवानुकरणत्वेन तादृशीनां जीवनं संभवतीति भावः । अत एव 'आत्मानं भूषयांचक्रु'रित्युक्तम् । यद्वा । भगवान्वनविहारादिकमपि कुर्वन् भक्तानां तत्तत्संकेतस्थलादिसूचकत्वेन तत्तद्रसानुभवकरणार्थं क्रीडाव्याजेन गोचारणादिक्रियाज्ञप्तत्वादेतासां हितकरणत्वेन तांस्तथैव योजितवानित्यर्थः । तथा सति योजनक्रियानुकूलव्यापारकृतिमत्त्वेन सर्वासामभिलाषपूरकत्वात्तादृग्माधुर्यविशिष्टयोजन ताः प्रार्थयन्तीति भावः । अथवा । स्वस्य साक्षाद्भगवत्स्वरूपात्मकत्वेन योजनक्रियाद्यनुसन्धानेन पूर्वानुभूतलीलानुस्मरणात्तापभावजननात्कथमपि तन्निर्वाहार्थं तादृग्भावविशिष्टं योजनमेव विभावयन्तीति भावः ॥ एवं युक्तमाधुर्यं निरूप्य मुक्तमाधुर्यं निरूपयन्ति **मुक्तं मधुरमिति** । मुक्तं मोचनं, तदपि भक्तानां हितकरणार्थमेव, न त्वन्यथा, नो चेद्विप्रयोगरसः कथं संभविष्यतीति संयोगरसपुष्टीकरणार्थमेव त्यागकरणमुचितमित्यर्थः । किंच । न हि भगवांस्तासां त्यक्त्वा गतः, किन्तु परोक्षस्थित एव, तदनुकूलकृतिकरणत्वेन मानादिदोषनिवारकत्वेन च शुद्धभावसम्पादकत्वात्स्वरूपानन्ददानकरणत्वाच्च तथा करोतीत्यर्थः । तथा सति त्यागकरणादिकृतिमत्त्वेन तादृशरसोपलब्धित्वात्तदधिकरसाधायकत्वेन जीवनसम्भवत्वात्तास्तथैव प्रार्थयन्तीति भावः । अत एव **भगवता गीतायामित्युक्तम्** । 'यत्तदग्रे विषमिव परिणामेऽमृतोपम'मित्यत्रापि तथैवोक्तमिति निश्चयादित्यर्थः । अथवा । श्रीमन्नन्दराजस्यान्याश्रयकरणत्वेन मर्यादामार्गीयदोषातिग्रस्तत्वात्तद्धितकरणत्वेन भक्तिमार्गीयत्वसम्पादनार्थं सर्वथा निरोधकरणार्थमेव च वरुणनीतत्वे तत्रापि मोचितवान् । किंच । पुनस्तद्वदेवानुग्रहकरणार्थमेव मर्यादाग्रहणस्य दोषावहत्वादिति ज्ञापनाय कश्चिन्महाहिना ग्रस्तत्वेन स्वाश्रयकरणार्थमेव स्वनामोच्चारणमात्रेणैव मोचनं यथा भवति तथैव रक्षितवानित्यर्थः । तथा सति आश्रयानुकूलकृतिकरण-

त्वैनैव दोषनिवृत्तिर्नान्यथेति ज्ञात्वा कृष्ण कृष्णेति पूर्वं चरितं स्मारं स्मारं तदाश्रयप्रापकत्वेन तदेव प्रार्थयन्तीति भावः । अत एव 'अन्यस्य भजनं तत्र स्वतोगमनमेव चे'त्युक्तमाचार्यवर्यैः । यद्वा । मुक्तमित्यत्र भावे क्तस्तेन रासादिकृतिकरणत्वेन मण्डलीकृतभक्तानां हस्तग्रन्थ्यवलम्बितत्वेन तत्तद्भावानुसारिनृत्यकरणत्वेन च कदाचित् हस्तग्रहणमपि संभवतीति पुनस्तथैव जात इत्यर्थः । तथा सति त्यागकरणरसाधायकत्वेन तादृशकटाक्षावलोकनादिभिः क्रीडाकरणत्वेनाधुना तद्विना स्थातुमशक्यत्वात्कथमपि तदेव माधुर्यविशिष्टं प्रार्थयन्तीत्यर्थः । अथवा । स्वस्य भगवत्स्वरूपसन्नियोगशिष्टत्वेन तद्भावनिरीक्षणत्यात्तदनुभवेन जीवनसंभावनं नान्यथेति विचार्य विप्रयोगरसानुभवकरणत्वेन तादृग्भाववतीभिः सह तदेव प्रार्थयन्तीति भावः ॥ एवं मुक्तमाधुर्यं निरूप्य दृष्टमाधुर्यं निरूपयन्ति **दृष्टं मधुर**मिति । भगवतो लीलात्मकत्वात्तद्रसपूरणत्वेन भक्तानामानन्ददानार्थं च गोचारणादिसमय एव तादृगीक्षणैः प्रणयपूर्वकावलोकनं यथा भवति तथा भगवान् करोतीत्यर्थः । नो चेद्वनविहारादिकं तावत्किमर्थं, गोचारणकरणं तु गोपैरपि भविष्यतीति तत्रस्थानामपि स्थावरजंगमानां लीलास्थानां भावपूर्वककटाक्षावलोकनार्थं गमनादिकं करोतीति तद्भावापन्नत्वेन तास्तादृग्दर्शनमेव प्रार्थयन्तीति भावः । तथा सति यत्र बाल्यदशायामपि तादृग्दर्शनापेक्षत्व तत्र साक्षाद्रसात्मकसंयोगदशायां भगवतः किमु वाच्यमिति कैमुतिकन्याय उक्तो भवतीत्यर्थः । अथवा । दिवा वनगतत्वात्सायमागमनसमये तादृग्विप्रयोगासहमानतया तद्भावपूर्वकत्वेन तथार्तिवशात्स्वप्रियाणां प्रत्यंगावलोकनादिकं तथैव करोतीत्यर्थः । तथा सति तादृग्भाववतीनां साक्षात्फलानुभवकर्त्रीणां तद्दर्शनमेव जीवनसम्पादकं नान्यदित्यन्यथाभावनमुररीकृत्य सर्वास्तथैव प्रार्थयन्तीति भावः । यद्वा । स्वस्य साक्षाद्रसात्मकस्वरूपत्वेन तत्तद्दर्शनानुकूलकृतिकरणत्वज्ञानेन तादृशसुखोपलब्धित्वाद्विप्रयोगरसाक्रान्तदेहत्वेन तादृशीभिः सह माधुर्यविशिष्टं तदेव भावयन्तीति भावः । एवं दृष्टमाधुर्यं निरूप्य शिष्टमाधुर्यं निरूपयन्ति **शिष्टं मधुर**मिति । शिष्टमत्रशिष्टं,तत्तु सैवात्र, यावद् भूमौ स्वचरणांकिता भक्तिर्न स्थाप्यते तावदवशिष्टपुरुषार्थत्वमेव, तस्मात् वृन्दावनप्रवेशकरणत्वेन

तत्रैव भक्तिः स्थापितेति भगवदीयानां हृदि भक्तिस्थापनकरणं तु युक्तमेवेत्यर्थः । अत एव 'वैष्णवा वनस्पतय'इति श्रुतेः । एवं सति वृन्दाया भक्तिरूपत्वात्तदंगीकारेणैव तन्नस्थानां सर्वेषामप्यंगीकारो भावनीय इति भावः । अथवा । यदि भक्तानां हृदि चरणस्थापनं न कुर्यात्तदा भक्तिराहित्याद् गुणगानादिकमपि ते कथं करिष्यन्तीति विचार्य स्वस्यावशिष्टपुरुषार्थस्थापकत्वेन तथैव कीर्तिवर्णनं कारयित्वा तद्धृदि चरणस्थापनेनैव भक्तिः स्थापितेत्यर्थः । अत एव अवशिष्टपुरुषार्थस्थापनार्थमेव 'प्राविशत् गीतकीर्ति'रित्युक्तमाचार्यवर्यैः । यद्वा । स्वस्य हरित्वोपपादितभक्तानुग्रहकार्यकर्तृत्वेन भक्तवत्सलत्वात्तत्प्रार्थनायाः पूर्वमेव तत्रापि भूयोदर्शनमात्रेणावशिष्टपुरुषार्थख्यापनार्थं तद्दुःखहरणं भक्तिस्थापनं च करोतीत्यर्थः । कर्तुमकर्तुमन्यथाकर्तुंसमर्थत्वेनैतद्भावस्य गजराजोद्धृतावेव स्पष्टीकृतत्वात्तत एव भावनीयमित्यर्थः । तथा सत्येतावन्मात्रनिश्चयकरणत्वेनैव भगवानस्माकमपि प्रार्थनाव्यतिकरेण साहाय्यं भविष्यतीति ज्ञात्वा तादृक शिष्टमेव प्रार्थयन्तीति भावः । अथवा । स्वस्य साक्षाद्भगवत्स्वरूपसन्नियोगशिष्टत्वात्तत्समानधर्मकरणत्वेन यदि स्वेनैव दैवजीवानामुद्धृतिर्न क्रियत इति तदा स्वस्याप्यवशिष्टपुरुषार्थत्वात्तत्स्थापनकरणार्थं तदेवानुकूलकृतिकरणत्वेन तदाज्ञया प्रादुर्भूतत्वेन च तदुपकरणात्तादृग्भाववतीभिः सह माधुर्यविशिष्टमेव प्रार्थयन्तीति भावः । अत एव 'दैवीसृष्टिर्व्यर्था च मा स्या'दिति वल्लभाष्टके प्रभुभिः स्तुतिः क्रियत इत्यर्थः ॥ एवं धर्मविशिष्टमाधुर्यं निरूप्य धर्मिविशिष्टमाधुर्यं निरूपयन्ति मधुराधिपतेरखिलं मधुरमिति । साक्षात्स्वरूपानुभवकरणत्वे प्रमाणप्रयोजनाभावाद्यत्र धर्मधर्मिणोरेकजातीयत्वादिति न्यायाल्लीलानां भगवद्धर्मात्मकत्वादेव मधुरत्वप्रतीतिस्तत्र तदधिपतौ किं वाच्यमिति निश्चयेन भगवतो मधुराधिपतेर्यदखिलमवशिष्टं तत्सर्वं मधुरमेवेति प्रार्थनापूर्वकं मधुराधिपतेरखिलं मधुरमित्युक्तम् ॥ ७ ॥

एवं प्रापंचिकं त्यक्त्वा भगवद्बोधसिद्धये ।
लीलात्मिकास्तास्ताः सर्वा जाता एव न संशयः ॥१॥

तथैव **श्रीमदाचार्याः** स्वकीयानां हिताय च ।
लीलात्मकं फलं ज्ञात्वा निरोधं साधयन्ति हि ॥२॥

**गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।**
**दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥८॥**

**गोपा मधुरा** इति । गा पान्तीति गोपास्तद्रक्षाकरणत्वेन भगवतोपि वल्लभास्तैः साकं भगवान् क्रीडतीति, यतः स्वयमपि गोपालस्तस्मात्समानशीलव्यसनवत्त्वेनैतत्सामानाधिकरण्यात्परस्परसानुभवजनकत्वेन तादृशमण्डलीमध्यस्थित एव सर्वदा वर्तत इत्यर्थः । किंच । वने भोजनादिकमपि तत्रैव करोति यदा ते सर्वे गोपालाः स्वस्वभोजनपात्रं गृहीत्वा स्वसन्मुखमेव तिष्ठन्तीति तादृशप्रीतिजनकत्वेन तथा विलासं करोतीत्यर्थः । तथा सति गीतहास्यकटाक्षाद्यवलोकनादिकरणत्वेन तांदृशान्तरंगभावसूचकत्वाद् भगवतः सुखाधायका इति माधुर्यविशिष्टांस्तान्प्रार्थयन्तीतिः । अथवा । स्वकीया अन्तरंगा ये गोपालाः कृष्णाद्यस्ते भगवदाज्ञया वनक्रीडायां तदनुकूलकृतिकरणत्वेन यद्यत् कुर्वन्ति तत्पुनः सायमागमनानन्तरं गृहगमनव्यतिरेकेण रसवशात् स्वामिनीनामग्रे सर्वं सूचयन्तीत्यर्थः । तेन विप्रयोगजनिततापनिवर्तकत्वेन तद्वचनश्रवणमात्रोपजीवकत्वात्तत्समय एव तान् दृष्ट्वा तथैव प्रार्थयन्तीति भावः । यद्वा । भगवतो विप्रयोगदशायामपि स्वस्यान्तरंगत्वाद्यर्किंचित्स्वास्थ्यकरणार्थमविचार्य प्रियत्वकरणेन स्वामिनीकथितवृत्तान्तप्रार्थनाकरणत्वेन प्रभावपि प्रिया भवन्तीत्यर्थः । तथा सति प्रणयरसावबोधककार्यकर्तृत्वेन भावोद्दीपकत्वात्तादृशोपकृतिकरणभाववत्त्वेन ताभिस्तथैव प्रार्थितास्त इति भावः । अथवा । स्वस्य साक्षाद्रसात्मकसन्नियोगशिष्टत्वेन कृपाकटाक्षादिसूचकत्वेन च स्वस्याप्यन्तरंगकार्यकर्तृत्वात्तत्प्रियतमकृतिमत्त्वं ज्ञात्वा स्वसंतोषाधायकत्वेन तान् प्रति तथैव प्रार्थयन्तीति भावः ॥ एवं गोपमाधुर्यं निरूप्य गवां माधुर्यं निरूपयन्ति **गावो मधुरा** इति । गावो लीलात्मिका भगवदनुभावज्ञा वेणुगानश्रवणमात्रेण यत्र तृणादिकं चरन्ति तत्र सर्वं त्यक्त्वा भगवन्निकट एव शीघ्र-

मागत्य मुखावलोकनपूर्वकं यथा भवति तथा कर्णपुटोत्तभितत्वेन मुहुर्मुहुस्तदधरामृतपानं सादरपूर्वकं कुर्वन्तीत्यर्थः । किंच । आगमनसमये साक्षान्नादानन्दप्रविष्टत्वात्तदनुभवेनानन्दभराद् भूमावपि पयःसिञ्चनादिकं कुर्वन्त्यः शनैः शनैरागच्छन्तीति वा । तथा सति भावपूर्वकागमनकरणत्वेन साक्षात्स्वरूपानुभवं यथा कुर्वन्ति तथा वयमपि करिष्याम इति ज्ञापनाय तथा प्रार्थयन्तीति भावः । अत एव 'गावश्च कृष्णमुखनिर्गतवेणुगीते'त्यत्र तथैव निरूपितमाचार्यवर्यैः । अथवा । यत्र यत्र गावः स्वेच्छया पशुजातीयत्वादविचार्यत्वेन तृणलोभात्स्वत एव गच्छन्ति तत्र तत्र भगवान् गोपालैः सह क्रीडां कुर्वन् तदनुगुणत्वेन वने वने चारयन् गच्छतीत्यर्थः । नहि केवलं तद्व्यतिरेकेण कदाचिद्वनगमनमेव करोतीति भावो ज्ञाप्यते । किंच । कदाचिन्मात्राप्रेषितसख्यानीतभोजनराहित्येन बुभुक्षितः सन् मार्गमध्य एव गोदोहनादिकं कृत्वा तदनुभवज्ञानजन्यत्वेन ता अपि तथैव तिष्ठन्तीति गोपांस्तद्वत्सान्पयः पाययित्वा स्वयमपि पानं करोतीत्यर्थः । तथा सति परस्परभावानुकूलकृतिकरणत्वेन पूर्वं भगवन्मुखारविन्दोद्गताधरसीधुपानमेताभिः कृतमधुना भगवता क्रियत इति विशेषानुभवकरणत्वेन ता एताः प्रार्थयन्तीति भावः । यद्वा । स्वस्य साक्षाद्भगवदास्यरूपत्वात्तदुभयरसोपयोगित्वेन तत्तल्लीलानुभूतत्वादधुना विप्रयोगरसाभिनिवेशेन स्वसमानशीलाभिः सह तथैव विभावयन्तीति भावः ॥ एवं गवां माधुर्यं निरूप्य यष्टिमाधुर्यं निरूपयन्ति यष्टिर्मधुरेति । यदा भगवान् गोचारणादिकं करोति तदा वेणुवेत्रव्यतिरेकेण कदापि न गच्छति किन्तु तत्सहित एव तत्तत्कार्यकरणार्थं तदुपयोगस्यावश्यकत्वात्तद्वेषधारणत्वेनैव वनगमनं करोतीत्यर्थः । किंच । 'यथा राजा तथा प्रजे'तिन्यायादेतदनुरोधित्वेन सर्वे गोपालास्तदनुकरणत्वेन यष्टिं गृहीत्वा स्वस्वगोधनानि पुरस्कृत्य तथैव भगवता सह गमनं कुर्वन्तीत्यर्थः । तेन करावलंबितयष्टिकाग्रहणेन कदाचित् स्वस्कांसे तद्धारणत्वेन च कदाचिदपूर्वैव श्रीर्भवेदिति पूर्वानुभूतत्वात् माधुर्यरूपां यष्टिं प्रार्थयन्तीति भावः । अथवा । बालस्वभावानुकूलकृतिकरणत्वेन क्रीडार्थमेव तद्धारणं तेपि तदर्थमेव धारयन्तीति परस्परं तैः साकं प्रत्यहं क्रीडतीत्यर्थः ।

तथा सति आत्मरसानुभूतलीलादर्शनोद्गमत्वाद्विशेषरसाधायकत्वेन ताः सर्वास्तामेव प्रार्थयन्तीति भावः । यद्वा । स्वस्य साक्षाद्रसात्मकस्वरूपात्मकत्वात्तत्कार्योपकरणत्वेन तत्तद्दुःखानुभूतित्वाद् विप्रयोगरसानुभवकरणार्थं ताद्दृग्व्यवस्थापन्नत्वेन कथमपि कालक्षेपार्थं पूर्वानुभूतं सर्वं स्मृत्वा तदेव प्रार्थयन्तीति भावः ॥ एवं यष्टिमाधुर्यं निरूप्य सृष्टिमाधुर्यं निरूपयन्ति **सृष्टिर्मधुरे**ति । सृष्टिः लीलासृष्टिस्तत्करणं तु भगवतैव संभाव्यते नान्येन । तस्मात् लीलार्थं व्रजस्थानां सृष्ट्वा स्वरूपानन्ददानार्थं स्वयमपि तत्रैव प्रविशतीत्यर्थः । अन्यथा लीलानां तदात्मकत्वमेव न स्यादतस्तद्व्यतिरेकेण स्वयमपि स्थातुं न शक्नुयत इति सर्वदा तदन्तःपातित्वेन भक्तानां तद्रसानुभवं कारयित्वा स्वयमपि करोतीत्यर्थः । अत एव 'तत्सृष्ट्वा तदेवानुप्राविश'दिति श्रुतिः । अथवा साक्षात्स्वरूपानन्दानुभवस्तत्रस्थानामेव नान्येषां, कुतो जीवानामसम्भावितत्वात्तदतिरिक्तानां साक्षात्स्पर्शाभावाच्च तथा न संभवतीत्यर्थः । अन्यथा 'जीवा स्वभावतो दुष्टा' इति कथं वदेयुः ?। तस्मात् लीलासृष्टिस्थानामेव साक्षादंगसंगित्वात्तत्स्वरूपानन्दानुभवकरणत्वेन भजनानन्दानुभूतरसप्राप्तित्वात् तत्रैव मज्जनोन्मज्जनादिकरणत्वेन जलमीनवत् स्थिता भवन्तीत्यर्थः । अत एव 'अन्यैव काचित्सा सृष्टिर्विधातुर्व्यतिरेकिणी'ति तथैवोपदिष्टत्वात् । तथा सति भजनानन्दनिमग्नत्वेन भगवदधीनत्वात्पूर्वोक्तदृष्टांतत्वात्तेनैव न संभवति नान्यथेति भावः । अथवा । स्वस्य साक्षाद्रसात्मकस्वरूपसन्नियोगशिष्टत्वेन दैवोद्धारप्रयत्नीकृतत्वात्स्वद्वारेणैव तदुपयोगकरणत्वेन यमुनासेवातः तनुनवत्वादिकरणत्वेन च स्वकीयानां तद्योग्यतानिरूपकत्वेन वा तथैव प्रार्थयन्तीति भावः ॥ एवं सृष्टिमाधुर्यं निरूप्य दलितमाधुर्यं निरूपयन्ति **दलितं मधुर**मिति । दलितं दलन, तद् दुष्टदैत्यानां, तदर्थमेव भगवानवतीर्णो जात इति व्रजरक्षाकरणत्वेनैव तत्र स्थितिकरणत्वाद्यदा पूतनादिदैत्यागमनं जातं तदैवानन्तशक्तिमत्त्वेन तन्निराकरणीयत्वाद्बाल्यदशायामतिविस्मयकरणत्वेन भक्तानामभयदानं करोतीत्यर्थः । किंच । गोचारणादिक्रीडायामपि केश्यादिदुष्टनिवारकत्वेनैव स्वस्य गोपालत्वं, नो चेद्यदि दुष्टदैत्यादिभिर्वनमाक्रमितं स्यात्तदा गावस्तत्र कथं प्राप्ता भविष्यन्तीति सा

क्रीडैव न भविष्यतीति, तत्करणं त्वावश्यकमिति नामार्थसार्थकत्वेन तथा करोतीत्यर्थः । किंच, कालिन्दीजलपानकरणानन्तरं गोपालास्तद्विमूर्छिता जाताः, गावश्च तथा क्रन्दनं कुर्वन्तीति, तद् दृष्ट्वा भगवान् भक्तवत्सलतया तस्या निर्दोषकरणार्थं सद्य एव जले प्रविश्य दुष्टकालियदलनं करोतीत्यर्थः। तथा सति गोरक्षाकरणत्वेन योगबलान्नामसार्थकत्वं स्वस्मिन्नेव प्रतिफलितं, नान्ये गोपालास्तथा भवन्तीति तत्र रूढिरेव वक्तव्येति भावः । अथवा, गाः पान्तीति गोपास्तान् लातीति गोपालः, पुनस्तद्रक्षाकरणे तथैव नाम-सार्थकत्वात्तदनेकभयनिवारकत्वेन दुष्टदलनादिकं स्वयमेव करोतीत्यर्थः । तथा सति पूर्वानुभूतलीलास्मरणमात्रेण विप्रयोगरसाभिनिविष्टत्वात्तद्रक्षाभि-लाषकरणत्वेन माधुर्यविशिष्टदलनं प्रार्थयन्तीति भावः । यद्वा, श्रीगोवर्धन-यागकरणत्वेनान्यसाधनराहित्याद् भक्तानां तथा निरोधकरणत्वेन स्वशरणा-गतानां रक्षामेव करोतीत्यर्थः । तथा सति यथेन्द्रहितकरणार्थमेव तद्दर्पदल-नादिकं करोति तथास्माकमपि हितकरणार्थं मानादिदर्पदलनं करोत्वित्याशयेन दलनमेव प्रार्थयन्तीति भावः । अथवा, स्वस्य साक्षाद्रसात्मकस्वरूपत्वा-त्तत्तत्कार्यानुगुणत्वेन लीलारसजनकत्वादधुना विप्रयोगरसानुकूलकव्यापारकृ-तिमत्त्वेन तादृग्रसानुभवकरणार्थं तादृशीभिः सह तथैव प्रार्थयन्तीति भावः कटाक्षितः ॥ एवं दलितमाधुर्यं निरूप्य फलितमाधुर्यं निरूपयन्ति **फलितं मधुर**मिति । भगवान्मधुर एव भक्तानां हृदि प्रतिफलित इति भक्तानु-कूलकृतिकरणत्वेन सदानन्दवाचकत्वात् कृष्ण इति फलात्मकनामत्वेन तत्फलसम्पादनार्थमेव श्रीमन्नन्दराजभवने प्रादुर्भूतो जात इत्यर्थः । किंच, भक्तानां लीलामध्यपातित्वेन तत्सहितलीलासामग्रीः पूर्वं विधाय क्रीडास्था-नत्वात् तत्करणार्थं श्रीमद्गोकुल एव पश्चात्स्वयं प्रादुरासीदित्यर्थः । किंच, लीलानां स्वरूपात्मकत्वात्स्वरूपस्य तदात्मकत्वादित्यन्योन्याश्रयत्वेनैव स्थिति-करणत्वाद्भक्तानां तन्मध्यपातित्वेन च तदाश्रयाधीनत्वादपि स्वस्य लीला-करणमुचितमिति तद्रूपेण फलितमित्यर्थः । तथा सति भक्तानां फलसम्पाद-कत्वेन तद्रूपत्वेनैव प्रादुर्भूतत्वात्सर्वदा तदनुभवकरणत्वेन रसाधायकत्वात् तास्तथैव प्रार्थयन्तीति भावः । अथवा, प्रादुर्भावानन्तरमपि स्वामिनीनां

भावपूर्वककटाक्षावलोकनादिभिः कृत्वैव स्वरूपपोषणं नान्यथेति तद्भावात्मकत्वेनैव स्थितिकरणत्वात्प्रतिक्षणपोषणत्वेन वृद्धौ सत्यां तत्रैव फलितमित्यर्थः । तथा सति परस्परसमानाधिकरणत्वेन तद्भावानुरूपफलीकरणत्वेन च तत्पूर्वानुभूतत्वात्तद्व्यतिरेकेण स्थातुमशक्यत्वाच्चाधुना तदनुभवकरणार्थं फलितमेवैताः प्रार्थयन्तीति भावः । यद्वा, उद्बुद्धशृंगाररसात्मकदशायामपि वेणुकूजनत्वेन नादामृतस्य स्वामिनीनां हृदये प्रविष्टत्वात्तदनुभूतत्वेन तथा स्वरूपाभिज्ञत्वेन तद्रसपानकरणत्वेन च मुखावलोकनं कुर्वन्तीत्यर्थः । किंच, अन्यासक्तिनिराकर्तृत्वेन स्वमानशीलानां संबोध्य यदनुभूतं स्वरूपं तदेव विज्ञापयन्तीत्यर्थः । तथा सति स्वभाग्याऽभिलाषपूर्वकांकुरितत्वेन स्वस्वभावसिञ्चनकरणत्वेनापि क्रमवशात्पुष्पानुभवकारणानन्तरं फलत्वेनेदमेव प्रतिफलितमिति भावः । अत एव 'अक्षण्वतां फलमिदं न परं विदाम' इति स्वप्रियाभिस्तथैवोक्तमित्यभिप्रायज्ञापकत्वेन पूर्वानुभूतत्वादेतास्तथैव प्रार्थयन्तीति भावः । यद्वा, स्वस्य साक्षाद्रसात्मकस्वरूपसन्नियोगशिष्टत्वेन तत्फलानुभूतत्वात् प्रतिक्षणं तत्तत्स्मरणकर्तृत्वेन विप्रयोगरसाविर्भावित्वात्स्वयमपि तादृग्भाववतीभिः सह लीलाविशिष्टं फलितमेव प्रार्थयन्तीति भावः । अत एव 'लीलाभिः फलितं भजे व्रजवनी शृंगारकल्पद्रुम'मिति **प्रभुभिस्तथैवोक्तम् ॥**

**एवमुपक्रमोपसंहारपूर्वकं धर्मविशिष्टमाधुर्यं** निरूप्य धर्मिविशिष्टमाधुर्यं निरूपयन्ति **मधुराधिपतेरखिलं मधुरम**िति । सर्वदा तन्मध्यपातित्वेन लीलात्मकत्वाद्यत्राभेदकरणत्वेन स्थितिस्तत्र यन्मध्ये पातितस्तद्ग्रहणेन गृह्यत इतिन्यायाद्धर्माणां माधुर्यनिरूपणत्वे किं वाच्यमिति तदधिपतेर्भगवतो मधुराधिपतेर्यदखिलं लीलात्मकं तत्सर्वं मधुरमेवेत्यर्थः । तथा सति तद्रसास्वादपूर्वकं यथा भवति तथा विप्रयोगानुभावं तत्तन्माधुर्यं निरूपणात्मकं सर्वदा विभावयन्तीति भावः ॥

इति **श्रीवल्लभाचार्य**कृपया प्रकटीकृतम् ।
एतन्निगूढमाधुर्यं **मधुराष्टक**संज्ञकम् ॥ १ ॥

**विट्ठलाधीशचरणाश्रयणात्सर्वदा मया ।**
**भावात्मकं हि माधुर्यं प्रत्यहं चानुभूयते ॥ २ ॥**

तदीयानां हितार्थाय निश्चित्यैवं निरूपितम् ।
पश्यन्तु सर्वथा विज्ञा न तु तद्भावविच्युतः ॥ ३ ॥

**श्रीवल्लभाधीश**पदाम्बुजातात्सञ्जातभक्त्या विशदीकृतं यत् ।
तदेव माधुर्यमिहाद्भुतं वै मधुव्रतानां मधुराकृतीनाम् ॥ ४ ॥

॥ इति [1]**श्रीवल्लभविरचिता मधुराष्टकविवृतिः सम्पूर्णा** ॥

**श्रीकृष्णाय नमः ।**
**श्रीगोपीजनवल्लभाय नमः ।**
**श्रीमदाचार्यचरणकमलेभ्यो नमः ।**

# मधुराष्टकम्

## श्रीरघुनाथकृतविवरणसमेतम् ।

यन्नामरूपमधिकं माधुर्यैकनिधीकृतम् ।
तं नत्वा तन्मधुगिरं गायामि **मधुराष्टकम्** ॥ १ ॥

स्वरूपमात्रैकनिष्ठात्यन्तरङ्गभक्तानां स्वानुभवैकवेद्यं सपरिकरं **स्वरूप-माधुर्यमधरादि** प्रत्यङ्गगतमनुस्मृत्य विशिष्यावर्णनीयं पुनः पुनरनुभवार्थमनुवादपूर्वकं प्रार्थयन्त इवाहुः **अधरं मधुर**मिति ।

**अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।**
**हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥ १ ॥**

---

१. इयं टीका **श्रीहरिरायाणा**मिति केचिद्वदन्ति, तन्नैव युक्तमिति । प्रतिभाति । **श्रीहरिरायकृता** अन्यैव **मधुराष्टकटीका** मत्समिधौ वर्तते यतः । **श्रीहरिरायकृत**टीका तु **श्रीमत्प्रभुचरणकृतमधुराष्टकविवृते-**र्विवृतिः, इयं तु स्वतंत्रटीका वर्तते । अस्या भाषासाम्यं **श्रीगोकुलनाथ-प्रकटितसर्वोत्तमस्तोत्र-'बडी'टीकया** सह बहु वर्तते, अत एवं इयं टीका **श्रीवल्लभकृ**तेति कल्प्यते ।

अत्र मधुरपदं सर्वत्र सर्वेन्द्रियास्वाद्यं रूपं लक्षयत्यधरादीनां, तेन दर्शनस्पर्शनपानचुम्बनदंशादिषु प्रार्थनीयं ममास्तु इत्यर्थः सम्पन्नो भवति । मधुरस्मिन्नस्तीति मधुरम् । 'ऊषसुषिमुष्कमधो र' इति रः, धरणं धर इति व्युत्पत्त्या धृ धारण इति धातो रूपम् । अच्प्रत्ययान्तमप्प्रत्ययान्तं वा । तेन यस्मिन् दृष्टे न धरो धैर्यादिधारणं यस्मादिति अधरम् । लीलावसरविशेषसम्बन्धि ज्ञेयम् । यथा लोके शर्करादिमाधुर्यमास्वाद्य मधुरमित्येव ब्रूते, न त्वनुभवनमपि, अशक्यत्वादेवमत्रापीति भावः ॥ **वदनं मधुरमिति** । पूर्वोक्तदर्शनादिक्रियाविषयत्वप्रार्थनमिदं वचनम् ॥ **नयनं मधुरमिति** । जात्यभिप्रायेण रसैक्येन वोभयोरेकवचनम् । अत्र यथोचितक्रियाविषयत्वमेव, न तु यावत्पूर्वोक्तविषयत्वम् ॥ **हसितं** भावोद्दीपनमुन्मादकं च । तच्च नयनमुखोभयसाधारणं ज्ञेयम् ॥ **हृदयं** श्रियैकरमणं वक्षःस्थलं, तच्चालिङ्गनालङ्करणादिषु, विविधभावविशिष्टं मनो वा हृदयं ज्ञेयम् ॥ **गमनं** गोचारणचौर्याद्यर्थं निकुञ्जगृहं गन्तुं मानापनोदनाद्यर्थं च ज्ञेयम् । 'रसो वै सः' इति श्रुतेर्मधुररसात्मकस्वरूपस्याखिलं सर्वं यद् वक्तुमशक्यम्, [1]अवाच्यं गुह्यं वा । यद्वा, अखिलमन्यूनं पूर्णरसमिति यावत् तादृशमित्यर्थः । अन्यत्रापि 'यद्यद् विभूतिमत् सत्त्व'मिति वाक्यात् तत्सम्बन्धाधीनमेव सर्वेषां माधुर्यम् । अतो **मधुराधिपतेरिति** पाठः प्रकरणानुरोधादपि युक्ततमः । **मथुराधिपतेरित्यपि** क्वचित् पाठः ॥ १ ॥

**वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।**
**चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥२॥**

**वचनं मधुरमिति** । बालक्रीडायामव्यक्तमधुरमस्पष्टोच्चारणात् स्खलद्गीष्ट्वाद्वा । बाल्योत्तरकालीनं सार्वदिकमपि ज्ञेयम् ॥ **चरितं** चेष्टितं बालचरित्रं सकलचरित्रं वा । चौर्येण दधिनवनीतादिभक्षणं वा ॥ **वसनं** पीताम्बरं, कञ्चुकोष्णीषाद्याच्छादनं, नीपनिकुञ्जादिस्थितिर्वा ॥ **वलितं** वेष्टनं, भावे क्तः । क्रीडायां व्रजवधूनां दधिदुग्धजलाद्याहरणमार्गरोधनमित्यर्थः । रासमण्डले अन्यदा कदाचित् लीलावसरे ताभिर्वलितं रूपं वा । अस्मिन्

---

१ अव्ययमिति पाठः ।

पक्षे कर्मणि क्तः । भावेऽपि ज्ञेयम् ॥ केषाञ्चित् भक्तानामवस्थाविशेषमाज्ञाय तदर्थमकस्मात् सखीननुक्त्वैव यद्गमनं तच्चलितमुच्यते । भावे क्तः । पूर्वोक्तगमनाद् भेदकमिदमेव ॥ भ्रमणं वियोगकालीनेतस्ततोऽनवस्थया गतिः । यथा **श्रीगीतगोविन्दे** 'हरि हरि हतादरतये' इत्यादौ । 'तव विरहे वनमाली'त्यपि । अथवा, [1]गवादीनामन्वेषणार्थं प्रतिगोष्ठ गमनम् । अथवा, प्रयोजककर्तृत्वविवक्षयाणिजन्तत्वेनान्येषां लोकवेदव्यवहारे [2]चित्तविक्षेपकरणं तदर्थमपि, अरण्यादिगमनं वा ॥ **मधुराधिपतेरिति** पूर्ववत् ॥ २ ॥

**वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ ।**
**नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ॥३॥**

**वेणुरिति** । असुरसुधापूरितो वाद्यमानो हस्तस्थितो वा, [3]सङ्केतस्थितभक्ताह्वानकरो वा ॥ सायं गोपुरःसरं व्रजप्रवेशसमये अलकव्याप्तगोरजांसि **रेणुरित्युच्यते** । तेन [4]तल्लक्षितकुन्तलानामपि ज्ञेयम् । यद्वा, 'धन्या अहो अमी आल्य' इत्याद्युक्तश्चरणकमलपराग एव रेणुः ।' [5]**पाणिर्गुप्त**क्रीडायाम् । [6]"तासामतिविहारेणे'त्याद्युक्तभक्तास्यमार्जनगोपृष्ठप्रोञ्छनगोदोहनादिषु[7] वा ॥ **पादौ** [8]भक्तहृदयदेशस्थापनवन्दननर्तनादिषु ॥ **नृत्यं** नाट्यं रासे वृन्दावने श्रीगोकुलादौ नवनीतभक्षणातुरतायां च ॥ **सख्यं** समानशीलव्यसनत्वम् । तच्चौर्यादौ ज्ञेयम् ॥ **मधुराधिपतेरिति** पूर्ववत् ॥ ३ ॥

**गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।**
**रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ॥४॥**

**गीतं** गानं तत्कृतं भक्तविषयकं, **भक्तकृतं** तद्विषयकं वा ॥ **पीतं** पानमधरादीनाम् । गोष्ठे गोपैः सह क्षीरपानं वा । वक्त्रगतं पिशङ्गत्वं वा ॥ **भुक्तं** भोजनं यशोदानन्दगोप्यादिकारितम् । निमंत्रितस्य गोपस्त्रीभिस्तद्गृहे वा । [9]भोजनावशिष्टं वा । श्रीगोवर्धनोद्धरणेन अनन्यगतिकभक्तरक्षणं वा ।

---

१ अन्वेषणव्याजेनेति पाठः । २ चित्तविक्षेपकरणमिति पाठः ।
३ सङ्केतितेति पाठः । ४ कुन्तलमपीति पाठः । ५ मुक्तेति च पाठः ।
६ रतीति वा पाठः । ७ पुच्छेति पाठः । ८ न्यासेति पाठः ।
९ भोजनादिशिष्टे वेति भोजनाविशिष्टं च पाठः ।

**सुप्तं** शयनं निकुञ्जे किसलयकुसुमादिरचितशय्यायां कण्ठाश्लेषणादिप्रकारविशिष्टं वा ॥ **रूपमादर्शादिप्रतिबिम्बितम्**, [1]उरसि कुरङ्गमदादिलिखितं विचित्रं वा ॥ **तिलकं** ललाटे कस्तूरीचन्दनादिरचितं मुक्तारत्नादिमयं वा । दर्शनीयं **गोपिकागीतोक्तं** 'दर्शनीयतिलको वनमाले'त्यादिना ॥ **मधुरे**ति पूर्ववत् ॥ ४ ॥

**करणं मधुरं रमणं मधुरं तरणं मधुरं हरणं मधुरम् ।**
**वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥५॥**

**करणं** कृतिः स्वीकार इत्यर्थः ॥ **रमणं** रतिः बालक्रीडा वा ॥ **तरणं** प्लवनं यमुनाजले व्रजस्त्रीभिः सह, नौकया पारावारगमनक्रीडायां वा ॥ **हरणं** व्रतचर्यायां व्रजकुमारीणां वाससां, रुक्मिणीपारिजातादीनां वा ॥ **वमितं** अन्तःस्थितभावोद्गिरणं चर्वितताम्बूलादिदानम् ॥ **शमितं** शमनकरणं भक्ततापादीनां, दावाग्नेरासुरधर्मादीनां वा ॥ **मधुरे**ति पूर्ववत् ॥ ६ ॥

**गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।**
**सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ॥६॥**

**गुञ्जा**फलानि भूषणादिषु ॥ **माला** वनमाला गुञ्जाया वा ॥ **यमुना** विहारावसरे । **वीचयो** [2]जलोत्क्षेपणक्रीडायां कमलादिभिर्वा ॥ **सलिलं** निदाघक्रीडाश्रमेण कालिन्दीजलपाने ॥ **कमलं** परस्परं प्रीतिप्रहारलीलायाम्, अलङ्करणादिषु वा ॥ ६ ॥

**गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम् ।**
**दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ॥७॥**

**गोपी** जात्यभिप्रायेण गोप्य इति ज्ञेयम् । सर्वत्रैव तासामेवंविधत्वम् ॥ **लीला** भावपूर्वकदधिमन्थने बाहुकटिनितम्बस्तनालङ्कारादिचाञ्चल्यकृतिः, तत्सम्बन्धिरासादयो वा ॥ **युक्तं** योजनमङ्गप्रत्यङ्गानां रहसि । यद्वा, **युक्तं** समाध्यवस्थानां 'पूर्वं यत्र समं त्वये'त्याद्युक्तप्रकारेण । अथवा,

---

१ रहसीति पाठः । २ लत्तोत्क्षेपणेति पाठः ।

**युक्तं** गोदोहनावसरे वत्सयोजनं गोपादयोः ॥ **मुक्तं** मोचनं, पूर्वोक्तवत्सादीनांम्, नीवीकञ्चुक्यादीनां वा । गाढमालिङ्गय सीत्कारपूर्वकं सन्तप्तभक्तानां तापं नाशयित्वा **मोचनं**, तत्क्रियात इति वा ॥ **दृष्टं** साकूतेक्षणम् । भगवतो भक्तानां च परस्परं प्रत्येकं च ॥ **शिष्टं** शासनं चौर्येण नवनीताद्याहरणाय यावदहं [1]यथेष्टमद्मि तावत् कोपि आयाति चेत् शीघ्रं मह्यं निवेदय यथा पलाय्य गच्छामि धर्तुं न शक्नोति न वदिष्यसि चेत् प्रहरिष्यामि चौर्याहृतमत्तुं न प्रयच्छामि इत्येवं बिभीषिकापूर्वकं एवंविधमाज्ञापनं गोपबालकेषु । यद्वा, 'गोप्यो गोरसविक्रयार्थमखिला' इत्याद्युक्तदानप्रसङ्गेन धर्षणाज्ञापनम् ॥ ७ ॥

**गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।**
**दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥८॥**

**गोपा** गवाह्वानादिषु । गावो हुङ्कारपूर्वकं भगवत्समीपमन्योन्योपमर्दैन आगच्छन्त्यो **दुह्यमाना** वा । वेणुनादं श्रुत्वा [2]संवेद्यानिमिषदृग्भिर्निरीक्ष्यन्त्यो वा । **सृष्टिर्**वत्सवत्सतरीप्रसवबाहुल्यम् । **यष्टिरुत्पथगतिनिवारणे पशूनाम्** । दानप्रसङ्गे तासां निवारणे दधिकलशिकाभेदने वा । कदम्बमूले चरणावष्टम्भनेन स्थितौ वा ॥ **दलितं** विशारणं विकास इति यावत् । तन्मुखनयनादीनाम् । दैत्यदलनं वा, **कामोपमर्दो** वा ॥ **फलितं** आविर्भावः, भक्तानामपेक्षितैकान्तस्थले चित्ताभिज्ञतया प्राकट्यम् ॥ **मधुरेति** पूर्ववत् ॥ ८ ॥

**मधुराष्टकमाधुर्यमवधार्य [3]सुधाधनम् ।**
**निर्धनो धनितां याति न याति निधनं क्वचित् ॥१॥**

**इति श्रीमद्वल्लभनन्दनचरणैकशरणरघुनाथकृतौ मधुराष्टकविवरणं [4]सम्पूर्णम् ।**

---

१ अशितेति पाठः । २ संवेष्टयेति पाठः । ३ सुधाधरमिति पाठः । ४ निगमतरोः प्रतिशाखं मृगितं परितः परं ब्रह्म । मिलितमिदानीमङ्के गोकुलपङ्केरुहाक्षीणाम् ॥ १ ॥ इत्यधिकम् ।

श्रीकृष्णाय नमः ।

# मधुराष्टकतात्पर्यम् ।

स्वरूपगुणभेदेन द्विविधं गानमुच्यते ।
स्वरूपं तु रसानन्दस्तथा लीलासमन्वितः ॥ १ ॥

गुणास्तु भगवद्धर्माः स्वरूपोत्कर्षहेतवः ।
ते परोक्षे हि गीयन्ते स्वास्थ्यहेतुतयात्मनः ॥ २ ॥

स्वरूपं तु तदानन्दः प्रत्येकावयवैस्तथा ।
तत्तल्लीलाश्रयत्वेन माधुर्येण विभाव्यते ॥ ३ ॥

निरूप्यते समानेषु यदा स्थातुं न शक्यते ।
तदा तेनैव रूपेण विरहे तापसंयुतैः ॥ ४ ॥

निरूपणं रसस्यात्र माधुर्येणैव जायते ।
तस्यानुभववेद्यत्वान्न रूपेण कथञ्चन ॥ ५ ॥

अतः संभूय ताः सर्वाः स्वानुभूतरसात्मकम् ।
वियोगभावैः स्वं भावं वर्णयन्ति हरिं तथा ॥ ६ ॥

तत्तल्लीलान्तरङ्गस्थाः स्मृत्वा स्मृत्वा तदंगकम् ।
अतो माधुर्यरूपेण रूपयन्ति परस्परम् ॥ ७ ॥

एकाधरं तथैवान्या वदनं नयनं परा ।
एवमग्रेऽपि विज्ञेयं संपूर्णं **मधुराष्टके** ॥ ८ ॥

अतदेवास्मदाचार्यैरतिगुप्तं निरूपितम् ।
तद्भावभावनं सिध्येदेतद्ग्रन्थार्थभावनात् ॥ ९ ॥

तद्बोधोऽपि **निजाचार्य**कृपया प्रभुकारितः ।
तादृशैर्ज्ञापितो वापि भवेन्नैवान्यथा क्वचित् ॥ १० ॥

**इति श्रीहरिदासविरचितं मधुराष्टकतात्पर्यं समाप्तम् ।**

॥ श्रीकृष्णाय नमः ॥

॥ श्रीगोपीजनवल्लभाय नमः ॥

॥ श्रीमदाचार्य चरणकमलेभ्यो नमः ॥

# अथ श्रीमधुराष्टककी टीका लिख्यते

अब श्रीगुसाँइजी प्रथम श्रीआचार्यजीकों नमस्कार करत हैं काहेतें यह जो मधुराष्टक ग्रंथ हैं सो श्री आचार्यजी आपु प्रगट भऐ हैं सो अत्यंत मधुर रस रूप हैं जिनमें मधुप जो सिंगार रस हैं सो यह सब मधुराष्टक के भाव में भर्यो हैं। ताहीतें श्रीआचार्यजी आप मधुर रस के भोक्ता हैं सो आप भोग सदां इंद्री करत हैं। और लोकन में प्रगट नहीं किये हैं। सो रसकों गोप्य राखकें माधुर्य भाव मधुर-मधुर सबनकों वरनन कीऐ हैं। सो ताकें भाव प्रकास करवे में अनुभव करिवें के योग्य हैं। सों श्रीगुसांइजी आप प्रगट कीए हैं। तातें जो प्रकार यह मधुराष्टक ग्रंथ श्री आचार्यजी महाप्रभू आप प्रगट कीये हैं सो मंगला-चरन के श्लोक में श्रीगुसांइजी आप वरनन कीऐ हैं। सों तामें यह कहे हैं। जो श्री आचार्यजी महाप्रभून के चरणकमल के आश्रय बिना यह माधुर्यरस की प्राप्ति न होय। जो श्रीआचार्यजी महाप्रभून के चरण कमलको ऐसों प्रताप हैं तातें प्रथम मंगलाचरणकों श्लोक कहत हैं।

**श्लोक—नमो हुतासिने मधुर प्रकाशन परायणः।**
**रमा लोलमना योऽसि भाव नैकहितप्रदः ॥१॥**

अर्थ—अब प्रथम श्रीप्रभून के चरनकमल को नमस्कार श्री आचार्यजी महाप्रभून के चरणकमल कों नमस्कार करत हैं सो कहत हैं। जो नमो हुतासने सो ताकों अर्थ तो यह हैं। जो श्री आचार्यजी महा-प्रभून के स्वरूप विप्रयोगात्मक आधिदैविक जो अग्नि हैं तिनमें तों गुण

यह है। जो संयोग रस अमृत ताकी प्राप्ति होत हैं। तातें जो कोई की विप्रयोगात्मक अग्नि महाताप रस जों श्रीआचार्यजी महाप्रभू आप हृदय मेंते नाही आये। तहाँ ताई संयोगात्मक अमृतरस पुष्टिमार्गको फल ताकी प्राप्ति नाहीं हैं। ताते विप्रयोगात्मक अग्नि के आश्रय संयोगरस हैं। सो रसरूप श्रीआचार्यजी महाप्रभू आपु हैं। सों तातें मधुर अग्नि कहें सो काहे ते जो जीतनी मधुर सामग्री होत हैं। सो अग्नि के संबंध बिना तो सिद्धि नाही होत हैं। सों तेंसेंई संयोगात्मक माधुर्यरस विप्रयोग रस के आश्रय बिना प्राप्ति नाही होतहैं। सों एसें श्रीआचार्यजी महाप्रभू आपु विप्रयोगात्मक मधुर मधुर हैं सो जिनके आश्रय ते लीला के भाव रूप संयोगात्मक रसकी प्राप्ति होत हैं। सो ताहीतें श्रीआचार्यजी महाप्रभू आप तो अलौकिक अग्निरूप हैं। तातें यह पुष्टिमार्ग परमरस रूप माधुर्य रस जामें हैं। ब्रजभक्तन के भावरूप अमृत सों अपने सेवकनकों दान करिवे के निमित यह रस प्रगट कीयो हैं। और श्रीआचार्यजी महाप्रभू आपतो सदा लीलारस अमृत समुद्र हैं सो ता प्रेम सो भऐ हैं। सो विहार करत हैं। सो ताहीतें श्रीआचार्यजी महाप्रभून के कीये ग्रंथ तो महारसरूप हैं। सो काहे तें और जो वाणी है सोतो चतुराई करिकें है तथा कोंई जीवकी वानी देवतान के आश्रय करिकें है। सो तिनमें रसतो नाही है सो काहेते जो उनकों लीला रसकों अनुभव नाही हैं। और श्रीआचार्यजी महाप्रभून के कीऐ ग्रंथहैं सो आप श्रीठाकुरजी के संग सदा लीला करत हैं। सोई वचनामृत द्वारा दैवी जीवन के लीयें वर्णन कीए हैं सो तातें अत्यंत स्वरूप वचन हैं सो तत्कारनफल सेवकनकों सिद्ध होत हैं सो तामें यह मधुराष्टक ग्रंथ हैं सो प्रेम के रसकरिकें मत्त होय हृदय में तेंरस उमग्यो है सो तों बाहिर प्रगट भयो हैं। सो तातें महागूढ़ रस सो एसो मधुराष्टक ग्रंथ है सो या प्रकार सों प्रगट भयों हैं। सो श्रीगुसाँईजी आप वरनन करत हैं। श्रीआचार्यजी महाप्रभू आप श्रीगोवर्द्धननाथजी श्रीगोवर्द्धन पर्वत के ऊपर जहाँ आदि श्रीवृंदावन तहां रस रूपसों श्रीयमुनाजी सहित सदा विराजत हैं। तहां नीत्य लीला

प्रगट हैं। सो तहां श्रीगोवर्द्धननाथजी की मंगला आरती करिकें ता पाछें ता दिन श्रीस्वामिनीजी के जन्म उत्सव की अष्टमी हती। तातें अभ्यंग अस्नान करवायकें जन्माष्टमी कों सिंगार जा दिन करत हैं और अत्यंत रसमय सो उमग्यों सो प्रेम में विवस होयकें सगरें श्री अंगकों अनुभव हतों सो श्रीआचार्यजी महाप्रभू आपु हृदय में कीऐ हैं। सो बाहिर गुप्तरीति सों प्रगट कहे हैं सो आगें मधुरं मधुरम के प्रसंग में कहेंगे। सो तातें यह तो मधुराष्टक जो ग्रंथ हैं सो ताकों अपने हृदय में गोप्य ए स्वभाव सहित पाट करें तो याको भाव श्रीआचार्यजी महाप्रभून की कृपातें सिद्धि होय सो तातें अपने मनके विचार करिकें देखें जो मेरो मन स्वास्थि पायो हैं एसों विचारकें रस के ग्रंथनकों भाव विचारें तो परम हितकों पावें नहीं तो भृष्ट होय जाय सों ताहीतें श्रीआचार्यजी महाप्रभू आपु सिक्षा के ग्रंथ वोहोत प्रगट कीए हैं। श्रीकृष्णाश्रय। नवरत्न भक्ति वर्द्धनी विवेक धैर्याश्रय। जलभेद ईन ग्रंथन कों पढ़े तो याकें विगार सर्वथा न होय। या प्रकार मंगलाचरन करिकै देवी जीवन कों सिक्षा दीये। अब श्रीगुसांईजी आपु मधुराष्टक के प्रथम श्लोक को भाव लिखे हैं सों अब अर्थभाव रहित हैं सो कहत हैं।

**श्लोक—अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरं।-**
**हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरं।**

याको अर्थ—अब प्रथम कहें जो अधरं मधुरं तामें नानां प्रकार के भाव हैं। श्रीठाकुरजी के अधर केसें हैं अरुन सोभदित है। सो तिनकी छवि देखिकें बिंवाफल लज्या कों पावत हैं। एसें बिंबाफल कों देखिकें सुक जो नासिका रूप सो ऊपर आयके बैठ्यो हैं परंतु एसी बिंबाफल की छबि है जिनकों देखिकें सुकजो हैं सो अपनों देहानुसंधानु भूलि गयो है सो बिंबाफल की छबि देखिकें मानों ठगि रह्यो है सो उठि नांही सकत। सो मानों बिंबाफल की रक्षा करिवे कों बेठि रह्यों हैं। मति कहूं दूसरो शुक आयकें बिंबाफल कों न खेय। एसों

अधर अद्भुत सरूप हैं और अधर अद्भुत स्वरूप हैं और अधर के ऊपर नासिका में वेसर हैं सों श्री ठाकुर जी के अधर ऊपर विहार करत हैं सो अत्यन्त सुंदर उज्वल हैं सो तिनकी अपार छवि हैं सो मानों मुक्ताफल नांही हैं सो मानों वंक परम सोभायमान आयो हैं सो दूरितें मनकों देखिकें अपनों भोजन जानिकें आये सों ताही समय चतुर धनुष जो भृकुटी हैं और नेत्रन के कटाक्षरूपी जे बांण हैं ताकों वंक के हृदय कों वेधे सोई वेसरिकें मोंतीमें मानों कंचन परयो है जो या प्रकार वंककों हृदय वेधिकें नासिका रूपीकों खंभ हैं तहां वकरूपी चोरकों कंचनरूपी जेवरीसों बांधे हैं अथवा दूसरो भाव सुकजो अधर तिनकी रक्षा करत हें तिनतें अपने मनमें विचारयो जो मति कहूँ मेरो भोजन बिंबाफल लेयगो तातें सुकनें वककों हृदय वेधिकें अपनी चोंचको वेधि वांधि राखे । अथवा बक जो हैं सो नासिकारूप पोरियाके पायन परत हैं जो में अधुर रूप दरवाजे के भीतर हैं तहां मोंको जान दे में तोकों कंचन देतहों सो सुक कंचन लेत नांही हैं सो परस्पर बातें करत हैं। और अथवा बिंबाफल जो अधर हैं । और करणमें मकराकृत कुंडल हैं । सो दोऊ जने मनमें भय पावत हैं । सो बिंबाफल तो यह जान्यो जो सुक मेरो बेरी आयो हैं । और मकराकृत कुंडलनें सुककों और वंककों कंचनरूप जेवरी करिकें बांधे हैं। ता पाछें कूप हैं । जो नासिकाकों रंध्ररूप तामें डारें और कूपको मुख छोटो और सुक बक पड़े सो दोऊ बांधे हैं। सो तातें उडिहूं नाही सकत और कूपमेंहूं नांही पडि सकत सो कूप ऊपर बेठि रहे है सो एसी सुक बंककी उपमा कही जों अब कहत हैं । सो फेरि अधर केंसे हैं । जिनकी छवि देखिकें श्रीस्वांमिनीजीकों स्नेह परमोतम उतम निरविकार सोंई मांनो मुक्ताफल उज्वल हैं सो श्रीठाकुरजी के अधरामृतकों पान करिकें ता पाछें मृत्य होंयकें गिरिवे लगे सो तब नासिकारूप जो खूटी हैं सो तिनकों पकरिकें घूमत हैं अथवा अधरामृत रसपान करे

तिनकें तों मत ता होय सों तब खूटी पकरिवेकी सुधि कहां तहां अब कहत हैं। जो श्री स्वांमिनीजी तव मुक्ताफल रूप होय अधरामृतकों पांन कीयों तव देहानुसंधानु भूलि गई । सो तव श्रीठाकुरजी दया-करिकें नासिकारूप जो अधर हें सो तहां बैठारि राखे तामें श्रीठाकुर जी श्रीस्वांमिनीजी सों यह जताई जो तुम्हारी अधरामृतकों पान कीयो हैं सो तिनकों त्यागमें कैसें करो तामें मेरी अधररस ो सिज्या हैं। नासिकारूप घरसों तामें तुम सदांई विहार करो। और श्रीठाकुर-जौनें श्रीस्वांमिनीजीसों यह जताई जो तिहारे अधरामृत रसकों पान मोहूंको करनों हैं सों तातें मोंकों तिहारे विना एक क्षणहूं कल नाही परत हैं। तातें यह मेरे नासिकारूप जो घर हैं सो तामें तुम सदांई विराजो यह भावसु चित कीयो सों या भांतिसों कहिकें नासिकामैं श्रीस्वांमिनीजीकों भावरूप परम उज्वल नासिकामें राखिकें अपने अधररूप जें सैया हैं सो तहां विहार करावत हैं सों ए। अधर हैं। और एक समय श्रीआचार्यजी महाप्रभू आप श्री गोवर्द्धननाथजीकों सिंगार करत हैं । सो श्रीगोवर्द्धननाथजी हँसि हँसिकें जेसो मनोरथ कहे वस्त्र आभूषण कहे जो ताही भाँतिसों श्रीआचार्यजी महाप्रभू आप धराऐ हैं । सो तव श्रीगोवर्द्धननाथजी श्रीआचार्यजी महाप्रभून सों कहें । जो व्रजभक्त मोंकों अति सुख देत हैं। सो तातें मोकों प्राणप्रिय हैं। तेंसें तुम मोंकों बोहोंत ही सुख देत हों सों ताही प्रकार तुम मोंकों सुख देतहौं। तातें तुम्हारे बिना और व्रजभक्तनके बिना एकक्षण हूं रहि नाही सकत हूँ सो तब श्रीआचार्यजी महाप्रभू आप यह सुनिके मंद मुसकायकें अत्यंत स्नेह करिकें श्रीगोवर्द्धननाथजीकें कपोलकों परसकरिकें ता पाछें श्रीगोवर्द्धननाथजी आपु श्रीस्वांमिनीजी की ओर दुरितें कटाक्षकरिकें देखें तब श्रीआचार्यजी महाप्रभू आप देखें सो काहेतें जो आपुहूँ श्रीस्वांमिनीजी के भावरूप हैं। सो श्रींआचार्यजी महाप्रभूकों देखतई मानों कोई कंचनकी अद्भुत सत्ता श्रीअंगकों चाकचिक मानों कोटि-कोटि कंदर्प कोटि-कोटि दांमिनी

कोटि-कोटि रतिलजाको पावत हैं । कमलाजो लक्षमी सचि जी सीय जो श्रीरघुनाथजीकी प्रिया ईत्यादिक सब लज्जाकों पावत हैं एसे रस-रूप तों श्रीस्वांमिनीजी पधारे हैं सो मानों कोई सिंगार रस आपुहूँ स्वरूप धरिकें मानों मत्त गजराजकी रीतिसों मत्त हीयकें घूमत लटकत तांबुल श्रीमुखभरे धीरे-धीरे आभूषणकों गुढ़ा करिकें श्रीगोवर्द्धननाथजी की दृष्टिसों वचायकें पाछेंतें आयके श्रीगोवर्द्धननाथजी के श्रीमुखकमलकों चुंबन कीये सो पोककी छाप कपोलन ऊपर दोऊ ओष्टमें जो रस ताकी दोय लोंककी छाप लागी हैं। तामें छिदलात्मक स्वरूपकों दोऊ लिक प्रगट करिकें जताये सो रसरूप श्री गोवर्द्धननाथजी के कपोलमें कृपा देखिकें श्रीस्वांमिनीजी आपुहूँ प्रेमसों विवस होय रही और श्रीगोवर्द्धननाथजीहूँ चक्रत होयकें निहार रहे। रसके भरकरिकें ऊपरते रंचकहूँ लजित भए । हृदयके भीतर तो परमरसकों आनंदकों समुद्र हैं सो उमापोसों तब यह छवि देखिकें श्रीआचार्यजी महाप्रभूजी के हृदयमें परम आनंद भयों : सो प्रेमकों अनुभव करिकें भीतर सब रसको अनुभव करिकें ता पाछें रस बाहिर उमग्यों तब श्रीआचार्यजी महाप्रभू यह कहे जो अधरं मधुरं नाम अधर व्रज भक्तनके अनुभवमें अत्यंत मधुर हैं सो सब रस कें भोक्तातो श्रीआचार्यजी महाप्रभू आपु हैं सो काहेते जों अधर तों मधुर अमृतरससों भरयों सदाँही है परंतु आजु अत्यंत माधुर्यरस सहित सब लीलाकी स्मरण करावत हैं सो सोभां देत हैं फेरि श्रीआचार्यजी महाप्रभू आप अपने मनमें विचारे जो तिनके अधरकी सोभा देखेतें एसों सुख उपजत हैं सा अधरकों पांन जो करत हैं सों तिनकों आनंद कह्यो न जाय सों एसें हृदयमें विचारकें प्रेम दिसमें विहवस होइकें आपुश्री आचार्यजी महाप्रभू श्रीगोवर्द्धनगाथजीकों सिंगार करत भीतर तों आपुहूँ श्रीस्वांमिनीजी रूप हैं सों तातें इनहूतें रह्यो न गयो सो श्री-आचार्यजी महाप्रभू आपुहूं अधरणकों चुंबन कीयों सों आपहूँ

अधरामृत के अनुभव करिकें श्रीआचार्यजी महाप्रभू आप श्रीमुख तें कहे जो अधरंमधुरं जेसे कोई मधुर वस्तु को खाय है तिनके अंगों में भावात्मक रस हैं तिनको श्रीआचार्यजी महाप्रभू के वचन सब अधरा-मृतरसरूप ही जानिकें कहिये सुनिये। सो तब श्रीगोवर्द्धननाथजी आप मुसिकायकें श्रीआचार्यजी महाप्रभून के हृदय में लपटि गऐ हैं सों श्रीगोवर्द्धननाथजी आपुको अधरबिंब सदाई मधुर हैं परन्तु श्रीस्वामिनी जी के मुखारविंद के रसकी पीक तिनकी छाप जो अधरबिंब में लगी सों तातें अधरबिंब अत्यंत सोभा देत हैं सो श्रीस्वांमिनीजीं हूँ नित्यई श्रीगोवर्द्धननाथजी कें सिंगारसमें पधारत है सों अपने मनको जो मनोरथ हैं सोई सिंगार श्रीआचार्यजी महाप्रभू द्वारा धरावत हैं और सिंगार भोग की सांमग्री हैं सोऊ श्रीस्वांमिनीजी के मनोरथ की हैं तातें श्रीस्वांमिनीजी तो नित्य पधारिकें मध्यांन समय कों संकेत श्री गोवर्द्धननाथजी कों जनावत है तातें आजु यह अपने मनमें आई जों आपुने मुखमें जो तांबूलरस सोई सुंदररस रंग भयो और श्रीमुखारविंद जो अपनो हैं सो ईछारूप मुखकमल तांबूल रसरूप रंग मैं भरिकें श्रीगोवर्द्धननाथजी कें अधररूपो कागद हैं सो तामें छाप मोहोर दीनी हैं सो तामें यह भाव मुचित कीऐ हैं जो राजभोग पीछें गाय चरावनकें मिसि करिकें निकुंजमैं पधारियों जो में हूं तहां आऊँगी जो या प्रकार हू संकेत जतावत हैं। अथवा श्रीस्वांमिनीजीनें जान्यों जो श्रीठाकुरजी जो हैं सों अनेक कोटानकोट युथ प्रति जो ब्रजभक्त हैं सो तिनके मनकों हरण कीऐ हैं एसों अपने मनमें विचारकें सब ब्रजभक्तनकों यह जताये जो श्रीठाकुरजी आप हमारे बस हैं और के अनुभव में वेगी आवेंगी नाही है एसें तिहारे वस नांही हैं कदाचित कोंऊ ब्रजभक्तन के घर प्रेम वस तो श्रीठाकुरजी आप पधारत हैं सो ताहू में श्रीस्वांमिनीजी बिना तो रहत नाहीं और द्विधा सरूप करिकें सबनकों दान हैं सो तातें ललित त्रिभंग ग्रंथ में श्री गुंसाईजी आप लिखे हैं जो यह ललित त्रिभंग स्वरूप

परम रस रूप ही हैं तों तिनकों अनुभव एक श्रीस्वामिनीजी ही जानत हैं। ओर आपुन हित करत हैं। जो उनहीकें अनुभव योग्य हैं। उनहीकें लीए यह रस प्रगट भयो हैं तातें ओर जो व्रजभक्त हैं तिनकों श्रीस्वांमिनीजी के चरणकमलकी सेवन करें तो ईनके आश्रयतें सेवनके रसकी प्राप्ति होय। सो या प्रकारतें अधरं मधुरं मधुरकों व्याख्यान कीए। अथवा अव मधुर पदक हैं सो ताकों अर्थ यह हैं जो सकल इंद्रीनको स्वाद होय परम संतुष्ट पावें सों ताकों मधुरपद कहिए। जेसें कोई भूखो होय और सुंदर महाप्रसादकों मिलें सो तव वाकी सकल इंद्रीय संतुष्ट होय तब यह सब सामग्रीन कों वासों न कीयो जाय। यह अत्यंत मधुर कहूं तेसें श्रीआचार्यजी महाप्रभू आपु श्रीगोवर्द्धननाथजीकों स्वरूप देखिकें वारंवार प्रेममें विवस होयकें श्रीआचार्यजी महाप्रभू आपश्री अंगकें वरणन करिवेकी सुधि तो रहत नाही हैं। सों अपार जिनकी सौंदर्यता तिनकों श्रीआचार्यजी महाप्रभू आप पान करिकें नेत्रद्वारा जो श्रीआचार्यजी महाप्रभू आपु श्रीगोवर्द्धननाथजीकों परम रसरूप हैं ताकों पान करिवेंसों अत्यंत मधुर नाम मिष्ट हैं। यह रसतातें सर्व इंद्रीय श्रीआचार्यजी महाप्रभूनकी सीतल भई हें। सो ताहीतें जो श्रीगोवर्द्धननाथजीके जो श्रीअंग हैं तिनकों मधुरं मधुरं करिकें वरनन करत हैं सों तामें प्रथम कहे जो अधरं मधुरं सो तामैं तों अनेक भाव हें। सो काहेते जो प्रथम अंगवस्त्र छोड़िकें श्रीआचार्यजी महाप्रभू आपु अधरं मधुरं कहे तों ताकों अभिप्राय कहा सो अब कहत हैं जो अधरमें तों अनेक भाव हैं प्रथम तो दर्शन ता पाछें परसन ता पाछें चुंबन ता पाछें अधर रसकों पान हैं। सो या भांति सों प्रथम अधर रसकों वरनन करत हें सो काहेते जो प्रथम जब श्रीगोवर्द्धननाथजीकों दर्शन श्रीआचार्यजी महाप्रभू आपुनें कीयों सो तब प्रथम ही मुखारविंदकों दर्शन भयों सो तामें प्रथमतों अधरनके ऊपर दृष्टि गई सो प्रथम श्रीआचार्यजी महाप्रभू आपु अधरं मधुरंम ही कहें। सों अधर

श्रीठाकुरजी कैसें सुंदर हैं जीवको देखिकें बिंबाफल लज्जाकों पावत हैं और बंधूक जो हैं दुपहरियाकों फूल सो लज्जा पावत हैं । मानों प्रातकालके सूर्य ऐसी अरूनमा हैं सो प्रथम श्रीयसोदासी हें मों प्रातकाल सेजसों उठायकें अपनी गोदमें ले श्रीमुखारविंद देखत हैं सो ता पाछें अधर चुंबन करत हैं पाछें मंगलाभोग परम प्रीतिसों अंरोगावत हैं । पाछें व्रजभक्त आवत हैं सो श्रीमुखकों दरसन करत हैं । तव रात्रि अंजन अधरनमैं लगि रह्यों हैं सो देखिके अत्यंत सुख पावत हैं अनेक भांतिसों रक्षादिक हास्यादिक करत हैं ता पाछें तेल लगाइकें मांन श्रीठाकुरजीकों करावत हैं ता पाछें सिंगार करिकें सिंगार भोग अरोगावत हैं सों ता पाछें ग्वालभोग आरोगीकें पाछें जब राजभोगकों समय होत है तब राजभोग आरोगकें गाय लेकें बनमें पधारत हैं सीतवंत हो छाक श्रीयसोदाजी पठावत हैं सों आरोगकें श्रीठाकुरजी आपुनिकुंज मंदिरमें सेंन करिवेकों पधारत हैं । सो तहां अनेक भांतिनसों व्रजभक्तनकों सुखदेत हैं सो तव अधरजो हैं श्रीठाकुरजी के तिनके स्पर्श करिकें चुंबन करत हैं । ता पाछें परस्पर जों अधर रसकों पान सों पर प्रीतिसों करत हैं । सो तामें जो उनमत होत हैं सो कछू दोऊ सरूपकों सरीर की सुधि रहेत नाही हैं सो काहें तेजो परम प्रेमके वस होयकें अधर रसकों जो अमृत हैं सो ताकों पान वस होयकें अधररसकों जेां अमृत हैं सो ताकों पान करत हैं । ताहीतें श्रीआचार्यजी महाप्रभू प्रथम अधरनकों देखिकें भाति भांतिके भावकी स्फुरती भई हें ताहीतें हृदयमें ते प्रेमकों अधिक जो उमग्यो तामेंकू स्फुरती भई हें ताहीतें हृदयमें ते प्रेमकी कछू सरीरकी सुधि रही नही सो तातें श्रीआचार्यजी मपाप्रभू आप इतनों ही कहे । अधरं मधुरं । जो में अबमें कहां तांई वरनन करो । अपरंपार हें जो सोभा जाकी अेसौ अधरं मधुरं और एक समय श्रीआचार्यजी महाप्रभू अपने प्रातकाल श्रीठाकुरजीके दर्शन कीए सो परम गदगद हृदय होय

आयो । सों ता समय श्रीआचार्यजी महाप्रभू आप यह सोभा देखे सो श्रीठाकुरजी के तो आरक्त नेत्र हैं। निकुंज मंदिर तें भोर उठिकें चले हे सो अधरन में मानों बीज भक्त हें सो तिनकों अंजन लग्यों सों आरक्तता और स्यामता हैं सो मानों परम अनुराग की सुजनता करत हें जो या भांति की अद्भुत सोभा श्रीठाकुरजी की देखिकें प्रेम के आवेस में कहे। जो अधरं मधुरं यह कहे जो या भांति सों निरूपन भयो अब आगें और हूं कहत हैं। जो वदनं मधुरं कहे जो याको तो अर्थ यह है जो वदन कहिये मस्तक समस्त मुखारविंद कों नाम है। सो जेसे चंद्रमाकों सूर्यकों देखिकें कहियें जो यह चंद्रमा सूर्य है परंतु चंद्रमा सूर्य के मुख नासिका करन कछु दीसत ही हैं। सों काहेते जो कीरण में तेज होत हें सों तेसें यहां कोटि कंदर्प लावन्य जिनकी छवि पर कोटि चंद्रमा सूर्यकी वारिमैं। अैसें श्रीठाकुरजी के श्रीमुखारविंदकों भक्तजन देखिकें विवस होत हैं जो यह तो सुद्धताही रहत हें जो न्यारे-न्यारे अङ्गनकों अविलोकन करि सकें सो तातें समस्त श्रीमुखारविंदकों देखिकें कहे जो वदनं मधुरं और एक समय श्रीआचार्यजी महाप्रभू आपु पृथ्वी परिक्रमा करत श्रीगोकुलकों पधारे सो तहां श्रीगोविंदघाट है सो तहां छोकर पीपर के वृक्ष तो भगवद स्वरूप ही हैं सों तहां एक समय श्रीआचार्यजी महाप्रभू आपतो पोढे हते सों जीवन के उद्धार के लीये चिंता करत हें सो अर्द्धरात्र के समय आप श्रीठाकुरजी कोटि कंदर्प लावन्य साक्षात् मनमथ के मनमथ एसे प्रगट होयकें श्रीआचार्य जी महाप्रभूनकों आग्या दीये जो तुम जीवनकों ब्रह्मसंबंध करवावो सो श्रीमुखकमल को दर्शन करिकें ता पाछें श्रीआचार्यजी महाप्रभू आप "वदनं मधुरं" कहे। अथवा वदन कमल की अलकावली कपोल चुंबक गंडस्थल इनके मध्य में वदनं मधुरं के भीतर तो सब भाव कहे तहां चिवुक जो श्रीचंद्रावली जी के श्रीअंग के भाव सों विराजत हें सो ताहीतें चिबुक ऊपर हीरा को आभूषण श्रीगोवर्द्धननाथजी आपु धरत हैं सो श्रीचंद्रावली जी सेत उज्वल लीये श्रीअंग हें सो ऊपर

कहे हैं। श्रीठाकुरजी बेसर धरे हैं नासिकामें सो तो श्रीस्वांमिनीजी के भाव हें सो ताकों अभिप्राय कहत हैं जो मुख अधरामृतको रसको अनुभव करिवेके जोग्य हें सो ऊपर वरनन कीए सो तिनते उतरतो मुख्य चंद्रावलीजी हैं सो तातें श्रीस्वांमिनीजी अधरके ऊपर विराजत हें नासिकाके वेसररूप और श्रीचंद्रावलीजी अधरके नीचें विराजत हें सो ताकों भाव तो यह हें जेा श्रीस्वांमिनीजीके पांन करें ता पाछें श्रीचंद्रावलीजीकों रसपांन करिवेकी योग्यता हें सो काहेते जो सर्व अधरामृतकों अनुभव श्रीस्वांमिनी करत हें सो पांन करतमें रसके अधिक करिकें जो श्रीठाकुरजीके मुखकमलमेते रस वहत हैं सो चुबुकपर आवत है तातें इनमें यह भाव विचारनो जेा मुख्य श्रीस्वांमिन जी तातें उतरकें मुख श्रीचंद्रावलीजी हैं तिनतें उतरते और भक्त हें तिनकों आगें निरूपन करत हें जेा कपोल धर श्रीस्वांमिनीजी तातें उतरिकें मुख्य श्रीचंद्रावलीजी स्यांम अलकनमें अविर्भाव जाननो सेा काहेते जेा श्रीस्वांमिनीजी के मुख कमल हैं। तिनमें भृमर नाना प्रकारके गुंजार करत हें तेंसेंई यहां श्रीठाकुरजीको मुखकमल हैं। अधरामृत भीतरसोंई रस तहां अनेक भक्त भ्रमर अलकावली रूप विलास करत हैं रसपांन करिवेके लीयें तेंसेंई श्रीयमुनाजी अलकावलीरूप होय मुखकमलमें विहार करतहैं तहां श्रीयमुनाजीमें प्रीति आदि करत हैं तहां श्रीयमुनाजी सेा तेसेइं यहां अलकावलीके निकट मकरादिकुल अनेक आभूषण हैं अेसे वदनकमलकों देखिकें वदनं मधुरं कहे सों तामें तो अनेक भांतिके भाव हें सेा काहेते जेा वदन कहियें सेा मुखारविंदको नाम हैं सेा श्रीमुखारविंदमें केसेां प्रभाव हैं। सेा जहां रासपंचाध्याईमें श्रीठाकुरजी आप अंतरध्यान लीला कीऐ हें ता पाछें श्रीगोपीजन ढूंढत-ढूंढत पुलिनमें आयके रूदन कीयो हैं। सेां तहां श्रीठाकुरजीतों आप प्रगट भऐ सेा साक्षात् मनमथ एसेां परम सोभासंयुक्त हें सो व्रजसुंदरी उठिकें अपुने वस्त्र वेही श्रीयमुनाजीकी पुलिनमें छिपाय

दीयें । तापर श्रीठाकुरजी व्रजभक्तनकें प्रेमके वस हैं तातें विराजे व्रजभक्तन के अनेक जूथ हैं सो श्रीठाकुरजी कों घेरिके चारचो दिसा बेठें ता समय एसो श्रीमुखारविंद परमसोभा संयुक्त हैं सो परम प्रभाव हैं। जो सब व्रजभक्तन के सनमुख श्रीमुखारविंद हैं सो व्रजभक्त श्री मुखारबिंद की शोभा देखिकें विवस होत हैं सों तातें मुखारविंद परम मधुर हैं और श्रीठाकुरजी आप जब गाय लेंके सांझ समय व्रज में पाव धारत हैं तब श्रीयशोदाजी गोरज जो श्रीमुखारविंद पर लागी हैं तिनकों झारिकें अंचल सों, पोंछें मुख चुंबन करत हैं सो ता समय मुखारविंद की शोभा अत्यंत प्रिय होत हैं सो काहेतें जो गाइलेंकें श्रीठाकुरजी बनमें गए हते सो विरह हतों तातें जब देखें तब नित्य नौतन अनुराग श्रीयशोदाजी कों होत हैं और सगरे श्रीअंग में मुखार-विंद ओष्ट हैं जो परम शोभायमान हैं सो तातें अत्यंत मधुर हैं जो श्रीमुखकों दरसन करत हैं तिनकों तीनों ताप निवर्त होत हैं और श्रीमुखारविंद केंसो हैं जामें व्रजभक्तनकों मनरूपी जो कोई भ्रमर हैं सो श्रीमुखरूपी जो कमल हैं तामें लुब्धायकें पान करत हैं जों या भांति सों वदनं मधुरं कों अर्थ निरूपन भयो आगे अब औरहूं कहत है। जो नयनं मधुरं तामें तो भांति-भांति के अनेक भाव हैं कोइक समय श्री ठाकुरजी वेनु वजावत हैं ता जमय नैंन की परम सोंभा होंत हैं और कबहूंक तो वेनुकी और दृष्ट परत हैं और कबहूंक तों कटि पर दृष्ट परत हैं और कबहूंक तों कटि पर दृष्ट परत हैं और कटिपर कबहूं वनमाला पर दृष्ट परत हैं कवहूंक तिरछी चितवनि करिकें व्रज भक्तनकें ऊपर दृष्टि जात हैं सो कहतें जो वेनु वजात हैं तासमें श्रीठाकुरजी टेडे होत हैं औरत्रिभंग स्वरूप हैं सो श्रीठाकुरजी के नेत्र कमल अत्यंत अनिर्वचनीय हैं मनसों और वचन सों अगोचर हैं सो काहेते जो एसी सोभा नेत्र कमलहैं सो सब रस मनसों सगरो कहां तांईलिख्यो जाय अेसे छोटों पंछी है सो समुद्ररूपी रसकों कहां तांई पान करें और इतनी बुद्धि कहां तांई जो नेत्र कमल की सगरी सौंदर्यताकों वर्णन करें सो तातें मन

वचन बुधितें अगोचर हें तातें उन नेत्र कमल के रसकों अनुभव करिवेकूँ जोग एक व्रजभक्त ही हैं जो और तों दूसरो कोई नहीं है सो काहेतें नेत्रकमलमैं ते कोईक लावन्यांमृत झरत हे सो रसकी माधुर्यता को भरहें सो ताकों तब अनुभव होइ तव व्रजभक्त सुंदरीन के नयन भीतर होय देखियें तब नेत्र कमल की सौंदर्यता की सोभाको अनुभव होय सो काहे ते व्रज सुंदरीन कों हृदय कमलरूप हैं सो मांनो कोई कटोरा हें जोये नेत्र द्वारा श्रीठाकुरजी के नेत्रकमलनको जो रस है सो ताको पीकें अपने हृदयरूप जो कटोरा हें सों तामें धरत हें एसों प्रेम व्रजसुंदरीनकों और इतनों काहूं को सामर्थ कहा हैं जो श्रीप्रभूजी के रस को पान करें ताईतें श्रीठाकुरजी आपु श्रीव्रजसुन्दरीन के वस हें सो एसो उतम प्रेम व्रजभक्तनको है। फेरि नेत्रकमल केसे हैं जो नेत्रके गर्भ असंख्य वधाजही कहें सो कंदर्पके भावसूचक रससों भरे हैं। और नेत्रकमल केसे हैं अत्यंत तरल चंचलतम हें सो तिनकी चंचलतां मीन देखिकें लज्जा पावत हें। जो एसे चंचल परमरस सहित हैं उनकी उपमा जो दीऐ सो वेलिरस है। और जड़ है सो जहां रस नहीं है। और श्रीठाकुरजी के नेत्रकमल हें सो तो परम रसरूपी है सो एक श्रीस्वांमिनीजी को मुखार-विंदरूपी जो कमल हें तिनकों देखिके चंचलता भूलि जात हैं। उनकों मुखकमल देखिकें विवस होयके थकित होत है। और पलकहूं परत नाही हैं। जो या भांतिसों टकटकी लगायके श्रीस्वांमिनीजी कों जो मुखकमल है सो तहां भ्रमर की नांई सुभाय के रसपान करत हें फेरिके श्रीठाकुरजी के नेत्र कमल कैसे हें परम सचिकन निर्मलसो हें सो मानो नेत्रद्वारा प्रगट होत हें। सो एसी सोभा संयुक्त नेत्र कमल श्रीठाकुरजी के हें फेरि श्रीठाकुरजी के नेत्रकमल केसे हें सो श्रीठाकुरजी आप जब वेणु वजावत हें सों तव अनेक भांति की तांन लेत हें सोई ता भांत के समुद्र हें और नेत्र तामें चारयो ओर परम सोभा पावत हें जोई मागनो भांति भांति की तरनी चउ चहों सो एसों नेत्र को अंजलता समय होत हैं। ता समय श्रीठाकुरजी के नेत्र कमल कर चंचल हैं के

